श्रीपरमहंसः
(संस्कृतकाव्यम्)
ŚRĪ PARAMAHAMSAḤ
(A SANSKRIT EPIC)

कविराजहंस
डा. आचार्य वे.आ. शर्मणा
निर्मितम्
By
Kavirajahamsa
DR. V.A. SARMA
Retd Professor of Sanskrit
S V University

तिरुपति
TIRUPATI
1999

SRI PARAMAHAMSA : A SANSKRIT EPIC

Published with the Financial Assistance from
TTD, TIRUPATI

No. of Copies ***1000***

© Author

Copies available at
5-296, Ullipatteda
Tirupati - 517 502

Printed at
L.V. Press
Tirupati

పండితుల అభిప్రాయములు *

శ్రీ శర్మగారికి మైత్రీపూర్వక శుభాశంసనములతో వ్రాయునది ఉభయకుశలానంతరము -

మీరు పంపిన సద్గ్రంధము చేరినది దానిలో దాదాపు ప్రత్యక్షరమూ చదివాను ఫలితగా నా అభిప్రాయం వ్రాస్తున్నాను

దీనజనోద్ధరణార్ధమూ లోక సంతారణమూ తమ పరమార్ధంగా జన్మించి జీవించిన పరమయోగుల విషయం చిత్తానికి రాగానే తాదాత్మ్యంతో పులకించిపోయే పరమభక్తి- సాహిత్యపులోతులు సరళంగా వ్యక్తం చేయగల సాహితీ ప్రతిభావ్యుత్పత్తులూ ఆధ్యాత్మికతత్త్వ శాస్త్రంలో లోతుల విషయంలో అనుభూతిపూర్ణమైన పరిచయమూ ఈ (రామకృష్ణ) పరమహంస కావ్యంలో అంతటా తాముగా ప్రకటం అవుతూ కనబడుతూ ఉన్నవి

ఈ చెప్పిన లక్షణాల విషయంలో తగినంత చిత్త సంస్కారమూ వాటిని అస్వాదించాలనే ఆసక్తీ ఉన్న ప్రతి ఒక్కరూ ఈకావ్యాన్ని, మహాకావ్యాన్ని ఆరంభించిన వారు చివరిదాకా వదలకుండా చదువుతారు. చదివి ధన్యులు అవుతారు

దీనిని రచించిన వారి ధన్యత విషయం మరి చెప్పవలెనా!

హృదయపూర్వకాభినందనములతో
(పోతూరి) సీతారామాంజనేయులు

2-2-1123/8
న్యూ నల్లకుంట
హైదరాబాదు
25-8-99

---

* I am grateful to the scholars for their kind opinions

MALLAMPALLI SARABHESWARA SARMA
Special Officer
BHAGAVATA SUDHALAHARI PROJECT
Tirumala Tirupati Devasthanams
TIRUPATI

Residence.
57-B, Vinayak Nagar Quarters
TIRUPATI

Date· 29-9-99

श्री रस्तु
अमृतस्य पन्थाः ॥

आनीतमाञ्जनेयेन कविहंसेनभूतले ।
दिवः परमहंसाख्यममृतं काव्यकैतवात् ॥

अनधीतश्रुतिशिरसामनधिगतश्रवणमननभूमीनाम् ।
अधिरोहत्यमृतपथं मनोपि न. प्रकृतकाव्यनिःश्रेण्या ॥

वाणी सुधाशनानां वस्तु श्रीपरमहंसचारित्रम् ।
कविरेष श्रुत्यन्तप्रसरवचोगगनवीथिकाहंसः ॥

दृष्टान् यथानुश्रविकांस्तथैव सर्वा नभीष्टान् सततं दुहाना ।
गीर्वाणगौरेव महीजनानां निर्वाणदोग्ध्री सुरभिर्यथैव ॥

निरुपधिबन्धुर्लोके जनसंकीर्णेऽपि निर्जनारण्ये ।
खिन्नात्मनां कविरसौ पन्था अमृतस्य दर्शितो येन ॥

जाने न किमिति कविता प्रावीण्यं परमहंसकारुण्यम् ।
अनुशीलनं तदुभये मज्जति चेतो ममात्र निर्वाणे ॥

अनिवार्यमानुषंगिकमल्पं प्रतिभाति कवियशोप्यत्र ।
यद्यपि, सरणिःकविता जयतु ययैवैतदमृत मनुभूतम् ॥

मल्लंपल्लि शरभेश्वरशर्मा

आशीः

श्री डा वि.ए. शर्ममहोदयै रचित 'श्रीपरमहस' इत्यभिधमेतन्महाकाव्य मद्यैव मया व्यलोकि। महाकाव्यस्य अलङ्कारशास्त्रग्रन्थप्रसिद्धानि भवेयु· लक्षणानि। महापुरुष श्रीरामकृष्णस्य चरित्रपरमिदं काव्य महाकाव्यव्यपदेशभागेव। सुरभारतीभारता· श्रीशर्माण· महोन्नतमिदं चरित गीर्वाणभाषायामेव किमर्थं न्यबध्नन् इति प्रश्न एव अनुचितः। भाषाणां सर्वसामपि जननायमानेयं भाषा न केवलं प्राचीना परन्तु महोन्नताऽपि। तस्यामेव भाषायां निबद्धा· कृतयः शाश्वताकृतयः न त्वन्यस्याम्। श्लेषाद्यलङ्कारप्रचय प्रयोगाय सस्कृतभाषैव भाषान्तरापेक्षयाऽश्रियते प्रायशो बहुभिरिति संस्कृतकवित्वरसपिपासूनामपश्चिमविपश्चिदां विदितमेव। तत्तथास्तु -

परमहंसपदस्याद्वितीयार्था श्रीरामकृष्णाः। सर्वेऽपीतरे श्रीराम कृष्णानुभूतस्थितिबोधकाश्चेत् श्रीरामकृष्णास्सा स्थितिरेव। यस्यां स्थितौ श्रीरामकृष्णा बभूवुस्तस्या एव स्थितेः बोधनार्थं प्रसृतमिदं समस्तवाग्जालम्।

तादृशानामखण्डाद्वयब्रह्माभिन्नानां श्रीरामकृष्णपरमहंसानां जीवन चरितमनुपमानुत्तमघटनाघटितं सत् समेषां जीवनलक्ष्यप्रापकं, तत्त्व बभुत्सूनामतुलितसाहाय्यकारीति च साधकानामनुभवविषयः। अत एव श्रीशर्माणः श्रीरामकृष्णानां चरितं गीर्वाणवाण्यामुपनिबद्धुं निश्चिक्युरिति स्पष्टम्। काव्यमेतत् सकलसुकाव्यलक्षणपरिपूर्णं सत् काव्यरसास्वादलोलुपाना मपि मनासि नूनमाह्लादयति।

'इति ततसुकृतानां प्राक्तनानां विपाके
भवति शुभमतीनां मन्त्रसिद्ध कवित्वम्।'

इति यदविवादमवादि श्रीदण्डिना तदलीकं नेति सुविज्ञायते श्रीशर्मणां कवित्वपठनेन। कालिदासादिमहाकवीनां वाग्धेनुपयसापानेन प्राप्तं स्यादेतत् कवित्वम्, नो चेन्नायाति मधुरिमैतेषु वचस्सु। तथैव समालोडितसकलशास्त्राणामपि विदुषां वाणी सहृदयहृदयान्यावर्जयितुं न प्रभवतीत्यपि निश्चप्रचम्।

अतः केनापि प्राक्तनसुकृतपरिपाकेन ग्रथितमिदं काव्यं आरामकृष्णस्मरणं लोके स्मर्यतामिति आशास्महे।

आस्ति काचन पद्धतिर्महाकाव्यरचनायाम्। सर्गविभागादारभ्य इतिवृत्तवर्णनपर्यन्तं दृश्यन्ते च केचन नियमाः। कालिदासादीनां महाकाव्यानि सन्त्यत्र लक्ष्यभूतानि।

परन्तु श्रीरामकृष्णकाव्यमिद नवीन। रीतिमनुसरदनुपमा शोभामादधातीति सहृदया विदाकुर्वन्तु। नूतनाना मिथ्या, चमत्कारादि - अलङ्काराणा समुचितनिवेशनेन काव्यशोभाऽधिक हृदयानन्दिनी भूत्वा समुल्लसति। काव्यस्यारम्भ एव श्रीशबरीसपर्येति रूपकमपि दृश्यते। तदनन्तर श्रीकृष्णसुधाशतक नामको भागोऽपि नवीनतामाविष्कुर्वन् सस्कृतभाषाप्रणयिजनश्रवणपथे पीयूषायते। सन्दर्भानुसार बहुत्र ग्रन्थकर्त्रा देवतान्तरस्य स्तुतिपरकाणि स्तोत्राणि न्यवेशिषत।

सस्कृतभाषाया श्रीरामकृष्णजीवनवर्णनमेकतश्चेत्, श्रीरामकृष्ण बोधामृतस्य निवेशनमन्यत.। सुवर्णस्य सुगन्धलेप एवाय श्रीरामकृष्ण चरितस्य सस्कृतपदै. वर्णनम्। 'उपमा रामकृष्णस्य' इतीय शीर्षिकापि हृदयङ्गमा। श्लोकेषु निबद्धा. परमहंससूक्तयो नृत्यन्तु समेषां जिह्वाङ्गणेषु, तिष्ठन्तु शश्वत् विदुषाङ्गणेषु च।

अन्ततः 'आविर्भवति केषाञ्चित् स्वत. सा परचेतना' इति यदुक्तं ग्रन्थकृता (पृष्ठे -204) तदेव स्मरन् 'आविर्भवति केषाञ्चित् स्वत.सा कविता सदा' इति विरमामि।

- स्वामी परमार्थानन्दः

Swami Paramarthananda

President, Ramakrishna Math

Hyderabad

FOREWORD

This book, ***Sri Paramahamsah,*** is a product of deep devotion, vast erudition, and rare poetic talent It is a unique book in Sanskrit on the life and message of Sri Ramakrishna (1836 - 1886), the great saint of Bengal, who is now adored by millions as the Prophet of the Modern Age.

Sanskrit is perhaps the only ancient language surviving to this day without losing its vitality and versatility To write in Sanskrit an epic in the classical style on the life and teachings of a modern saint is admittedly a very difficult task. But, this is precisely what Prof V.A. Sarma has accomplished in the present work A retired professor of Sanskrit at Sri Venkateswara University, Tirupati, he is eminently qualified to undertake this work.

Sri Ramakrishna's life has a universal dimension which appeals to all people, young and old, rich and poor, ignorant and learned, all over the world irrespective of the distinctions of race, religion or culture. He came with a new message for mankind. God realization as the goal of life, potential divinity of the soul, harmony of religions, service of God in man, and other teachings of his have inspired countless numbers of people Sri Ramakrishna's message which aims at the development of all that is best in the human soul, is most needed now as humanity is stepping into the Third Millennium.

The present book gives an admirable survey of the various incidents in Sri Ramakrishna's life such as his childhood pranks, unprecedented spiritual practices at Dakshineswar, spiritual experiences, meeting famous people, pilgrimages, training of disciples, and final illness. In the narration of the events, the author has avoided mythological assumptions and exaggerations. The book is the outpouring of a devout heart, tempered by skill and erudition. Felicitous expressions and alliterations abound all through the book. The basic teachings of the Master, including some of the well-known parables, have been woven into the fabric of the narrative.

This is an ideal book for teaching Sanskrit to present day youths. It is meant not only to be read but also to be recited and sung. It deserves

to be prescribed as a textbook for advanced courses in Sanskrit in our colleges and Sanskrit institutions I congratulate the author on his rendering a great service to devotees and scholars alike, and wish him success in all his noble undertakings of this kind

Let me conclude this foreword with the verse composed by Swami Vivekananda, as a tribute to Sri Ramakrishna, which is sung along with other hymns in all our Ashramas, in India and abroad, during evening *Aratrikam*

> Sthāpakāya ca dharmasya sarvadharmasvarūpine,
> Avatāravaristhāya rāmakrsnāya te namah ---

--'I salute Sri Ramakrishna who came to establish *dhrama* (not any particular *dharma,* sect, or *sampradaya* in his own name), but the embodiment of all *dharmas,* and the supreme divine incarnation.'

Belur Math
1 October 1999

Swami Ranganathananda
President
Ramakrishna Math and
Ramakrishna Mission

श्री

कनकदुर्गास्तुतिः

निःशेषं कबलीकृता हि खलु पूर्णाहन्तयानन्तया
यस्यास्तापसमुख्यसाधनजिता ज्ञानक्रियासिद्धयः ।
तां स्वान्तप्रतिबिम्बिनीं निगमवाग्देवीशिरश्चुम्बिनीं
सेवे त्वामहमन्वहं कनकदुर्गाम्बां शिवालम्बिनीम् ॥

कृष्णाविहारसततोत्सुकराजहंसीं रम्येन्द्रकीलशिखरोन्नतदुर्गराज्ञीम् ।
त्वामञ्चिता विजयवाटिकयेष्टसख्या सेवे त्रिलिङ्गजनतार्जितपुण्यराशिम् ॥

आबाल्यमेव जननीरहितो जनन्या' सवर्धितोऽहमनिशं दयया यया ते ।
मातः पदाब्जयुगले मधुपायमाने तां मय्यनन्यशरणे वितराधुनापि ॥

गात्रं सुदुर्बलमनल्परुजाभिपन्नं कर्माक्षमं च नितरामलसं प्रमत्तम् ।
प्रारब्धकर्मवशतोऽथ तवेच्छया वा कस्मात्तथापि तदिदं ध्रियतेऽधुनापि ॥

कारुण्यतस्तव पुरा समरे जयार्थी लेभे नरोऽस्त्रमिह पाशुपतं गिरीशात् ।
सप्रत्यहं भवरणे भवतीं विषण्णः शक्तिं परां विजयदुर्गपदां प्रपन्नः ॥

त्रिभिर्द्वाभ्यां चास्त्रैर्नवमुकुलरूपैर्भवरणे
निराशः सन् मारस्तव नयनतूणौ जयकरौ ।
प्रपद्याश्वस्तोऽभूदभयदकटाक्षाक्षयशरौ
तथा दुर्गे पात्रीकुरु जननि मां तादृशदृशाम् ॥

विजयकनकदुर्गे विभ्रमाकृष्टभर्गे निरवधिसुखमार्गे निर्मिताशेषसर्गे ।
प्रमथितरिपुवर्गे भक्तदत्तापवर्गे सुतमिममनुकम्पासंपदा पाहि मातः ॥

गमयेद् विमलीभावं नितान्तं वासनाविलम् ।
मातर्मे मानसं पयः प्रसादकतकं तव ॥

भवेद् दृष्टिर्ब्रह्मण्यनुभवघने दुःखनिधने
नचेदेवं मातस्तव निरुपमे रूपविभवे ।
जगद्-दृश्ये कस्मिन्नपि कनकदुर्गेऽथ निपतेत्
तदा तत्तत् सर्वं त्वगिनिधिपणाभेव कुरु मे ॥

श्री परमहंस प्रबोधः

जुष्टानिश वर्षति धर्ममेधीभूयोपदेशोक्तिसुधां नवीनाम्।
कालीपदाभोजमरन्दधारा ज्ञानामृताब्धे स्तव सुप्रभातम्॥

निरतरं सयमिभृगराज स्तवाकृति झकृतिमातनोषि।
प्राप्य प्रसादं भ्रमराबिकायास्तस्या विभूतेस्तव सुप्रभातम्॥

कालीपादांभोज ससंगभृगो ब्रह्मानन्दास्वादहृष्टान्तरङ्गः।
आचार्यस्त्वं रामकृष्णावतारो नानाधर्माचार ते सुप्रभातम्॥

जिततरतमबुद्धे निर्विकल्पानुभूते निरवधिकदयाब्धे सामरस्यस्वभाव।
परसुखचिदनन्तस्वात्म साम्राज्यसम्राड् वरद, परमहंसोत्तंस ते सुप्रभातम्॥

विश्वोत्पादस्थितिलयकरस्यादिनारायणस्य
प्रादुर्भावस्त्वमसि भगवन् रामकृष्णस्वरूपः।
बोधासारै रनुभवरसैर्जीवयामास भूयो
धर्मं यःस्वं परमतहतं तस्य ते सुप्रभातम्॥

मंदाकिन्याश्च तीरे ललितलहरिकानिस्वनत्पञ्चवट्यां
कालीपादारविन्दप्रचुरपरिमले दक्षिणेशप्रदेशे।
कालीघट्टाभिधाने विनुतपुरवरे मानसे चानघानां
संवासिन् शारदांबाहृदयकमलिनीहंस ते सुप्रभातम्॥

दृष्ट्वाऽकाशे बलाकावितितिमसितमेघावृते बद्धमालां
तल्लक्ष्म्याकृष्टभावो ह्यविशदनुपद पारवश्यात्समाधिम्।
सौन्दर्यास्वादचुंचु प्रकृतिसहृदयो योप्यभूद् बाल्य एवं
तस्मै ते रामकृष्ण, त्रिभुवनगुरवे धीमते सुप्रभातम्॥

द्रष्टुं दर्शयितुं प्रभुर्भगवतो रूप जगद्रूपत.
स्पष्टं निर्विषयं सुखं सविषयादत्यन्ततुष्टिप्रदम्।
पूर्णं ब्रह्म सशक्तिक रसतमं शुद्धस्वभावाच्च य -
स्तस्य स्वस्तिद सुप्रभातमवताराणां वरिष्ठस्य ते॥

ये मुग्धाः परमार्थ बोधविषये भीताभृशं निःस्पृहा -
स्तानज्ञानपि मादृशान् "ननु भवत्येवाधिकारो नृणाम्।
सर्वेषा" मिति सान्त्वपूर्व वचनै रानन्दयत्येव य -
स्तस्य श्रीकर सुप्रभातमुपदेष्टॄणां प्रकाण्डस्य ते॥

गणेशोऽयं महासेनो मूर्तिर्वा तदद्वयात्मिका।
सिद्धिबुद्धिप्रदा यस्मात् कालीं ब्रूते स्वमातरम्॥

वेला विज्ञानसिन्धो रवधिरगणिताध्यात्मविद्यामहिम्नां
सौशील्यापि काष्ठा विलसति परमा सामरस्यप्रतिष्ठा।
दृष्टान्तो हार्दभूमे रयमभयवरप्रार्थनादानसीमा
जीवन्मुक्ते रिहोदाहरणमभिनव रामकृष्णावतारः॥

वेलेति। अत्र उदाहरणं नाम नूतनोऽलंकार.। जीवन्मुक्तिः कीदृशीति जिज्ञासायां तस्या· श्रीरामकृष्णरूपतया उदाहरणं प्रदर्शितम्। सामान्येन उद्दिष्टानां वर्ण्यविषयाणां स्वरूपविवेकार्थं तदव्यक्ति विशेषनिर्देश उदाहरणमिति व्यवहार.; यथा मधुरपदार्थोदाहरणं शर्करेति। चमत्कारे सति तस्यालंकारत्वम्। उपोदघात उदाहार इत्यमर.। एवमत्रकाव्ये (पुटे 10-तमे) अनुभूतिचमत्कारोदाहरणानि, (30-तमे) प्राथम्योदाहरणानि द्रष्टव्यानि। अत्रपद्ये (144-पुटे च) दृष्टान्तशब्दोपि अस्मिन्नेवार्थे प्रयुक्तः।एवं (131-पुटे) निदर्शनशब्दोपि। सादृश्याद्यभावादुपमादिभ्यो विशेषः। उपमावदेव चास्य बाहुल्येन काव्येषु साक्षात्कारः संलक्ष्य.। जयोदाहरण बाह्वोरिति तु रघुवश (4- 78) पद्ये उदाहरणं प्रबन्धविशेष इति मल्लिनाथः। अतः अस्य अलकारस्य सर्वथा नूतनत्वमुपपद्यते॥

कुलदैवस्तुतिः ।
सुप्रभातम्

श्रीवेङ्कटाद्रिलहरीकमलायमान सप्ताचलोत्पलपुटीमधुपायमानम् ।
श्रीशैल पूर्णशशि लक्ष्म यदङ्घ्रियुग्म श्रीवेङ्कटेश्वरविभो तवसुप्रभातम् ॥

वेङ्कारआदिरुचितस्तवनाम्नि यद्वदोङ्कार उल्लसति वेदचतुष्टयादौ ।
वेमूरि वशभव सनुत पुण्यकीर्ते ॥ श्री वेङ्कटेश्वर ॥

कष्टार्तिनाशन सदात्मपदाश्रिताना कारुण्यसागर भवानलपीडितानाम् ।
कादम्बिनीनिचय योगिकलापिनाच ॥ श्री वेङ्कटेश्वर ॥

टङ्कार एव धनुषस्तव नाम पाप्म-सङ्घातदुष्टमृगसघपलायनाय ।
पाप भवान् कटति सार्थकनामधेय ॥ श्री वेङ्कटेश्वर ॥

ईशोऽखिलस्य जगतो मनसश्च जन्तो स्तत् त्व प्रचोदयसि यन्त्रवदेव देव ।
ब्रह्मास्मि-तत्त्वमसि - वाक्यगतैकभाव ॥ श्री वेङ्कटेश्वर ॥

श्वस्थायिनो जगति शब्दरसादि मात्रास्पर्शा सुखासुखमया परचिद्विवर्ता ।
अभ्रान्तशुद्धचितिरूप विरूप नित्य ॥ श्री वेङ्कटेश्वर ॥

रज्जूरग प्रति निभे सकले प्रपञ्चे मोहाय बालिशधिया मवकल्पमाने ।
ज्ञानाशुभिर्मनसि जगृहि भग्नमाये ॥ श्री वेङ्कटेश्वर ॥

विश्वम्भराहृदयसमित भारतेऽस्मिन्नान्ध्रोर्वरा सुकृतारशितयाविरासी ।
तत्कीर्ति सौरभतति प्रथयन् जगत्सु ॥ श्री वेङ्कटेश्वर ॥

भोग च योग मिह पाद समाश्रितेभ्यो यच्छन् क्रमेण दयसे परम पुमर्थम् ।
सतार्य ससृति नदीमिव जानुदघ्नीम् ॥ श्री वेङ्कटेश्वर ॥

तत्त्व विदुर्न विबुधा अपि तत्त्वतस्ते त्व ब्रह्मणो गुणलयस्य परा प्रतिष्ठा ।
नेतीति वाक्य विदितोऽपि च सर्वगन्ध ॥ श्री वेङ्कटेश्वर ॥

वर्णप्रकर्ष परिधानसुवर्णहार कोटीरचारुसुमनोगणमालिकाभि ।
व्यक्तीकरोषि जगता निजसश्रितत्वम् ॥ श्री वेङ्कटेश्वर ॥

सुस्वादुतीर्थविमल परिमुण्डतोऽपि भक्तो भवन्तमभिवीक्ष्य जहाति खेदम् ।
ज्ञानोदयेन खलु मोक्ष इति प्रदेष्टा ॥ श्री वेङ्कटेश्वर ॥

प्रस्थान ससदुपमर्दिदिनाति पात क्लेशान् बहून् विषहते तव दर्शनार्थी ।
जीवो यथा भवसहस्रगणान् मुमुक्षु ॥ श्री वेङ्कटेश्वर ॥

भावेस्मरन् सपदि कृच्छ्रगतो नरस्त्वा रूप्य किमप्युपनिधीयति वस्त्रखण्डे
तन्नूनमात्मविनिपेदन मग्रतस्ते ॥ श्री वेङ्कटेश्वर ॥

तन्त्रागमोक्तसमुपासन नैष्ठिकात्मा रम्याणि निर्झरवनान्यवलोकको वा ।
त्वामास्तिको भजति निष्ठुर नास्तिकश्च ॥ श्री वेङ्कटेश्वर ॥

श्रीवेङ्कटेश्वर विभो तव सुप्रभात –
मित्यक्षरक्रमसमादर बद्धभावा ।
अद्वैततत्त्वकलने च कृतप्रयत्ना
सर्वेश्वरस्तुतिरियं फलदा सदा स्यात् ॥

अर्चा-प्रपत्ती

पद्मावती वधूटी सद्मायितवक्षस भजामि हरिम् ।
नगसप्तकमूलाधाराद्यम्बुज वास मम्बुदा भासम् ॥

सप्ताद्रि शिखरोत्तसपादाब्ज वेङ्कटेश्वरम् ।
महच्चराचराधार महीसममनश्वरम् ॥ [1]

स्वरूपमण्डपावास धरणीसुस्थिरासनम् ।
निष्कल निश्चल शान्तं कूटस्थ गगनोपमम् ॥

तारकामणि विभ्राजद्विहायस वितानकम् ।
ओकार घण्टासंनादमथ वाङ्मङ्गलध्वनिम् ॥

निर्मल सर्वरसभून्मधुर जलसंमितम् ।
वीतरागादि निर्माल्य पाद्यभूतसुरापगम् ॥

चैतन्यामृतसुस्नात भक्ति चन्दन चर्चितम् ।
प्रकाशमानमनल प्रख्य तिमिर वारणम् ॥

सर्वगं सुखसस्पर्श प्राणद पवनोपमम् ।
प्रदीपरूपचन्द्रार्क चामरायितमारुतम् ॥

प्रसादछत्रमहित जगतामीश्वरेश्वरम् ।
प्राणिदु:ख सुखालाप नृत्यसगीतसविधम् ॥

---

1 महीसममित्यादिषु पचभूतमयत्वच । आसनाद्युपचारा अत्र सगृहीता ज्ञेया ।
छा – 8 5 3 अपराजिता ब्रह्मण पू । भाष्यम् – तत्रप्रभुविमित प्रभुणा निर्मित मण्डपमिति वाक्यशेष बृ 2 16 इन्द्रो वैकुण्ठोऽपराजिता सेना

क्षणक्षयि जगज्जालमहानैवेद्यतर्पितम् ।
षट्चक्रदलताम्बूल स्तवशब्दगणाक्षतम् ॥

विमलज्ञानकर्पूराखण्डनीराजनोज्ज्वलम् ।
सुवर्णमन्त्रपुष्प च विहितात्मप्रदक्षिणम् ॥

अनहतानमस्कार क्रियालोपक्षमावहम् ।
अफलाकाङ्क्षिभि· सम्यगाराधितपद शिवम् ॥

अस्तिनास्तीतिसदेह डोलारोह विनोदिनम् ।
अस्तीतिनिश्चयप्रापितै कान्त शयनोषितम् ॥

सर्वेपचारसपन्न सर्वदेवात्मक परम् ।
सर्वाम्नायार्थ सर्वस्व सर्वशब्दस्तवप्रियम् ॥

यतो वाच प्रवर्तन्ते कर्मणा मनसा सह ।
भूतजातानि सर्वाणि तमात्मान पर नुम ॥

यस्य प्रसादकिरणै रस्त याति तमोहृदि ।
कोटिसूर्य प्रभाभास तमात्मान पर नुम ॥

यस्य स्मरणमात्रेण जन्मससारवारिधौ ।
आवतति पुनर्नैव तमात्मानं पर नुम ॥

यस्यानुभवपीयूष सेकात्ताप प्रशाम्यति ।
प्राप्यते चामितानान्दस्तमात्मान पर नुम· ॥

मङ्गलम्

अनेकजन्मसप्राप्तपापसंघातनाशनम् ।
सेव हरिपदद्वन्द्व भव्यदं भववारणम् ॥

ओं तत् सत्

PREFACE

व्यासः सत्यवत्याः पुत्रो बुद्धो गौतम एव च ।
तथा परमहंसः यमनन्य ख्यातशब्दभाक् ॥

Just as Satyavati's son alone is popularly known as Vyasa, Gautama Buddha as the Buddha, Sri Rama Krishna is familiar as the Paramahamsa

Even in my childhood I used to feel excited at the very thought of Sri Rama Krishna Paramahamsa for reasons unknown Such is the magnetism of his unique personality which has revolutionized man's spiritual life and Sadhana Having reached dizzy heights of mystic experiences he was very near and accessible to the common man and average aspirant, with his message of **Paritapa** (intensive longing) for God and toleration of which his life itself is an experiment and example, inspiring us even to this day Blessed indeed are those who are dead but not gone!

I have therefore chosen to express in my own humble way my adoration to this spiritual giant of our age in the form of this poetical work in Sanskrit **"Sri Paramahamsah"** with a desire to realize myself For self-expression characterizes Self-realization, too A temple of Sri Ramakrishna in Tirupati came up by the time this work was completed A pleasant coincidence it is, personally for me

Sanskrit, apart from being the language of my profession of teaching, is a medium no less popular than any other language, and hence this work of mine is not any more difficult to follow and appreciate than any vernacular classic usually replete with Sanskrit Poetic idiom as such, irrespective of language can be appreciated by

all Languages are only its outer vestments (cf Poetic Idiom (16) from my **"Flames of Camphor"** to be published)

This poem is in accordance with the Kavya rules about Rasa, etc Vira, Adbhuta and Santa are rasas here, Bhakti pervading in Sabari saparya and stotras like Sahasranama on Para Brahman based on Srutis and harmonious with the saint's comprehensive concept of the Absolute with Its nirguna and saguna, static and dynamic aspects The plays and stotras also symbolise his sympathy for those who fall a prey to the senses on the one hand, and his uncompromising standards of discipline and austerity on the other, and are thus organic and integral in this epic **Balyalila** reflects how fine-tuned and aesthetically susceptible his mind was even at such a tender age The similes used in his teachings reveal in him a poet of high order and rare insight His life itself is a great poem more poetic than the best poetry ever conceived In addition to my new definition of poetry and figures of speech I have described some of his similes in the section **"Upama Ramakrishnasya"** in the gnomic, epigrammatic **Subhashita**-style It is these features that make this work different from a routine biography

Like Bhakti, Karma and Jnana, Poetic activity is a path to beatitude Any artistic effort for that matter finds its optimum fulfilment and gains respectable fame when directed towards the Most High

The narrative part is based on Swamy Gambhirananda's Sri Ramakrishna Jivita Charitra in Telugu For his kind permission and thankful to him, Swamy Paramarthananda, President, Sri Ramakrishna Math, Hyderabad, and the TTD, Tirupati for helping this publication materialise

– Author


Swami Chirantananda
Lecturer, Dharmaprachara Yajna
Sri Madanagopala Swami Temple
Narasapuram
W. Godavari Dist.
22-2-'70

Redirect

Dr. V. A. Sarma Garu
Lecturer in Samskrit
S.V. university College
Tirupati
A.P.

I permit you to render my Sri Ramakrishna Jivita Charitra in Sanskrit I pray wholeheartedly that Sri Ramakrishna Paramahamsa Deva gives you enough stamina and ability in this sacred task of yours Jai gurudeva

With best wishes

Chirantanananda Swamy

Narasapuram, W G Dist
dt 22-2-70

Contents

Lord Venkateswara ... i

Preface ... iv

PART - I: SADHANA

1. Beginning - ... 1
   - Why this theme ... 3
2. Manifestation ... 7
3. Childhood Sport ... 10
   - Enjoying Wonders of Nature ... 10
   - Histrionic Talent ... 12
   - The Play Sabarisaparya ... 13
4. Spiritual practices begin at Dakshineswar ... 25
   - The Yoga of Longing ... 26
   - Stotras ... 27
     - On Kumara and Ganesa ... 28
     - Siva ... 31
     - Sarvamangala ... 32
     - Krishna (as identical with Kali) ... 35
     - His Flute ... 38
     - His message of the Gita, a dilution of the Flute ... 39
     - Three Centuries on Krishna and His Grace ... 40
     - Scriptural Authority of Grace ... 61
     - Climax of Longing & The Visions of Kali and Sat-cid-ananda ... 68
     - Devotion in the form of Service to God ... 70
     - New Gayatri Ramayana ... 71

PART - II: INCARNATION PROVED, JNANA ATTAINED

1. Extraordinary Incidents ... 73
2. Marriage ... 74

3	Establishing Incarnation	77
4	Special Practices	79
	Tantric Practice	79
	Mathuranath as a caretaker	82
5	Meeting Sadhus, Chandra, Girija, etc	83
6	Identifying with Rama and Krishna through Vatsalya and Mathurabhava	87
	Mahabhava	89
7	The Practice of Jnana	90
	Initiation by Totapuri and Nirvikalpa Samadhi	91
	Parabrahmasahasranama Stotra	95
	Stotra on the Supreme Self in the form of Kali as Gayatri	114
8	In the company of the guru	118
	Lapses Beneficial	119
	Experiences during the course of Samadhis	121
9	Practice of other religions	122
10	Pilgrimage-I	125
	Trailingaswami	126
11	Pilgrimage - II	128
	Hridayaram	130
12	In the Company of Matrisri Sarada devi	131
	Sodasi Puja offered to the Goddess in the form of Saradadevi	136

PART - III. FULFILMENT OF THE PURPOSE OF INCARNATION

1	Some experiences in Sadhana and Completion	138
	About the Buddha, etc	140
	On the Schools of Vedanta	141
	All are eligible	141

2	Bereavemenent	142
3	Brahma Samaj	144
	Devandranath, Kesava Chandrasen, etc	145
4	Famous Personalities	148
	Iswara Chandra Vidyasagar, etc	150
5	Procession of the singing devotees, Aversion to Wealth	154
6	Select disciples and devotees	155
	Vivekananda	157
	Pariprasna	159
	Saktipata	165
	Brahmananda and others	167
	Household devotees	171
	Ladies	173
7	Instruction suitable to eligibility and receptivity	173
	The Ramakrishna Simile	176
8	Eventide	192
9	Display of mystic traits	195
10	Setting	196
11	Final Journey	197
	Sri Paramahamsastuti	198
	Conclusion	202
12	Appendix	
	I Sri Gayatri Paramahamsah	205
	II Sri Rama Krishna Suprabhatam	207

विषयाः

कुलदैवस्तुति — I

परिचय — IV

प्रथमो भाग. - साधना

1 उपक्रम. --- 1

कृतिप्रतिज्ञा --- 3

2 आविर्भव --- 7

3 बाल्यलीला --- 10

चमत्कारानुभूति --- 10

वेषधारणनैपुण्यम् --- 12

श्रीशबरीसपर्या --- 13

4 साधनारम्भ. --- 25

परितापयोग --- 26

स्तोत्रसाधना --- 27

स्तोत्राणामेव मुख्य साधनत्वनिरूण ---

पूर्वक सकुमारगजस्यादीना स्तुतय. --- 28

शिवस्य --- 31

सर्वमङ्गलाया --- 32

तदभिन्नस्य, कृष्णस्य --- 35

मुरारिमुरली --- 38

गीत-गीता --- 39

श्रीकृष्णसुधाशतकम् --- 40

कृष्णकृपाशतकम् -1 --- 51

कृष्णकृपाशतकम् -2 --- 60

कृपा प्रमाणम् --- 61

परितापस्य पराकाष्ठा देवीसाक्षात्कारश्च --- 68

दास्य भक्ति. --- 70

नूतन गायत्री रामायणम् --- 71

द्वितीयोभाग - अवतारत्वनिरूपण ज्ञानसिद्धश्च

1 विचित्र घटना --- 73

2. विवाहः --- 74
मनोजयप्रकारः, तन्मयत्वं च --- 76
3. अवतारत्वनिरुपणम् --- 77
भैरवी --- 77
4. साधना विशेषा. --- 79
तान्त्रिकसाधना --- 79
पर्यविक्षको मथुरानाथ --- 82
5 साधुससर्ग. --- 83
चन्द्र गिरिजादय. --- 83
6. वात्सल्य मधुरभावाभ्यां
रामकृष्णयो स्तादात्म्यम् --- 87
रामस्य --- 87
कृष्णस्य --- 88
महाभाव --- 89
7 ज्ञानसाधना --- 90
तोतापुर्यनुगृहीतो निर्विकल्पसमाधि. --- 91
सोपपत्तिकं परब्रह्मसहस्रनामोपक्रमः --- 94
सहस्रनामस्तोत्रम् --- 95
कालिकाभिन्नगायत्रीरूप – ---
परमात्मस्तुतिः --- 114
8 गुरुसान्निध्यम् --- 118
स्खलितमपि रम्यम् --- 119
साधनकालानुभवविशेषा. --- 121
समष्टिचैतन्य दृश्यम् --- 122
9. परमतानुष्ठानम् --- 122
10. तीर्थयात्रा --- 125
त्रैलिंगस्वामी --- 126
11 पुनर्यात्रा --- 128
हृदयराम. --- 130
12 मातृश्रीशारदासाहचर्यम् --- 131
षोडशीपूजा --- 136

तृतीयोभागः अवतारसख्यनिर्वाहः

1. साधनायां विशेषाः समाप्तिश्च	- - -	138
बुद्धादिषु वक्तव्यम्	- - -	140
वेदान्तगतानि	- - -	141
2 जनन्यादिवियोग.	- - -	142
3. ब्राह्मसमाज.	- - -	144
देवेन्द्रनाथकेशवचन्द्रादय.	- - -	145
विजयकृष्ण शिवनाथादय·	- - -	147
4. प्रसिद्धा. पुरुषाः	- - -	148
ईश्वरचन्द्रादयः	- - -	150
5 नगरसंकीर्तनम्	- - -	154
6 शिष्यवर्या.	- - -	155
विवेकानन्दः	- - -	157
परिप्रश्न.	- - -	159
शक्तिपातः	- - -	165
ब्रह्मानन्दादय	- - -	167
गृहस्था·	- - -	171
महिलाः	- - -	173
7. यथाधिकारमुपदेशवैचित्री	- - -	173
उपमा रामकृष्णस्य	- - -	176
8 अपरसध्या	- - -	192
9 महिम प्रदर्शनम्	- - -	195
10 अस्तमयः	- - -	196
11 महाप्रस्थानम्	- - -	197
श्रीपरमहसस्तुति·	- - -	198
उपसहार.	- - -	202
12. अनुबन्ध·		
1. श्री गायत्री परमहंस	- - -	205
2 श्रीरामकृष्णसुप्रभातम्	- - -	207

प्रथमो भागः ।

साधना

श्री परमहंसः

I. साधना

उपक्रमः

श्री गजास्य स्तुति

तनु शिवोद्वर्तनचूर्णलब्धा [1] प्राणप्रतिष्ठा गिरिशाच्च यस्य ।
ज्योति र्जगन्मङ्गल मिद्ध माद्यं नमामि तद्विघ्नहरं गजास्यम् ॥

श्री शिवस्तुतिः

प्रक्षालित हिमवता श्वशुरेण भक्त्या गौरीविवाहसमये चरितार्थभावात् ।
सेवे कृपापरिमलं शरण गताना ससारतापशमन शिव ते पदाब्जम् ॥

श्रीमदुमास्तुतिः

सर्वसपन्मयीं वन्दे सर्वविद्यात्मिकामुमाम् ।
लक्ष्मीसरस्वतीरूपा परब्रह्मोपदेशिकाम् ॥ [2]

पार्वत्याः परमेश्वराञ्चितवपुर्वल्ल्याः कपोलद्वय
धूतादर्शमुपास्महे नवनवैः कान्तिद्रवैः शोधितम् ।
यस्मिन् वक्रसुधामरीचिशकलौ तावर्धनारीशयो -
रन्योन्यप्रतिबिम्बनाद्विलसत पूर्णविपूर्णाविपि ॥

श्री शिवाद्वैतस्तुति

परस्परतपःसपत्फलभूतात्मनोः सदा ।
[3] कायेन मनसा वाचाद्वैतं हि शिवयोर्नुम ॥

श्रीरामज्योतिः

हरतु तमो मम रामज्योतिर्यन्नाम मङ्गल परमम् ।
कविकोकिलनवचूतं [4] रामायणसहिताप्रणव ः ॥

---

1 *उमाङ्गमलजो गौरीतेजोभूः –गणेशसहस्रनामस्तोत्रम् ।*

2 *केनोपनिषत् ।*

3 *कायेनेत्यादिना त्रिकरणशुद्धि रुच्यते । अपि च कायेन अर्धनारीश्वररूपेण, मनसा सेन्द्रियनिरिन्द्रिय वृत्तिरूपेण, वाचा वाच्यवाचकादिरूपया च अद्वैतमनन्यत्व प्रतिपाद्यते ।*
नूतनो ऽयमद्वैतालकारो मदुपज्ञेषु अन्यतम ।
द्रष्टव्यः XXI 1-2 उन्मेषः सस्कृतप्रतिभा – साहित्य अकाडमी 1995·p110 ff

4 *द्विहीनं प्रसवे सर्वमिति कोशात् फलपुष्पयो रेव प्रसवशब्दप्रयोग, तथापि चूतशब्देनौचित्यादत्र किसलय विवक्षितम । माघ. (10-3)*

श्रीकृष्णसुधारसायनम्

जगदाप्यायन मिष्ट कृष्णद्वैपायनर्षिणा जुष्टम् ।
वितरतु मोक्षारोग्य श्रीकृष्णसुधारसायन मधुरम ॥

श्रीकृष्णकृपानिक्षेप

धृतिरस्ति रामभद्रे स्मृतिर्मम शिवे रति   शक्तौ ।
कुहनागोपे मनसो जूति [1] कारुण्यनिक्षेपे ॥

श्री रामकृष्णावतार

अर्धनारीश्वर तत्त्व श्रुत हरिहर तथा ।
पर श्रीरामकृष्णाख्य चकास्तीद विनूतनम् ॥

अद्वैत वाञ्छतां दृष्टु रामकृष्णावतारयो ।
अभीष्ट पूरित येन रामकृष्णं तमाश्रये ॥

[2] सोहधीर्यदि चेत् परिभ्रमति ससारे, सति व्यत्यये
हसो निर्मलमानसो विहरते बन्धाद्विमुक्तो नर ।
जीवन्मुक्तवरं तथा परमहसाख्या यमेवाश्रिता
त हस परम भजामि शरण श्रीरामकृष्णाभिधम् ॥

[3] यस्मिन् रूढिरपि प्रयोगमहिता श्रीरामचन्द्रे तथा
श्रीकृष्णे परमोचिता विजयते श्रीरामकृष्णे क्रमात् ।
नित्यार्चासु विशेषत सपरमब्रह्मात्महसोक्तिगा
देव त शरणं भजामि सतत श्रीरामकृष्णाभिधम् ॥

वज्रिण्येव यथा शतक्रतुपद सर्वज्ञशब्द· शिवे
श्रीनाथे पुरुषोत्तमोक्तिरपि विख्याति परामश्नुते ।
यस्मिन्नेव तथा स्वत· परमहसाख्या प्रसिद्धि गता
त हंस परमं भजामि शरण श्रीरामकृष्णाह्वयम् ॥

कर्तृत्वं रघुवंशजे स्वयमभूत् कृष्णे तथा प्रेरणा
श्रीरामे करुणश्च नन्दतनये शान्तोऽपि मुख्यो रस· ।
साक्षित्व [4] परचिन्मयोऽपि च रसो यस्यावतारे नवे
त देव शरणं भजेमहि वयं श्रीरामकृष्णाह्वयम् ॥

---

1 *धृति· धारणा, ध्यानम् । रति भक्ति· । जूति गतिवेग ।*

2 *आत्मानात्माध्यासः ।*

3 *श्रीरामचन्द्रपर(म)ब्रह्मेति, श्रीकृष्ण परमात्मेति, श्रीरामकृष्णपरमहंस इति च परमशब्दपूर्वकब्रह्मात्महसपदगता रुढिर्यद्विषये तमित्यन्वय ।*

4 *चिदेव रस इति जगन्नाथपण्डितराज ।*

कविस्तुति

वन्दे वाल्मीकिकविता या दत्वा करुणामृतम् ।
करोति मादृशान् मर्त्यानजस्रममृताशनान ॥

कृष्णद्वैपायन नौमि यश्चक्रे भारत महत् ।
यदन्यदेव भातीद सर्व कृष्णमय जगत् ॥

नैकासु भारतीयासु भाषासु कवयश्च ये ।
रामकृष्णकथा रम्या ऊचुस्तेभ्य इद नम ॥

गुरुस्तुति

महेश योगिन वन्दे महर्षि महिमान्वितम् ।
[1] भावातीतध्यानगुरु भवरोगभिषग्वरम् ॥

कृतिप्रतिज्ञा

श्रीदक्षिणेश्वरालयवासनिरादृतहिमाद्रिकैलासाम् ।
वन्दे कालो मातर मिन्दुधरीं भक्तकल्पलताम् ॥

श्रीरामकृष्णयतिवर मभवस्य वरिष्ठमवतारम् ।
शिरसा नतो ऽस्मि तस्या विभूति मलधु च परमहस ताम् ॥

सर्वावतारसार चादर्श [2] प्रायमानवाचारम् ।
सेवे पापविदूर नमता मपवर्गदातारम् ॥

रामस्य वाथ कृष्णस्यो च्चरिते चैव नाम्नि नश्यन्ति ।
पापपटलानि किंपुन रुभयपदे रामकृष्ण इति नाम्नि ॥

बाल्ये नामग्रहणाद् व्यक्तिलयेनानुभूतेन ।
यस्य च ससर्गलव . पौर्वभव समनुमीयते हि मया ॥

विषयविषवेगशमने भवति वचो यस्य गारुडो मन्त्र ।
मूर्ति रपि तीक्ष्णदीप्ति र्मनिसतामिस्रविध्वसे ॥

यस्य शुभाभिर्वाग्भि पीयूषस्यन्दिनीभि रथ्याभि ।
मृतकल्प मम हृदय कोरकित विकसित दिष्ट्या ॥

परमतपिशाचजुष्टं परतंत्र भरतखण्डचारित्रम् ।
यस्योदयेन महता मुक्त स्वातत्र्यदीप्त च ॥

---

1 *भावातीतध्यानम्* = Transcendental Meditation

2 *Ideal अनुसरणयोग्य, प्रमाण भूत च ।*

चित्तं कर्म च वाणीं पुनाति मम यस्य सस्मृति र्विनुति· ।
भवमृत्युलताजाल लूनाति सर्व ददात्यमृतम् ॥

अभिवर्णयामि परम चित्तमलक्षालणाय हस तम् ।
सद्य-परनिर्वृतये पुनरावृत्तिप्रहाणाय ॥

कौतुकबाहुल्येन प्रणयोपचितेन चोदितश्चाहम ।
[1] स्तुतिकाव्य तस्य कथारेखाचित्र करोमि तत ॥

अनुभूतिविशेषाणामेव प्राधान्य मत्र येषा हि ।
चारुत्वात् काव्योपादानत्व परमहसस्य ॥

न पुनस्तथा [2] तदिष्ट प्रदेशकालादिविविधवर्ण्यनाम् ।
सवेद्या ये तावत्पूर्वनिबन्धेभ्य एव रचितेभ्य ॥

अत्र स्थितस्तत्र गत श्चेत्युक्तौ कवितास्ति का ।
सनिवेशस्तु भावाना मनोज्ञ· काव्यमिष्यते ॥ [3]

भावाना तादृशामेव ग्रथने यदपेक्षितम् ।
गृह्यते तावदेवात्र [4] चरितान्न तु विस्तर ॥

विलक्षण महाकाव्यं महापुरुषजीवितम् ।
आत्मानुभवसाराढ्य नोपदेशैककौतुकम् ॥

स्वभावोक्तिप्रधानं यद्ललितातिशयोक्ति च ।
अपूर्वाणामाकरोऽपि परमाद्भुतकर्मणाम् ॥

बलिना बाह्यशत्रुभ्य कामक्रोधादिवैरिणाम् ।
विध्वसनं यत्र भवेदशस्त्रास्त्रपरिग्रहम् ॥

दिव्यमानुषसभेद वीराद्भुतरसोज्ज्वलम् ।
शमादिगुणसपन्न शान्तमुख्यरसाश्रयम् ॥

---

1 स्तुतिप्रचुरम् काव्यम् । प्रकरणानुसारेणात्र काल्यादीना देवताना स्तुतिविस्तर । आलभाि दिखण्डानामन्ते च प्रायश श्रीपरमहसस्तुति श्लोका सन्ति । निस्तरोऽय स्तु॥ यथावसरम् - अथस्तुतीना प्रोक्ताना मितिश्लोके स्तोत्रसाधना प्रकरणे च । [illegible] मुपपादयिष्यते । सनिवेशविशेषा काव्यमिति च वक्ष्यते ।

2 तत प्राधान्यम् ।

3 दृष्टव्य -ममैव "साकल्यवाद" सस्कृत प्रतिभा XX-2, 1994 पृष्ट 46 प्रभृति । सनिवेश· शब्दार्थ प्रयोगविशेषरूप सदर्भ । भावा विभावादय प्रायेण काव्यावस्थाभूता वाक्यार्थरूपा । - Situations and experiences
एव प्रसिद्धाना कवीना स्वोपज्ञालकारिकसिद्धान्ता अपि "विमर्शस्तत्पदैव" इत्यस्मिन् लघुग्रन्थद्वये मदीये द्रष्टव्या ।

4 श्रीरामकृष्णचरित्रात तत्तदग्रन्थेषु द्रष्टात ।

भावनातो मुहुर्यस्य युगपल्लभ्यते बुधै ।
मोक्ष काव्यरसश्चैव सदा सद्यश्च समद ॥

लोके यशो विविधमेव धनाच्छ्रुताच्च
प्राप्य कलापरिचयादपि काव्यतश्च ।
लीलास्तवाद्भगवतोऽपि भवेत्परन्तु
तच्चोत्तरोत्तरमनिन्द्यफल प्रशस्तम् ॥

साक्षात्कृतात्मतत्त्वानां महता कीर्तनादपि ।
ध्रुवा कीर्तिर्भवत्येव शरच्चन्द्रनिभानघा ॥ [1]

एवं कलामय काव्यं रामकृष्णस्य जीवितम् ।
ज्ञानप्रपत्तियोगादिसपन्न रसनिर्भरम् ॥

काव्यभूतेन वृत्तेन तेन तस्य प्ररोचित ।
काव्य परमहसाख्यं यथारुचि यथामति ॥

निबद्धु प्रयते प्रीत्या रामकृष्णकथाश्रयम् ।
यथा गङ्गायमुनयो सगमो हृदयगम ॥

तत्त्वार्थ कवितार्थश्च सपृक्त शोभते मिथ ।
श्रीरामकृष्णचरिते सगमो रोचते स मे ॥

अजस्रमाप्लुतो यस्मिन्नात्मानं चरितार्थये ।
पवित्रभावनापूरे ज्ञाननिर्धूतकल्मष ॥

तत्त्वप्रधानवचनेष्वपि काव्यदुग्ध
तत्त्वामृत च कवितामिलितं प्रगल्भ ।
प्राप्तु विलक्षणगुण कविराजहस
साहित्यदर्शनकलानिधि रेव चाहम् ॥

वाल्मीकि रासीदव्यासश्च कवि श्रीरामकृष्णयो ।
एकस्याप्यवतारस्य महिम्नामभिवणनि ॥

का कथा मिलित यस्मिन्नवतारद्वय पुन ।
श्रीमत्परमहसस्य रामकृष्णस्य वर्णने ॥

---

1 द्र श्लो 1613, 1614

किमस्ति वस्तु लोकेस्मिन्नितश्चारुतर पुन ।
महत पुरुषस्यास्य चरितात्कवितोचितम् ॥

साक्षात्परमहसस्य विज्ञानानन्दनामभाक् ।
य शिष्यस्तस्य शिष्यस्य चिरन्तनमुने कृति ॥

याऽन्ध्रवाग्गद्यकविता-कलापे शेखरायते ।
तद्रामकृष्णचरितं मयाधारतया धृतम् ॥

यस्मिन् परमहसस्य जीवित सम्यगन्वितम् ।
ध्यायतो जाग्रतो वापि भाषमाणस्य गच्छत ॥

चिरादतीतमपि यत् प्रत्यक्षमिव वर्तते ।
छन्दोबद्धा च गैर्वाणी वाणी मम तु केवलम् ॥

[1] प्रकृतेर्वर्णन नून सपर्या शबरीकृता ।
स्तवा गणेश्वरादीनां परस्य ब्रह्मणश्च मे ॥

अथ स्तुतीना प्रोक्तानामिय सुमनसामिव ।
एकत्र ग्रथने सूत्र रामकृष्णकथास्तु मे ॥

भारते धर्मबोधस्य कथाशाद्विस्तरोऽधिक ।
काव्ये परमहसाख्ये भगवद्भिनुते स्तथा ॥

वाल्मीकिव्यासकाव्योत्थ फलं भगवतो नुति ।
येय परमहसाख्य-काव्यस्यापि प्रयोजनम् ॥

परमार्थोपलब्ध्यर्थ यत्नोऽय क्रियते मया ।
[2] कविताभ्यासयोगेन परमात्मप्रसादत ॥

यन्नामस्मृति रावहेद् दुरितसंघातक्षयं चाक्षय
यस्याकारविलोकन वितनुयाच्चेतोवधान स्यात् ।
यद्गाथारुचिरोपदेशजनिता सद्य परा निर्वृति-
स्तं हस परम भजामि शरणं श्रीरामकृष्णाभिधम् ॥

---

1 Nature - description
द्र - 3 बाल्यलीला

2 *असंयतप्राणमनायताक्षमब्रह्मचर्यानशनादिखेदम् ।*
चित्त महेशे निभृत निधातु सिद्ध कवीना कवितैव योग ॥
– नीलकण्ठदीक्षितकृत शिवलीलार्णवम् ॥

2. आविर्भावः

लोकस्थितिनिदानस्य जाते धर्मस्य विप्लवे।
यथावसरमुद्धारः पुनस्तस्य विधीयते॥

आसीदीश्वरसूनो शके [1] शताब्द्या नवद्वयमितायाम्।
वङ्गेषु हुग्लिविषये देरेपुरि भूसुरान्वयः कश्चित्॥

नाट्यरङ्गे परेशस्य जगदुद्धारताण्डवे।
निजलीलाप्रकाशार्थं यो नु तेन स्वयं वृतः॥

सज्जनारामसधाना वसन्तसमयोदयः।
भक्तकेकिसमुल्लासप्रालिम्बिघनसंचयः॥

रामनामरसावालो दयारसफलोद्गमः।
कल्पद्रुमश्चाश्रितानां पुष्पितः शीलसंपदा॥

सोऽयमाजन्मशुद्धानां सतत्यै गृहमेधिनाम्।
दैवचिन्ताकृतार्थानामार्जवालंकृतात्मनाम्॥

चट्टोपाध्यायाभिधाना मभवत्प्रभवः सताम्।
तेषामभून्मणिप्रख्यो गुणानां मणिदर्पणः॥

माणिक्यारामाभिधानो रामचन्द्रेष्टदैवतः।
जनप्रीतिकरः सोऽभूद् रामो दाशरथिर्यथा॥

तस्याभवस्त्रयः पुत्रा रामशीलेति पुत्रिका।
ज्येष्ठश्च खुदिरामाख्यो भ्रातॄणां समवर्तत॥

बाल्य एव वियुक्तः सन् पित्रा दिवमुपेयुषा।
कुटुम्बभारमवहद् दैवं को वातिलङ्घयेत्॥

स आसीच्छीलसंपन्नः सदाचारपरायणः।
विपद्युद्वेगरहितः संपत्सु विगतस्पृहः॥

रामभक्तिपरो नित्यं कपिराडिव मारुतिः।
सर्वधर्मान् परित्यज्य रामैकशरणः सुखी॥

विधियमानः रामेण योगक्षेममुपाददात्।
सद्गुणैः परमोदारैः पिता येनात्यरिच्यत॥

पिता श्रीरामकृष्णस्य भाग्यवान् योगिनां प्रभोः।
अनुरूपोनुरूपस्य शुकस्य व्यासवन्मुने॥

---

1 Christian era 18th century

स्वतः परमहसेन निजपुत्रेण सनुत ।
कालान्तरे प्रसंगाच्च हर्षसफुल्लचेतसा ॥

"पिता मे ह्यनयत्कालं पूजाभि कीर्तनैर्जपै ।
दृढाङ्गो रूपसपन्न कान्तिमान् प्राशुविग्रह ॥

ब्राह्मतेजः सुमधुर देहबद्धमिव स्थितः ।
संध्यावन्दनवेलायामेकाग्रमनसा ह्ययम् ॥

सात्त्विकभावसमुद्रेकात्पाटलोरस्कता मगात् ।
अनुभावप्रकर्षाच्च ऋषिभावेन मान्यते ॥

प्रत्युद्गतो जनैर्ग्रामे दर्शने सचर"न्निति ।
सोऽपि चन्द्रमणीदेवीमुवाहेन्दुनिभाननाम् ॥

[1] द्वितीयामद्वितीया च सौशील्यगुणसंपदि ।
शारदां परमेष्ठीव रमामिव गदाधरः । ।

उमामिव महादेवो वसिष्ठोरुन्धतीमिव ।
निर्व्याजस्वच्छहृदया मन्नपूर्णा मिवापराम् ॥

सदान्नदाननिरता सर्वभूतहिते रताम् ।
तौ दम्पती शुभाचारा वनुकूलौ परस्परम् ॥

तयो रजायत ज्येष्ठ कुमारसदृशो धियि ।
पुत्रो रामकुमाराख्य पुत्री कात्यायनीति च ॥

अनुद्वेगकरे ताभ्यां याप्यमानेऽपि जीविते ।
आकस्मिको विपर्यासो दुष्प्रसह्योन्वभूयत ॥

निकषोऽग्निशिखाभश्चेद् वीतदोषेषु पात्यते ।
दीप्यते तेन शीलस्य स्वर्णस्येव महार्घता ॥

देरेपुराग्रहारस्य स्वामी कश्चिद् दुराशयः ।
नामसौन्दर्यविध्वसी रामानन्दाभिधोऽभवत् ॥

स तेन हृतसर्वस्वो ययौ कामारिपुष्करम् ।
[2] तत्राश्रयप्रदानेन सुखलालेन चादृतः ॥

---

1. *1799 A.D. द्वितीयेय तस्य भार्या। प्रथमा बाल्य एव दिवगता रा जी (श्रीरामकृष्ण जीवितचरित्रम् - चिरन्तनानन्दकृतम्) पुट 4.*
2. *1814 A D सुखलालगोस्वामिना। रा जी पुट 6*

ततो रामेश्वरक्षेत्रदर्शना त्तनयो ऽभवत् ।
[1] नाम्ना रामेश्वरश्चेति रामलिङ्गप्रसादत ॥

रामसालग्रामशिला पूजिता तेन भक्तित ।
स्वप्नोद्दिष्टविधानेन शीतलापीष्टदेवता ॥

पश्चाद् गया गत स्वप्ने पूर्वपुण्यफलोदयम् ।
जनकत्व महात्मासौ विष्णुना स्वयमर्थित ॥

एव दैव प्रपन्नाना चट्टोपाध्यायवशिनाम् ।
बभूव बालक कश्चिदन्वये महिमान्विते ॥

उद्यद्भास्करसकाशो निशान्ते जगता मुदे ।
वत्सरे षट्त्रिंशदधिकाष्टादशशताकिते ॥ [2]

ईशपुत्रशके शुक्लद्वितीयाया च फाल्गुने ।
महनीये मन्मथाख्ये महाविष्णुप्रसादत ॥

पौत्रो माणिक्यरामस्य गुणरत्नमहोदधे ।
पुत्र प्रिय· कनिष्ठश्च पितु सुकृतशेवधिः ॥

गदाधरविभूतिश्च खुदिरामस्य चौरस· ।
आनन्दग्रन्थिरम्बाया भागधेय सता भुवि ॥

कुर्वन्नास्तिकता महोद्यमपिशाचोज्जृम्भण निष्फल
जातं पुण्यफल सतां, भरतभूसौभाग्यसपत्फलम् ।
पित्रो स्वप्नशतप्रकल्पितफल तीव्रैस्तपोभिर्वृत
सेवे जाड्यहर गदाधरपदख्यात मह· किञ्चन ॥

जातो यो नवबालभास्कर इवाप्राच्यप्रभावान्धका –
राक्रान्त निजधर्मबोधकिरणैरुद्दीपयन् भारतम् ।
उल्लासं जनयन् स्वधर्मगहने कर्तव्यमूढात्मना [3]
त हस परमं भजामि शरणं श्रीरामकृष्णाभिधम् ॥

---

1 1826 A D रा जी पुट 12 रामकृतशिवलिगप्रतिष्ठा यद्यपि वाल्मीकिना न वर्णिता, तथापि आनन्दरामायणपाद्मपुरणादिभ्योऽवगन्तव्या ।

2. 18 2 1836 बुधवासर उदये = 5-15 होरायाम् । तस्यानुजाप्यस्तिसर्वमगलेति ।

*3 सदाचारपरायणेष्वपि अध्यात्मविषये इतिकर्तव्यतावेदिनो विरला एवेत्यर्थ ।
गीता, II - 7, VII - 38*

3. बाल्यलीला

जातमात्रस्य पुष्पस्य जायते सौरभं यथा।
शिशोर्गदाधरस्यासंस्तथा रम्यानुभूतयः॥[1]

दृश्यं दृष्ट्वा किञ्चनापि श्रव्यं श्रुत्वा मनोहरम्।
भवन्मुहुः समाधिस्थो बालकोऽयं यदृच्छया॥

विविधान् विस्मयकरान् प्रायो जाग्रद्दशास्वपि।
अनुभूतिचमत्कारान् वक्ष्यमाणानवाप्नुयात्॥

चमत्कारानुभूति

अभ्रंकषं घनतरं द्रुममप्रधृष्य
मुन्मस्तकं मृदुलबालतृणं च दभ्रम्।
दृष्ट्वा परस्परसमीपसहप्ररोह
मुत्कन्धरीभवति कापि चमत्कृतिर्मे॥

संसक्तमेदुरघनाघन कालिमान
मच्छाच्छ केरवसखोज्जवलशुल्किमानम्।
दृष्ट्वा परस्परसमीपसहाभिहार
धीर्मे चमत्कृतिनभोऽग्रविहारमेति॥ 101

वृष्ट्यम्बुवार्धि - जलपात - नदी नदाद्यै -
र्नूनं प्रभृत मुदकं भुवि पार्थिवाशात्।
दृष्ट्वा तथाप्यनुदिनं धरणीममग्ना
मुद्गाति चेतसि चमत्कृतिभूमिका मे॥[2]

अत्यर्कचन्द्रपरिमाणमहांसि तेजो -
बिम्बानि सन्ति वियतीति वदन्ति विज्ञाः।
दृष्ट्वा तथापि तिमिरं बहुलं निशासु[3]
जागर्ति चेतसि चमत्कृतिचञ्चला मे॥

[4] रामो विदेहतनया विजहौ यशोऽर्थी
जग्राह तत्कनकविग्रहमेव यागे।

---

1. *The Gospel of Sri Ramakrishna II p 933*
2. *Mahabharata, Santi, p 372, 206 - 10*
3. *Olber's Paradox*
4. *अचेतनवस्तुस्वरूपमुक्त्वा चेतनप्रवृत्तिविशेषान् वर्णयति।*

[illegible] विविध
चित्ते [illegible] कापि चमत्कृतिर्मे ॥

[illegible] इत्यभिधा [illegible]
[illegible]
[illegible] कृत [illegible]
धीर्मे चमत्कृति [illegible] ॥

ब्रह्मानुभूति [illegible] विनीतता [illegible]
दारिद्र्यभारविकलस्य च दातृता [illegible]
दृष्ट्वाश्रयाश्रितविलक्षणवैपरीत्य
चित्ते परिस्फुरति कापि चमत्कृतिर्मे ॥

विलोक्य रात्रिवेलासु प्रकृते रामणीयकम ।
वर्षासु च प्रहृष्टात्मा स आश्चर्यवशोऽभवत् ॥

प्राची

गिरिस्तनोपरिलसत्पूर्णचन्द्रमुखप्रभा ।
प्राचीदिगङ्गना सेय मिथ्यामध्या विराजते ॥[1]

शशी

सतारक शशी व्योम्नि समन्ताल्लग्नबिन्दुकम् ।
भातीन्द्रमणिपात्रस्थ पीतशेषमिवामृतम् ॥

शर्वरी

वियद्वितानै विमले विनीले ज्योतिर्मया भान्ति विलोलगोला ।
वसुन्धराप्रेङ्ख निवेशिताना विनोदना प्राणिकिशोरकाणाम् ॥

आन्दोलयन्ती महती च डोला माचालयन्ती कमनीयगोलान् ।
अव्यक्तगान च समालपन्ती प्रस्वापयत्यर्भकबृन्द मम्बा ॥

अनर्थवाञ्छापरिखिन्नचित्ता इतस्तत सभ्रमतश्चरित्वा ।
स्वपन्ति निद्राबलमीलिताक्षा निशम्यगीत शिशवो जनन्या ॥

वात्सल्यपीयूषभरैस्तदीयै र्मन्दै कटाक्षैर्बहुमान्यमाना ।
तस्या. करस्पर्शमुदातिदृप्ता सुप्ता. सुख निश्चलगात्रचेष्टा ॥

---

1 *नूतनोयं मिथ्यालकार । मदुपज्ञम् ।*

अनिन्दित शान्तिसुखालवाल चकास्ति सौन्दर्य मिद प्रसन्नम्।
यदीक्ष्य तस्यापि निदानभूत परात्परधाम विचिन्तयेम ॥

हन्त पश्यत सौभाग्य मेतस्या शर्वरीश्रिय ।
यदासेचनक दृष्टे फल चक्षुष्मता महत् ॥

वर्षा

नीलोत्पलवनश्यामघनराजिसमीङ्गाम्।
बलाकापङ्क्तिमालोक्य चमत्कृतिरुदति मे ॥

जलच्छन्नप्रदेशेषु स्थूलशीकरघट्टनात्।
उद्यद्भिर्बुद्बुदव्रातै र्मुहु पुष्पचितेव भू ॥

चञ्चलेष्वार्द्रपत्रेषु बिम्बितैरर्करश्मिभि ।
[1] निमेषोन्मेषगैर्दीपै र्वैद्युतैर्नु वृता द्रुमा ॥

वेषधारणनैपुण्यम्

कदाप्येष वधूवेषो योषाभि· प्रतिवेशिन ।[2]
सलप्यालक्षितस्तेन चमत्कारमदर्शयत् ॥

असूर्यपश्यतायामप्यरुचि च तथात्मन ।
शिववेषधर क्वापि कृष्णवेषधर· क्वचित् ॥

[3] पात्रेषु **तन्मयो** भूत्वा बालको नाटकादिषु।
रञ्जयन् **प्रेक्षकान्** सर्वान् स तेषामभवत्प्रिय ॥

श्रीशबरीसपर्याख्य उत्प्रेक्ष्ये प्रेक्षणीयके।[4]
रामस्य भूमिका तेन धृतान्यैर्बालकै सह ॥

येन पश्चात् कालिकायै श्रद्धयापि निवेदितम्।
नैवेद्य स्वयमास्वाद्य शबरीवदशङ्कितम् ॥

श्रीराम-कृष्णाभिनये किमाश्चर्य महात्मन ।
निरुपयिष्यते यस्य रामकृष्णत्वमेव हि।

---

1 Blinking serial bulbs

2 *दुर्गादासनाम्न रा जी. पुट 42*

3 *अनुकार्येषु शिवादिषु भूमिका विशेषेषु।*

4 *गदाधरस्य नटनकौशलप्रशसार्थमिवेदम्। अत उत्प्रेक्ष्य वस्तुतस्तु न पदर्शितम्। ग्रन्थस्यास्य काव्यरूपत्वान्मिश्रेतिवृत्तस्याभ्युपगतत्वादित्यदोष ।*

सूत्रधार - स्वप्राप्तिसाधनतयाऽत्र मनुष्यलोके
वृत्तिं द्वयीं समुपकल्पितवान् प्रभुर्य ।
अर्थोपभोगरहिता सहिता च तेन
वन्दे तमिष्टफलद परमात्मसञ्ज्ञम् ॥

मारिष - (उपगम्य) किमित्यार्येणाधुना अपराह्ने दैवस्मरण क्रियते? किमद्यावधि उदर न पूरितम् ?

सूत्र- (त विलोक्य दरहासेन) आगम्यता, बुभुक्षा मा कबळयति। अशनाय किञ्चिदस्ति वा न वेति गृहिणीं मे तावत् पृच्छामि। (नेपथ्याभिमुखमवलोक्य, सादरम्) आर्ये इतस्तावत्।

नटी - (आगम्य) इयमस्मि।

सूत्र - अशितु किमप्यस्ति वा ? बुभुक्षितोऽस्मि।

नटी - (सवैलक्ष्यम्) इत पूर्वमेव अविदितभवदागमनवेलया अपत्येभ्य फलहार[1] दत्त्वा मयाऽपि किञ्चिद् भुक्तम्। सर्वमवसितप्रायमिति मन्ये। यदि किञ्चिदवशिष्ट भवेदिति गत्वा द्रष्टव्यम्।

सूत्र - (सक्रोधम्) कथ भर्तार मामप्रतीक्ष्यैव भुक्त त्वया ? तव च यदुच्छिष्ट[2] तन्मया भोक्तव्यम्।

नटी - (सविस्मय) अहो दुरभिमान, विज्ञापितमेव भवदागमनवेला न विदितपूर्वेति। कथमुच्छिष्टम् ? अन्यथा कथमस्मिन् अकाले तव बभुक्षा उपशाम्यति ? उच्छिष्टमेव वा भवतु मायामानुषवेषायैव श्रीरामचन्द्रपरब्रह्मणे चर्वितपूर्वाण्यपि फलानि शबर्या भक्त्युपहतानि। यथोक्त पाद्मे -

फलानि च सुपक्वानि मूलानि मधुराणि च।
स्वयमास्वाद्य माधुर्य परीक्ष्य परिभक्ष्य च॥
पश्चान्निवेदयामास राघवाभ्या दृढव्रता॥ इति।

सूत्र - (प्रसन्नमुखेन अनुमोदमान) किञ्च उदरहेतोरपि भगवदर्पणबुद्ध्या अद्यमान तदनुग्रहकारण भवति। एवं हि शिष्टै समाम्नायते -

---

1 आन्ध्रभाषाया फलहारशब्द व्यवहारे अल्पाहारार्थक प्रयुज्यते। तथापि फलाहार इति भाव्ये फलहार इति प्रयोग वर्णलोपन्यायेन स्वीकरणीय।

2 फेला भुक्तसमुज्झितम् - अमर।

[illegible] गिरिजा मति परिजना प्राणा शरीर गृह
[illegible] पभोगरचना निद्रा समाधिस्थिति ।
[illegible] प्रदक्षिणविधि स्तोत्राणि सर्वा गिरो
[illegible] तत्तदखिल शम्भो तवाराधनम् ॥

[illegible] सकलमपि मुद्राविरचना
[illegible] ण्यक्रमणमशनाद्याहुतिविधि ।
प्रणा[illegible] सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ॥" इति ।

किं पुनरिष्टदेवनिवेदित मुच्छिष्ट वा अन्यद्वा ? हन्त, महती मे विस्मृति क्षुधार्तस्य । सम्यगनुबोधितोऽस्मि भवत्या यदस्मिन्नेव सायाह्ने कविराजहसप्रणीत [1] श्रीशबरीसपर्याख्य रूपक प्रयोक्तव्यम् ।

तदर्थमेवाय मारिषोऽप्यागत । मया त्वन्यत्र कार्यतश्चिरयता कृतश्चेयान् कालविक्षेप । तदेहि गच्छाम । अपि च --

हतोऽहमनया वाचा तव युक्तिप्रसिद्धया ।
यथाय सानुगो राम शबर्या भक्तिसम्पदा ॥
(सर्वे निष्क्रान्ता) इति प्रस्तावना

(श्रीरामलक्ष्मणौ मतङ्गाश्रममार्गेण प्रविशत)
श्रीराम – (सौमित्रिमवलोक्य)

पश्य लक्ष्मण मन्येऽह पुरतो दृश्यतेऽनघ ।
अयमेवाश्रमश्रेष्ठो मतङ्गस्य महामुने ॥

पम्पासरस्सनाथश्च बहुपुष्पितपादप ।
धूतपापकदम्बेन कबन्धेनोपवर्णित ॥

लक्ष्मण – (पश्यन्) नूनमयमेव स ।

(अत्मगतम्) प्रिय यदग्रजस्य सीताविरहकर्शित मन किञ्चिदिवावर्जयितु शक्नोति पम्पासरस्तरङ्गान्दोलितेन फुल्लकुसुमसौरभवासितेन च मन्दमारुतेन सुभगोऽय वनोद्देश । कबन्धेन कथित सत्यमेव ।

सायाह्ने विचरन् राम पादपान् पुष्पशोभितान् ।
शीघ्रोदकं च पम्पाया दृष्ट्वा शोकं विहास्यसि ॥ इति

1 केनापि कविना प्रणीतमित्यपि ध्वन्यते । अतो न कालं विरोध कर्तृत्वविचारे ।

(नेपथ्ये)

वनदेवता - (परस्परम्) इमो तौ श्रीरामलक्ष्मणौ सिद्धशबरीमनुग्रहीतु मतङ्गाश्रमस्थान प्रविशत -

विदेहजान्वेषणयुक्तचित्तो तदर्थमेवात्र वने भ्रमन्तौ।
कबन्धनिर्दिष्टपथावतारो निजा प्रपन्ना शबरीं दिदृक्षू।।

तस्या कुटीर प्रति गन्तुकामौ भक्तानुरागव्यसनौ दयालू।
जनु पवित्रीकृतभानुवशा विमौ सुमित्रातनयश्च राम ।।

सरोजबन्धुप्रतिमानतेजसौ जटाकलापानुमितर्षिवर्तनौ।
तथापि कोदण्डनिषङ्गशोभितो वसन्तकामाविव देहधारिणौ।।

घनश्यामो रामो धवलवपुषाऽस्याप्यवरजो-
ह्यरण्यामेतस्या सकुतुकमटन्तो जनयत ।
अपूर्व साहित्य कुवलयसिताम्भोजमहसो-
र्व्यवस्थाराहित्यादधिकतररामण्यकमयम्।।

(श्रीरामलक्ष्मणावुद्दिश्य प्रकाशम्) स्वागत श्रीरामभद्राय सलक्ष्मणाय।
श्रीरामलक्ष्मणौ -हन्त, वनदेवता स्वागत व्याहरन्ति। (नेपथ्याभिमुख) अनुगृहीतौ स्व ।

श्रीराम - (पम्पातीरमुपगम्य, निध्यायन्)
पश्य लक्ष्मण सश्रित्य पम्पाया पश्चिम तटम्।
विराजन्तीं वनान्तस्य शोभा नयनहारिणीम्।।

परस्पर परिष्वक्तशाखाभिस्तरुराजिभि ।
महाद्रुपाग्रससक्तशिखरैश्च गिरिव्रजै ।।

गवाक्षिता दिश सर्वा राजन्ते सौधकुड्यवत् ।
अभ्रशा समतीर्था च पम्पा सञ्जातवालुका।।

अशर्कराकर्कशा च हरति प्रसभ मन.।
अशैवल प्रसन्न च सलिल स्वादुशीतलम्।।

चूतान् कुसुमितान् पश्य कूजत्पिकगणाकुलान।
असमीपगत चापि वसन्त ह्वयतोऽथवा।।

सर्वकामफला वृक्षा पुष्पिताश्च मधुस्रवा.।
सन्ति सर्वेऽत्र ऋतवो यथा चैत्ररथे वने।।

पर दृष्ट्वा त्विमा पुण्या शोभमाना वनस्थलीम्।
स्मारितोऽह प्रिया सीता पुष्पाभरणभूषिताम्।।

पत्र पुष्प फल तोय रमणीय खग मृगम्।
सीतावचनसरम्भात् समानीत त्वया मुदा॥

चित्रकूटे पञ्चवटचा चासौ सोन्दर्यलालसा।
दृष्ट्वा ममापि वैदेही दिशन्ती प्रत्यनन्दयत्॥

गङ्गास्रोत परिसरभुवश्चित्रकूटस्य पार्श्वे
गोदावर्यास्तट इव च ते पञ्चवटचा प्रदेशा।
पम्पारण्य रमयति मन किन्तु लोपोपि शोभा-
भोगस्यास्ति स्फुट इह यतो जानकी नोपलभ्या॥ [1]

(जानकीं स्मरन्)

स्यादस्ति कुचसबन्धात् सौक्ष्म्यान्नास्तीति धीपदम्।
मत्तकाशिनि मध्य ते याति स्याद्वादलक्ष्यताम्॥

स्निग्धपक्ष्मान्तरालक्ष्यरुचिरप्रसरोदया। [2]
क्षणभङ्गरहस्य ते कलयन्ति दृगञ्चला॥

करोषि यान् प्रिये रोषमानादीन् मय्यनागसि।
ते प्रतीत्यसमुत्पादा ननु रागतरङ्गिता॥

धाता यथापूर्व मिद विचित्र प्रकल्प्य विश्व न जगाम तृप्तिम्।
ततःसृजानीति चकार सृष्टि विदेहजारूपमयी मपूर्वाम्॥

यद्-दृकशक्ते र्विवर्तो हि दृष्टू रागमय जगत्।
नौमि तत् प्रेयसीरूप ब्रह्म लोचनगोचरम्॥

(लक्ष्मणमुद्दिश्य)

अयि लक्ष्मण चित्त मे जानकीविप्रयोगत.।
बौद्धमाद्रियते तत्त्व शून्यमेवावलम्बनम्॥ [3]

लक्ष्मण.- (आत्मगत) धिक् कष्टम्।
सर्वथापि तु चिन्तैनं न जहाति वियोगजा।

---

1. *अनुपलब्धिरत्रालकारविशेषो नूतनो मदुपज्ञम्। यथाशास्त्रमेव लक्षणम्। अभावानुभवासाधारण कारणमनुपलब्धिरिति वेदान्त परिभाषा। शोभाभोगस्य उपलब्धपूर्वस्य अधुनात्राभावो वेद्यते। चमत्कारजनकत्वादस्य प्रमाणाद्भेद, अलकारता च।*
2. *प्रसरस्तु विसर्पणम्, प्रसरप्रणयौ समौ इति चामरः। भागव X 39-22 क्षणभगसौहृद.*
3. *एषु षदस्वपि पद्येषु जैनबौद्धमीमांसाद्वैतदर्शनन्यायमूला नूतना अलकारा क्रमश स्याद्वादक्षणभङ्ग प्रतीत्यसमुत्पादापूर्वविवर्तशून्याख्या ज्ञेया। द्रष्ट संस्कृतप्रतिभा XXI - 2 उन्मेष, साहित्य अकाडमी, 1995, p 110 ff*

अथवा अहमेव कठिनहृदय। सर्वेऽय प्रकृतिरपि स्थावरात्मिका अस्य दुःखेन दुःखितैव। अत्र तावत्

इद नीलघनाभोग दूरवर्षन्नवाम्बुदम्॥
आर्यशोकोदयद्बाष्पकलुष दृश्यते नभ।

भवतु -

दृष्टिमस्यान्यतो नेतु यतिष्येऽह यथामति॥

(प्रकाशम) अग्रज, इतो दृश्यता - दर्शनीयोऽयमाश्रमकुटीरनिवेश। उच्चावचप्रगेहेऽपि काननेऽस्मिन प्रस्रवणसुभगे गिरिसानौ यथाप्रदेश रोपिताभिश्चित्र पुष्पलताभि सनाथैर्निकुञ्जैश्च, चतुरश्रशोभिनीभिर्वृक्षवाटिकाभिश्च, बालपादप लेखारुचिरपार्श्वाभिर्वीथिकाभिश्च परिगतेनोपवनेन विलसित कलास्फूर्त्या चित्रगत इवालक्ष्यत। मन्ये आवा शबर्या पर्णशाला प्राप्तौ।

श्रीराम - (विलोक्य सानन्दम्) सोमित्रे, सम्यग्वर्णित त्वया।
(उभौ पर्णशालासमीप गच्छत। नेपथ्ये शबरी गायति)

शबरी - शरण भव जनरञ्जन।
सीतानाथ निरञ्जन॥ शरणम्

कौसल्या प्रियनन्दन। भक्तावन हरिचन्दन।
सकीर्तयेऽह श्रीराम। जगन्मङ्गल तव नाम॥ शर

भासि हृदय योगिनाम् यासि च धुरि वियोगिनाम्।
महती करुणा स्त्रीकृते एहि सप्रति मम कृते॥ शर

देहि मे तव दर्शनम् पावन भवकर्शनम्।
चरणपद्मामरन्दधारास्फुरित मन्दाकिनीपूर॥ शर

निजपादरज परिपूततपोधनकुञ्जरदारमुदारहृदम्।
कृतकेकयराजसुतावचन करुणानिलय कलये सततम्॥

वरभास्करकुलवारिधिशशिन शशिवदनम्।
मृदुशैशववचनामृतपरितोषितजनकम्।
वसुधाप्रियतनयाभृशविरहाकुलहृदय
शरखण्डितखरदूषणमनिश हृदि कलये॥

लक्ष्मण - (राममुद्दिश्य) कुटीरान्त गीतध्वनिरिवायाति। शबर्या गायन्त्या भवितव्यम।
कण्ठस्वर पटीयान् श्रूयते। किन्तु सा वृद्धेति किल श्रुतम्?

श्रीराम - अस्या योगप्रभावादेव स्यात्। (एव भाषमाणौ तौ पर्णशाला बहिर्द्वारसमीपमागच्छत)

लक्ष्मण - जलसेकमसृणा रङ्गवल्लिकालकृतेय द्वारभूमि ।

श्रीराम - वृक्षपर्णै नीरन्ध्राच्छादितोपरिभागा हरितचूतदळमालामण्डिततोरण सुसम्मृष्टतला बद्धकटा च राजते पर्णशाला।

लक्ष्मण - प्रशान्तपरिसरा च विविक्तान्तर्णिलया।

श्रीराम - प्रायेण ध्यानमनुतिष्ठति शबरी। (उभौ आन्तर कवाटदेश प्रविशत)

लक्ष्मण - (शबरीं दृष्ट्वा राममुद्दिश्य)

इय सा सिद्धशबरी वृद्धा च चिरजीविनी।
विनिवृत्तेन्द्रियोद्योगा ध्यानान्तर्मुखमानसा ॥
(शबरी शनै लोचने उन्मीलयति)

श्रीराम - (जनान्तिकम्) सौमित्रे।

सरोजिनी कुट्मलिताम्बुजापि
यथा प्रभाते भजते विकासम।
तथा निमीलन्नयनापि चेयम्
केनापि बोधेन विबुद्धनेत्रा ॥

लक्ष्मण - (जनान्तिकम्) तवागमनेनैव अन्तर्बोधवती नेत्रे उन्मीलितवती।

शबरी - (श्रीराम प्रेक्ष्य आत्मगतम्) अहो, इत पूर्वमेव ध्यानसमये अन्तश्चक्षुर्गोचरो नीलमेघश्यामलोऽयमुन्मीलितनेत्राया अपि पुरस्ताद्दृश्यते। किमयमपि योगकृत साक्षात्कार.? अथवा सत्यमेवागतो राम सलक्ष्मण इमा मे पर्णशालाम्? भवतु पृच्छामि। (सानन्दमुत्थाय प्रकाशम्) कौ युवा पुरुषर्षभौ?

लक्ष्मण - अयोध्यावासिनावावा कार्येण वनगोचरौ।
श्रीरामोय दाशरथि कौसल्यानन्दवर्धन ॥
शरणागतसन्त्राण सीतानाथो ममाग्रज.।
(इति श्रीराम दर्शयति)

श्रीराम - अमु जानीहि सौमित्रि मम प्रियतमानुजम् ॥
(इति लक्ष्मण दर्शयति)

शबरी - (स्वगतम्)
सत्यमेवागतो राम, हृता सीतेति मे श्रुतम्।
(क्षणकाल चिन्तामनुभूय, प्रकाशम्) प्रिय मे
येऽधुना दिवमारूढा याश्चाह पर्यचारिषम् ॥

येषा प्रसादलब्धश्च ममाय ध्यानसविधि ।
मतङ्गवनवासैस्तैरुक्ताहमृषिभि पुरा ॥

"आगमिष्यति ते राम सुपुण्यमिममाश्रमम् ।
स ते प्रतिग्रहीतव्य. सौमित्रिसहितोऽतिथि ॥
त च दृष्ट्वा वरान् लोकानक्षयास्त्व गमिष्यसि ॥"

इति। (कतिपयान् क्षणान् राम पश्यन्ती शबरी ध्यानमातिष्ठति)

लक्ष्मण·- (स्वगतम्) अहो समाधिसौलभ्य शबर्या
राम दृष्ट्वा पुनरपि महानन्दसान्द्र मनोऽस्या.
कण्ठो रुद्धो नयनयुगल मोदबाष्पाम्बुपूर्णम् ।
गात्र चैतच्चलनरहित व्यक्तरोमाञ्चजाल
प्राणायामस्तिमितकरणारूढयोगेव चैषा ॥

(शबरी पुन सज्ञा लब्ध्वा श्रीरामपादयो पतति। तत पाद्यादिक च यथाविधि समर्पयति। तदेतत् सर्व लक्ष्मण. स्वगतेन वर्णयति।)

मुहूर्तमेवमास्थाय तत. स्वप्नादिवोत्थिता ।
सहर्ष रामचन्द्राय साष्टाङ्गमकरोन्नम ॥
नयनसमुदितानन्दाश्रुभिस्तस्य पादौ
पुनरपि कलशस्थैरम्बुभिर्मार्जयित्वा ।
तदमृतपृषतै सप्रोक्ष्य च स्वोत्तमाङ्ग
धृतनिजवसनेन क्लिन्नता चापनिन्ये ॥
त्वरयाथ ददौ पीठ पलाशादिविनिर्मितम् ।
तस्मिश्चापि सुखासीनो राम सिहासनोचित ॥
प्रत्यह देवतार्चाया क्लृप्तैरारामसभवै ।
नानाविधैश्च कुसुमै राम सपूजितस्तया ॥

शबरी - (राममुद्दिश्य) श्रीरामचन्द्र!
मया तु विविध वन्य सञ्चित पुरुषर्षभ ।
फल मूल च सुस्वादु पम्पायास्तीरसभवम् ॥
किञ्चित्किञ्चित्तदास्वाद्य विज्ञाय रसमाधुरीम् ।
ततस्तेऽह प्रदास्यामि मा भूद्विरसभक्षणम् ॥

तथैव कृत्वा निवेदयति।

लक्ष्मण.- (आत्मगतम्) अहो भक्त्युद्रेकात् सदाचारोऽनया उल्लंघित । धिगेतामसमीक्ष्यकारिणीम् ।

श्रीराम - (फलानि स्वीकृत्य अश्नन् शबरीमुद्दिश्य)

फलानीमानि ते साध्वि प्रकृत्या ग्गजन्त्यपि।
कृतान्यधिकमाधुर्याण्यास्वाद्य निहितानि ग।।

(तदानीं शवरी रामस्य [1] विश्वरूप पश्यन्ती पग्म विस्मय सन्तोष च भजते।)

लक्ष्मण –(आत्मगतम्) इद पुनर्गतिविपरीत यदग्रजेनाभिहितम्। अथवा

यद् यद् दत्त प्रपन्नेन पग्हिार्यमसम्मतम्।
तत्तद् गृह्णाति भगवान परिग्राह्यमिव प्रियम।।

तथाप्यय धर्मसन्देहो न निवर्तत-कथ राम उच्छिष्टाहार स्वीकृतवानिति। भवतु मार्गमध्ये पृच्छामि।

शबरी – (राम स्तौति)

सकलभुवनरक्षादक्षसर्वान्तरात्मन्
निगमविनुत शोरे द्वन्द्वजालातिदूर।
मयि हि करुणयैवागम्य चात्र प्रपूता
मसि किल कृतवास्त्व मामिमा पर्णशालाम्।।

त भवन्तम –

विततासितमेघविभासितानु तन्दिाभगुपर्णलपद्मनम।
मदसिन्धुरराजविलासगति करुणानिलय कलये सतत।। 201

अधराम लमञ्जुलरक्तरुचि सुमनोहरमौक्तिकरुग्रदनम्।
मधुरस्मितमुग्धमुखाम्बुरुह करुणानिलय कलये सततम।।

सागरवर्यसुताहृदयेश सागरसुन्दरमन्दिरवासम्।
सागरसन्निभधीरगभीर कारुणिक परम कलयेहम्।।

सजलाम्बुदनिभमेचकरुचिमञ्जलवपुष
विगतागामृतकिरणद्युतिजयशीलसुहसितम्।
बहिरागतकरुणारसपरिपूरितनयन
घनकार्मुकवरशोभितमनिश हृदि कलये।।

गुणिन गुणरहित मुनिजनमानसनिलय
जगदादिभरणसहृतिकरमीश्वरमभवम्।
तनुमानसवचनातिगनिजवैभवमहित
पुनरागतिरहिताद्भुतपदमात्मनि कलये।।

---

1 *महाभारते वनपर्वणि 99–अध्याये परशुरामाय विश्वरूप दर्शयामास श्रीराम श्लो 56-60 (p 163 Vol II)*

सचराचरजगदावळिसदन जगदवन
रविपावकशशितारकततिदीपकसुपमम।
अग गवहगण सुखनिलय वरयमिना-
मतिनिर्मलमनसामतिसुलभ हृदि कलये॥

त्वदाियसदर्शनदिव्यलाभ
सुदुर्लभो हि त्रिदशोत्तमानाम्।
दृष्ट मयाऽहो तव विश्वरूप
सायुज्यमेवाभिलषाम्यह ते॥

श्रीराम – भवति। परितुष्टोऽस्मि तवानया सपर्यया। इतस्स्वर्गमारुह्य अचिरादेव पूर्णकामा भविष्यसि। तदनुजानीहि गमनाय।

(शबरी श्रीराम नमस्कृत्य पुन समाधिनिष्ठा भवति। सलक्ष्मण सोऽपि कुटीरतो निर्गच्छति)

लक्ष्मण. –(श्रीराममुद्दिश्य) अद्य परमविस्मयकर दृष्टवानस्मि।

श्रीराम – कि तत्?

लक्ष्मण –इत पूर्व सुहृदा भक्तिपरवशेन गुहेन दीयमान मृष्टान्न भवान्निराकार्षीत्। भरद्वाजादिभिर्मुनिभिश्च नियतात्मभिरेव आचारपूतमेव आतिथ्य प्रत्यग्रहीत। तत्कथमद्य प्राकृतयानया शबर्या दत्तेनोच्छिष्टेन तुष्टवान्।

श्रीराम – (सस्मितम्)
साधु पृष्ट त्वया भ्रात शबरीसगमेन व।
प्रश्नेन च तवानेन स्वस्य सर्वात्मभावताम्॥
लीलानरावतार. सन् सुष्ठवह स्मारित शृणु।
आदौ त्वामेव तत्किञ्चित् तावत् पृच्छामि लक्ष्मण॥
किमर्प्यते भगवते सर्वमेवामल नवम्?

लक्ष्मण – नैव दृश्यते। फलपुष्पतोयानि पूजादिषु सन्निधापितानि भृङ्गमीनै जुष्टपूर्वाण्येव। गृहेषु च पाकसिद्धानि भक्ष्यादीनि अनाघ्राणदूषितानि इति नैव वक्तु शक्यते। अत एव तद्दोषनिवारणार्थ मन्त्रा अपि प्रवृत्ता।

श्रीराम – ब्रूहीदमपि मे सौम्य कि वा सर्वोऽपि साधक। विषयाजुष्टमात्मान विनिवेदयितु क्षम॥

लक्ष्मण – नैवेत्येव वक्तव्यम्। यथा प्रथमप्रसूत फल कर्षकै तृणादिना बध्वा पृथक्कृत्य उपनिधित्वेन[1] स्थाप्यते इष्टदेवतार्थ, तद्वदात्मान विषयैरनवलीढ स्वच्छमीश्वराय समर्पयितु द्वित्रा एव महात्मान समर्था।

---

1 *तथैव श्रीशारदापि श्रीरामकृष्णायोद्दिष्टेति तेनैवोक्तम्। रा जी p 109*

श्रीराम - यथा भवान् (लक्ष्मण विनयलज्जितो भवति) तुष्यामि तवानया सूक्ष्मया बुद्ध्या। एवमेव विजानीहि शबरीमन्तरा अपि।

लक्ष्मण - विषयानुपभुञ्जानस्य चेश्वरमपि सेवमानस्य जनबाहुल्यस्य प्रतीकभूता शबरीति प्रतिभाति मे।

श्रीराम - तथा न। शबर्या भुक्तार्पितानि फलान्येव विषयसन्दष्टानि जीववृन्दानि। चिरजीविनी सिद्धशबरी तु अनादिरनन्ता शब्दादिविषयराजिरेव।

लक्ष्मण - विषयानेव खलु जीवा निर्विशन्ति न तु तैरद्यन्ते।

श्रीराम - तैरद्यमानैस्तेप्यद्यन्ते "अद्यतेऽत्ति च भूतानि" इति हि श्रुति।

लक्ष्मण - अहो रहस्याद्भुतोऽय सन्दर्भ। प्रायेण भुक्तदत्तमेव अकृत्रिमतया योग्यतरं भवति। अपि च

सानुग्रहेण भवताऽद्य मयि प्रभोऽह
दिव्येन लोचनपुटेन विबोधितेन।
पश्यामि ते भुवनमङ्गल विश्वरूप
पापापह नतसमुद्धरण महात्मन्॥

[1] एतदर्थसमर्थनायैव भगवतस्तव परमात्मनः पुरुषोत्तमस्य सीतायाः प्रकृतिरूपिण्या मायापरनाम्न्या देव्या परिचर्याप्यनुमोदितेति मन्ये।

श्रीराम - (साङ्गीकारम्) भवतु प्रकृतमनुसराव.। ऋश्यमूकपर्वतप्रान्तमनुप्राप्तौ स्व इति मन्ये। यदत्र विटपमाल्यधारिणो वानरा इतस्तत परिभ्रमन्ति। किमपि प्रष्टव्यान्तरमस्ति वा?

लक्ष्मण - न किमपि। तथापीदमस्तु -

जगद देव पायात् सहजनिजमाया भगवती
भवांश्चासौ वैदेह्यपि यदवतारौ प्रभवत।
तथा जैवं लोकं प्रतिविषयसदशमधुर
स्वमात्मानं यस्मै कलयति च नैवेद्यमिव य॥

(निष्क्रान्तौ)

इति शबरीसपर्या

---

1 *विषयानुभवरूपसपर्योपपादनाय। विषयराजे सीतायाश्च मायारूपत्वात्।*

विद्याभ्यासाय च गृहात्प्रेषितोऽपि गदाधर ।
पाठाशालामगत्वैव रेमे चोपवनादिषु ॥

प्रह्लादवद्देवकथा सुहृद्भि कीर्तयन्मुदा।
गुरवोऽपि यत क्रुद्धास्तत्साधुत्वप्रसादिता ॥

बाल्य एव वयस्याना नायकत्वमुवाह स ।
धर्ममार्गानुसरणे जगतो गुरुरायतौ ॥

अवाप शिल्पनिर्माणे कौशल चित्रलेखने।
संगीते चैवमाद्यासु ललितासु कलास्वपि ॥

स बभौ रूपवान दान्त क्रीडाहास्यकथाप्रिय ।
विनयादिगुणावाल सोत्साहश्च कुशाग्रधी ॥

कदापि धृत्वा कौपीनं स गत्वा मातुरन्तिकम्।
साधु मा पश्य सवृत्तमित्युवाच गदाधर ॥

दिदृक्षुभिर्जगन्नाथ मार्गे कामारिपुष्करम्।
आगतै सगत पुत्र माता दृष्ट्वाऽथ साधुभि ॥

प्रतारित प्रमुग्धोऽय शिशुर्मम भवेदिति।
भीताप्याश्वासिता पश्चात् सौजन्य प्रति चात्मन ॥
अभूत्पितृवियोगश्च सप्तमे तस्य वत्सरे।
दुर्भर शैशवे मातु र्वियोगो हि भवेन्नृणाम्॥
पितुश्च बाल्यावस्थाया यौवने च कलत्रत ।
प्राप्तोपनयनश्चासी न्नवमेऽब्दे गदाधर ॥
धनी धन्या ददौ भिक्षा पुरावाप्तवरा तथा।
द्विजेतरान्ववायापि तस्योपनयनोत्सवे॥

कश्चिन्नाम्ना श्रीनिवास शङ्खालङ्कारजीविक । [1]
ज्ञात्वा गदाधरं साधुर्महापुरुषलक्षणम् ॥

मालयालकृत कृत्वा प्रार्थयामास सादरम्।
"न जीविष्याम्यहं वृद्धो दीर्घकाल प्रतीक्षितुम् ॥

1 स्याच्छाङ्खिक काम्बविक - अमर

त्वया करिष्यमाणानि महाकार्याणि भूतले ।
अत सदाय स्मर्तव्यो महात्मन् कृपयेति" च ॥

प्राप्ते सप्तदशे वर्षे कालीघट्ट (Calcutta) पुरस्थलम ।
ददत्साहायक भ्रातु स ययौ झामपुष्करम् ॥

क्रियादक्षस्य निवर्हि दैवसंबन्धिकर्मणाम् ।
स्वस्यैव पाठशालया स्थापितायास्तथैव च ॥

प्रस्थानमिदमेवासीद्[1] रामकृष्णस्य भाविन ।
प्रस्तावना जीवितस्य दृश्यकाव्यस्य चारुण ॥

धनार्जनाय विद्याया चोदयन्त स्वमग्रजम् ।
ततो रामकुमाराख्य वैमुख्य दर्शयन् परम् ॥

ऊचे गदाधरो "विद्या तादृशी मे न रोचते ।
कैवल्य नास्त्यत किन्तु केवल तण्डुलार्जनम ॥"

विद्या येन तिरस्कृता हि विषवद्या देहयात्राफला
विद्या दुग्धवदर्जिता सुकृतिना या मोक्षसौख्यप्रदा ।
ज्ञानाज्ञानपयोविवेचनपटुप्रज्ञाधुरीण सदा
तं हंस परम भजामि शरण श्रीरामकृष्णाभिधम ॥

---

1 रा । जीवित । पुट 57n रामकृष्ण इतिनाम केन दत्तमिति ।

4. साधनारम्भः

श्रीदक्षिणेश्वरवासः

हृदयस्थितमात्मान मनवाप्यैव साधक ।
विश्राम्यति न नेदिष्ठ ज्ञात्वा चोरो निधि यथा ॥

कालीघट्टात् तत पश्चाद्ययौ श्रीदक्षिणेश्वरम् ।
गदाधरो जीवितान्त सेवितु भवतारिणीम् ॥

पावने जाह्नवीतीरे नगरा दविदूरत ।
तस्या एव जगन्मातु शिवमाधवयोरपि ॥

सपन्नया रासमण्या निर्मितास्तत्र चालया ।[1]
आत्मान भुवनाम्बाया सेविका मन्यमानया ॥

[2] याऽष्टासु नायिकास्वन्या तस्याश्च सहचारिणी ।
देवी पूजा प्रचारार्थ मवतीर्णा धरातले ॥

जामात्रा मथुरानाथेनास्या सप्रीतिपूर्वकम् ।
अर्चकत्वे वृतश्चाय गदाधरमहोदय ॥

कृष्णदेवालये पूर्व कालिकामन्दिरे तत ।
दौहित्रो रामशीलाया गदाधरपितृष्वसु ॥

बन्धुर्हृदयरामश्च सहायो यत्र कर्मणि ।
नित्यार्चनामन्त्रतन्त्र भक्तिज्ञानविधानतः ॥

परितापभरस्तोत्र समाध्यनुभवात्मनाम् ।
तथा साधनलीलाना [3] तस्य रङ्ग प्रकल्पित ॥

स्वधर्मपरधर्माणामनुष्ठानमशेषत ।
अनन्यप्रतिभावन्तमपहाय गदाधरम् ॥

क कर्तु प्रभवेदन्य सतुष्टो येनकेनचित् ।
तन्त्रेण वाथ मन्त्रेण सर्व. सर्वत्र नक्षम ॥

---

1 *31-5-1855 आलयसप्रोक्षणम् ।*

2 *ललितासहस्ते --श्लो 131 अष्टमूर्ति रजा जैत्री । सौन्दर्यलहर्याम् -- श्लो 17 सवित्रीभिर्वाचा वशिन्याद्याभिरिति । वशिनी, कामेश्वरी, मोदिनी, विमला, अरुणा, जयिनी, सर्वेश्वरी, कौलिनी इत्यासामन्यतमा ।*

3 *गदाधरस्य कारणजन्मन आध्यात्मिक साधना अपि लीलाप्राया ।*

अर्चारम्भ

प्रमादात् [1] क्षेत्रनाथेन भग्ने श्रीकृष्ण विग्रहे।
सन्धानमेव निश्चित्य नवनिर्माणतो वरम्॥

अनालक्ष्य चकारायं शिल्पागमरहस्यवित्।
विग्रहस्य पुराणस्य स्वजनस्य यथैव तत्॥

कदापि रम्या प्रतिमा शिवस्य निर्माय चाराधनतन्मयोऽभूत्।
सप्रार्थितस्ता मथुरायपश्चाद् ददौ स तस्मिन् नितरां प्रसन्न॥

मन्त्रस्वीकारः

केनारामेण गुरुणा दत्तान्मन्त्रातप्रचोदित।
समाधिगगनं वेगादुत्पपात स हंसवत्॥

एवं प्राप्तोपदेश सन पूजारम्भेषु भक्तित.।
कालीमाराधयामास शास्त्रतस्तु न केवलम्॥

स प्राप तन्मयीभावमात्मर्पण पुरस्सरम्।
"रम्" –अग्निबीजमुच्चार्य जलं सप्रोक्ष्य सर्वत॥

विभावयन्नथात्मानं चालयं ज्वालयावृतम।
अर्चयामास मालाभिरनर्घैश्च विभूषणै॥

परिचारै स्तथान्यैश्च कालिका भवतारिणीम्।
या जगज्जननी व्याप्ता सर्वेषु भुवनेष्वपि॥

हृदयेषु च जन्तूनां मन्दिरेऽस्मिन् प्रतिष्ठिता।
सहस्र पत्र कमले शयानस्य कपर्दिन॥

उरसिन्यस्त चरणा रौद्रप्रेमरसान्विता।
दिव्याभरण हृद्याङ्गी दुकूलवसनोज्ज्वला॥

धृतहेम कपालस्रक्करास्थिमय मेखला।
वामाभ्यामपि हस्ताभ्यां नरमुण्डासि धारिणी॥

दक्षिणाभ्यां प्रपन्नेभ्यो वराभयविधायिनी।
जननस्थिति भङ्गानां निदानं जगतोऽस्य च॥

परिताप योग

नक्तं पञ्चवटीं गत्वा मन्दिरोपवनीमसौ।
अभुत सुप्तेषु सर्वेषु ध्याननिष्ठो गदाधर॥

---

1 *तन्नाम्नार्चकेन।*

सूत्र वस्त्र च सत्यज्य शरीरस्मृति वर्जित ।
निर्विकारतया ध्यान कार्यमित्यवबोधयन् ।।

निन्ये स दिवसान मासान सुबहूनपि वत्सरान् ।
साक्षात्कार परीताप भरसतप्तचेतसा ।।

निराहारो विनिद्रश्च लुठन् भूमौ व्यथार्दित ।
मात रम्बेति विलपन् एहि क्वासीति चालपन् ।।

यथाऽनाथ शिशुर्दीनो मातुर्विरहकातर ।
कदाचिन्नतिभि पूजाविधिभिश्च कदाचन ।।[1]

सिषेवे लोकजननीं कदापि कठिनै र्व्रतै ।
अनन्यसाध्यैर्गिरिश हिमाद्रि दुहिता यथा ।।

योगोऽय परितापाख्य पश्चात्प्रमुखता ययौ ।
विषादाख्यो यथा योगो भगवद्गीतयोदित ।।

श्रीरामकृष्ण बोधेषु सर्वसाधारणो मत ।
विनैव नियमानन्यानभ्यस्य सततं जनै ।।

अमोघोभगवत्प्राप्ति हेतु स्वयमनुष्ठित ।
रामकृष्णेन निरत परित्यक्तान्य सविदा ।।

कायेन मनसा वाचा तथा सर्वात्मना क्रमात् ।
उपचारै रुक्तपूर्वै र्नतिपूजा व्रतादिभि ।।

निर्विकल्पादिभिर्वक्ष्यमाणै र्ध्यान समाधिभि ।
नानाविधैरपिस्तोत्रै र्वर्ण्यमाणैश्च मञ्जुलै ।।

स्तोत्र साधना

वर्जयेदतिसर्वत्रेत्युक्त्या भक्ति स्तुति च ये ।[2]
नातिमात्रा रोचयन्ति ताश्चकुर्वन् निरुत्तरान् ।।

---

1 *जपाच्छान्त पुनर्ध्यायेद् ध्यानाच्छान्त पुनर्जपेत् ।*
जपध्यान परिश्रान्त आत्मान चविचारयेत् । शन्ति पर्व. महा भा नीलकण्ठव्याख्या ।
तच्चिन्तन तत्कथनमन्योन्य तत्प्रबोधनम् ।
एतदेकपरत्व च ज्ञानाभ्यास विदुर्बुधा । ।

2 *भगवत्परिताप भरेणोन्मत्तप्रायस्य स्वास्थ्यकाक्षिण स्वजना एव*
भक्त्यतिशयो प्यनर्थयैवेति मन्यन्ते स्म । गीता, XI-21 स्तुतिभि पुष्कलाभि ।

[1] स्तवान् गदाधरो नित्य साक्षात्कारैक लालस ।
जगौ सरक्तकण्ठेन परितप्तेन चेतसा ॥

उद्दिश्य कालिका देवी सहिता देवतान्तरै ।
गणेशस्कन्दशर्वैश्च राधिकावल्लभादिभि ॥

[2] *सोत्रसाधनाया सकुमारगजास्यस्तुति*

शिवौ प्रसिद्धौ पितरौ यदीयौ किमत्र चित्र यदि सा प्रसूति ।
सुरद्रुमी लोकशुभकरीति य एव वृक्षोऽपि तदेव सस्यम् ॥

जित स्मरेणैव जितेन यस्य पिता गृहीत्वा जननीकराब्जम् ।
स्मरादविज्ञातपराजयस्य तस्याग्रज नौमि गुहस्य देवम् ॥

---

1 *वक्ष्यमाण प्रकारान् ।*
स्तव्य स्तवप्रिय.स्तोत्रम् - विष्णुसहस्रनाम स्तोत्रम् -86
शिवसहस्रे - 60 मही चारी स्तुत इत्यत्र स्तुत इत्यपि पठ्यते ।
ललिता सहस्रे - 112 स्तोत्र प्रिया स्तुतिमती इति च ।
तत्र भास्करभाष्ये स्तोत्र लक्षणम् -
नमस्कारस्तथाशीश्च सिद्धान्तोक्ति पराक्रम ।
विभूति प्रार्थना चेति षड्विध स्तोत्रलक्षणम् । इति ।

2 *वक्ष्यमाणप्रकाराणि स्तोत्राण्येव साधना*
प्रसगत स्त्रोत्राणा प्रक्रियान्तरेभ्यो विशेष, अतस्तेषामेव मुख्य साधनत्व चोच्यते -
मन्त्रस्तोत्रागमादीना तारतम्य मिहोच्यते ।
भगवत्प्रतिपदूपे समानेऽपि प्रयोजने ॥

मन्त्रा स्तोत्राणि वेदाश्च सन्ति तत्प्राप्ति हेतव ।
वाङ्मय व्यवहारा ये ते सर्वेपीश्वरार्थका ॥

तत प्रवर्तमानत्वाद वैदिका लौकिका अपि ।
वेदशास्त्रपुराणेतिहासकाव्यानि तत्र च ॥

साक्षात्तद्वर्णनार्थानि महीयासि भवन्ति हि ।
तत्रापि राक्षसादीना कथा सन्ति सविस्तरा ॥

समूहालबनन्यायाद अन्येषा च पृथग्विधा ।
धियश्चैकाग्रताधानाद विक्षेपाणां च वर्जनात् ॥

मन्त्रो यद्यपि सारिष्ठो जप्यमानो विशेषत ।
तथापि स्तोत्ररूपैव प्राचुर्य प्रक्रिया गता ॥

तस्या सक्षेपरूपत्वादितिहासाद्यपेक्षया ।
मन्त्रेभ्योप्यतिवैपुल्याद वैचित्र्याच्च पदार्थगात् ॥

परतत्त्वानुसधाने तथैव क्रियते स्तुति ।
विषया हीश्वरा न्नान्ये यत्र दैत्यकथादय ॥

मन्दाकिनी सलिलसकलिताार्घ्यपाद्य
क्लृप्ताम्बराम्बरमनन्त परिष्कृताङ्गम्।
ताराक्षतार्चितमुमातनय गणेश
ब्रह्माण्डमोदक भरोदरभारमीडे ॥[1]

दृष्ट्वा षडानन शिखावल चञ्चुनुन्न
विस्फारित भुजगबुद्धिकर कराग्रम्।
भीते स्वनाभिबिलमाखुवरे प्रविष्टे
नागाननस्य चकितानि भय तुदन्तु ॥

व्यत्यस्त पाद कमलानि निरस्त ताला -
न्युत्क्षिप्त बाहुवलयानि चलोदराणि।
द्वैमातुरस्य शिवनाटच कलानुकारे
श्रेयासि नो ददतु शैशव चेष्टितानि ॥

वक्रेण तुण्डेन महोदरेण वतसचन्द्रेण सतारकेण।
ओङ्काररेखा प्रतिभान हेतु वन्दे गजास्य जगतामुपास्यम् ॥

सुरप्रवेक सुकृता विपाकं जितार्यनीक श्रितसर्व लोकम्।
सदा विशोक सदसद्विवेक वन्दे द्विपास्य जगतामुपास्यम् ॥

कल्याण रूप शिवनेत्र दीप महाप्रताप जितपुष्पचापम्।
हिमाशुकोप तदुपात्तशाप वन्दे द्विपास्य जगतामुपास्यम् ॥

निरस्त माय नरहस्तिकाय सुरर्षिगेय शिवभागधेयम्।
सुधीसहाय निहतान्तराय वन्दे द्विपास्य जगतामुपास्यम् ॥

सदैव बाल शमिताघजाल मनोज्ञलीलं महनीय शीलम्।
कपित्थलोल करुणालवाल वन्दे द्विपास्य जगतामुपास्यम् ॥

वन्दारुकल्प वरदान शिल्प शर्वाकतल्प सरसाभिजल्पम्।
गुणैरनल्पं रहिताधिकाल्प वन्दे द्विपास्य जगतामुपास्यम् ॥

मुरारिसेव्य भुवनैकभव्य चित्ते यदन्तस्तदुपासितव्यम्।
महोऽभिनव्य मनसानु भाव्यं वन्दे द्विपास्य जगतामुपास्यम् ॥

मूर्त्यैव क्लृप्त प्रणवोपदेश कीर्त्याप्यभिव्याप्तदिशावकाशम्।
स्फूर्त्या समासादित पापनाश वन्दे द्विपास्य जगतामुपास्यम् ॥

शेषयज्ञोपवीतालकृत इत्यपि।
भुक्त यथान्न कुक्षिस्थ स्वात्मत्वेनैव पश्यति।
पूर्णाहन्ताकबलित विश्व योगीश्वरस्तथा ॥
दाक्षिणामूर्तिस्तव मानसोल्लास - 1-15

पापैरदृश्य पदभक्तवश्य सर्व रुपास्य तमनेकपास्यम् ।
श्रुतिप्रकाश्य कृतिभि प्रशस्य मन्दैर्ग्वश्य प्रणमाम्यवश्यम् ॥

अपास्तदोष सुकुमार वेष प्रत्यूहरोष पुरुषार्थ पोषम ।
हरात्मतोष दिविपद्विशेष वन्दे द्विपास्य जगतामुपास्यम् ॥

अलुप्तभास सुखचिद्विलास मत्तेभनास गिरिजाङ्कवासम् ।
सविद्विकास विपदामवास वन्दे गणेश हृतजन्मपाशम् ॥

तुर्याद्यवस्थास्फुरितप्रकाश मृगाङ्क हास्य श्रुतिवाग्रहस्यम् ।
दन्तावलास्य कृतचारुलास्य वन्दे गणेश हृतजन्मपाशम् ॥ 301

प्रातर्नमस्य स्वगणै समस्य कैवल्यसस्य प्रणिधानरस्यम् ।
शम्भो सदस्य नतदेवदास्य वन्दे द्विपास्य जगतामुपास्यम् ॥

ज्ञानप्ररोह सदभीष्टदोह विनष्ट मोह शुभधीसमूहम् ।
आत्मैव सोऽह विगतेतरोहो वन्दे गजास्य जगतामुपास्यम् ॥

क्षेमकराणि [1] क्षुतघीकृतानि स्तम्बेरमास्याननसभवानि ।
विद्याजुषा दुर्विधिदृष्टिदोषतन्तून् हरन्ता तरसान्तरायान् ॥

कैलासशिखरभ्रान्त्या स्थित ककुदि नन्दिन ।
वप्रक्रीडापरिणत वारणास्यमुपास्महे ॥

पति गणाना स्वगणोन्नतीच्छ. कवि कविना कविताभिलाष. ।
[2] श्रवस्तम मोदकलोभवन्त गजेन्द्रवक्त्र कलयामि देवम् ॥

कराब्जान्मोदक हृत्वा स्कन्दे विपरिधावति ।
नमस्तुण्ड प्रसार्यैवाकर्षिणे विघ्न धर्षिणे ॥

कलक. शाश्वत प्राप्तो य दृष्ट्वा हसतेन्दुना ।
मस्तकेञ्जलिबन्धस्त नौम्यधृष्य गणेश्वरम ॥

अद्वैतमेव भविक प्रथम मतेषु ब्रह्मेव वेद्यततिषु प्रथम विचार्यम् ।
श्रीरेव गौरव पद प्रथम वचस्सु देवेष्वपि प्रमथराट प्रथम नमस्य ॥

वन्दे किशोरमनिश भ्रमराम्बिकाया मातुर्विभूतिभिरिवात्मज वत्सलाभि ।
गण्डस्थलीस्रवदमन्द मदाम्बुधारालोल द्विरेफ ततिभि समुपास्यमानम् ॥

---

1 *क्षुतम् Sneeze सामान्यत क्षुतममगलमपि गणेश्वरस्य तदपि शुभप्रदमिति चमत्कार ।*

2 *ऋग्वेद 2-23-1 सायणभाष्ये "सर्वेषामन्नाना मुपमान श्रवोऽन्न यस्य स तथोक्त" इति उपमश्रवस्तम पद व्याख्यातम् । अत मोदकलोभवन्तमिति विशेषण सगच्छते । मोदकलो भवन्त मिति च छेद । मोदकलो मोक्षसुख काम इति कर्तृविशेषणम् । कल काम धेनुरिति कलधातो रिच्छार्थकत्व विवक्षितम् ।*

काम मदद्विरदनिर्दलनप्रचण्डो मातुश्चयानमहमित्यभिमानपूर्ण ।
एणान्तकोऽपि बत यत्कृतबृहितार्त सिंहो बिडालति तमेकरद नमामि ॥

भुजै सतुण्डैरिव निर्दिशन्त [1] तत्पूरुषादीनिमुखानि पञ्च ।
शार्वाणि पादाब्ज समाश्रितेभ्यो वन्दे गणेश विशदोपदेशम् ॥

पितरौ चन्द्रमश्चूड हैमवत्यौ जगद्गुरू ।
यस्योत्पत्ति र्गुरुकुले गणाना त्वा गुरु नुम ॥

नमस्ते यस्य पृष्ठस्थो गजवाहन चापल ।
कुम्भयो कुण्ठिते शूले विषण्ण केकिवाहन ॥

नि शेष शोष्यता देव हृत्वा तुण्डाग्रलीलया ।
मम मानासकासारतले वृजिन कर्दम ॥

दूरीभवतु ससारसताप सर्व एव मे ।
सानुकम्प भवत्कर्ण तालव्यजन निर्धुत ॥

हेरम्ब ते पटुरनुग्रहमूषिकेन्द्रो
वासावकाश मुपकल्पयितु मुषित्वा ।
कामाद्यनेकविध सचित सस्यराशि
रिक्तीकरोतु मम मानसकोशमध्यम् ॥

शिवस्तुति

ओतत्सदित्यभिधया प्रथित पवित्र नि श्वासवद्विरचिताखिलवेदलोकम् ।
सेवे कृपा परिमल शरण गताना ससारताप शमन शिव ते पदाब्जम् ॥

तत्व चराचरवतो जगतोऽखिलस्य चित्रस्य वर्णशबलस्य पटो यथैव ॥ सेवे ॥
सत्यस्य सत्यमिति यन्निगमै रुपात्त त्यक्तादिमध्यनिधनं तदपेत शोकम् ॥ सेवे ॥
अप्रातिभासिकसदव्यवहारसत्य सत् पारमर्थिकमिति श्रुतिषु प्रतीतम् ॥ सेवे ॥
अस्पृष्ट मिन्द्रियगणै र्हृदय प्रतिष्ठ दुष्प्रापमेव मनसा र्थवशवदेन ॥ सेवे ॥
औपाधिकस्वगत वास्तव भेदशून्य यन्नामरूप रहित परमक्षरात्तत ॥ सेवे ॥
चैतन्यरूप मकलङ्कधियानुभाव्य षड्वैरिवर्ग निधन श्रवणादिगम्यम् ॥ सेवे ॥
जागर्ति यज्जलमुच श्चलतोन्तराले व्योमेव तत् सपरिणामहृदोन्तरन्त ॥ सेवे ॥
तुर्य पद दुरितहारि निरञ्जन च निर्द्वन्द्व मुज्झितगुण निरुपाधिनित्यम् ॥ सेवे ॥
ब्रह्मास्मि–तत्त्वमसि यागव धारितैक्य नेति प्रभृत्युपनिषद्गलितप्रपञ्चम् ॥ सेवे ॥

---

1 *तत्पुरुषाघोर सद्योजातवामदेवेशानाख्यानि ।*

मानै रमेयमपि साक्षितया प्रसिद्ध यत्नानवाप्यमपि चात्मतयानुभूतम् ॥ सेवे

मिथ्या विचित्र जगतो प्यवलम्बकुड्यमीड्य सुरासुरगणैर्हरिणाप्यवेद्यम ॥ सेवे।

यदभूत पञ्चकमयेपि वपुष्यनित्ये नित्याविलुप्त कलयैव विराजते तत ॥ सेवे।

यद्वैखरीति च परेति च मध्यमेति पश्यन्तिकेति च बुधैरभिवर्ण्यते तत् ॥ सेवे।

येनास्तमेति सहसा शिव जीव भेदो ज्ञातेन कर्म परिपाकवशात्तदेकम् ॥ सेवे।

सृष्टिस्थिति प्रलयताण्डव नाट्यलोल कैलासभूधर शिरो मकुटायमानम् ॥ सेवे।

दक्षाध्वरान्तकमुमा वरि वम्यमान श्वेताचलोद्यमन रावण दर्पहारि ॥ सेवे॥

[1] ध्यात च दाशरथिनैव तितीर्षुणाब्धि जीवेन ससृतिभयानि तितीर्षुणेव ॥ सेवे॥

विध्वसक त्रिपुरदानवमन्दिराणा मुत्तसकच नतनिर्जरमस्तकानाम् ॥ सेवे॥

चित्ते तमस्विनि नखद्युतिकेसराल मुद्भाति नीरद तटिद्रुचिर कदापि ॥ सेवे॥

ज्ञानप्रभात समये प्रकट स्वरूप नोपाहित विषयशैवल जालबन्धै ॥ सेवे॥

यद् ध्याननिर्मथित मानसदुग्धवार्धि पीयूषभाण्डमपवर्गसुखप्रदतत् ॥ सेवे॥

योगीन्द्रमानस सरोवर लब्धबोध सद्भक्ति गाङ्गलहरी रचितोऽपबर्हम् ॥ सेवे॥

स्वानुग्रहार्क किरणै समुदीर्ण शोभ जुष्ट मुमुक्षुमधुपै स्तुतिगानरक्तै ॥ सेवे॥

अज्ञानदोषपरमौषधनित्यसत्यनिर्वाणसौख्यमकरन्दभराभिरामम् ॥ सेवे॥

मायाभिजुष्टमुमयापि मयापि जुष्ट विद्यासहायमसहायवता सहायम् ॥ सेवे॥

ससारविषरोगस्य नास्ति लोकेऽन्यदौषधम्।
सदाशिवपदध्यान मुक्त्वैक मुक्तिकारणम् ॥

सर्वमङ्गलास्तुतिः

मोघानिषून् मोहनदीपनादीन् स्मरो गिरीशे कुसुमाल्पसारान्।
शब्दादितन्मात्रमयानवेक्ष्य प्रायुङ्क्त शक्ति परिशेषतो याम् ॥ [2]

आद्य जगन्मङ्गलधामदिव्य विघ्नान्धकारप्रलयार्कबिम्बम्।
यदङ्गकोद्वर्तनकल्कजात वन्देतरा मङ्गलमातर ताम् ॥

प्रागेव भारतखगेन्द्र[3] विमानयोधो
बालोऽपि षड्दिनवया सुरसैन्यपाल।

---

1 *रामकृत शिवलिग प्रतिष्ठा आनन्दरामायणादिषु द्रष्टव्या। कृष्णकृता' शिवस्तुति'। महाभारते (द्रोण अनुशासनिक।)*

2 *परिशेषालकार*

3 *मयूर National bird*

यस्या कृपायुधयुतो जिततारकोऽभू- [1]
त्तामेकवीरजननीं कलये शिवाख्याम् ॥

श्मशानवासोऽपि पिशाचसगत सदैव यस्या दयित शिवो मत ।
अमोघसौभाग्यबलेन धूर्जटि र्भजामि ता चेतसि सर्वमङ्गलाम् ॥

अद्याप्यसौ भूतपतिस्तपस्वी मृत्युञ्जयो भुक्तविषो प्यरोग ।
यदीयमाङ्गल्य बलात् प्रपद्ये सतीं सतीना धुरि ता प्रशस्याम् ॥

अनन्तरत्नोऽपि महोन्नतात्मा नगाधिराजो जनुषैव यस्या ।
हिमालयोऽसौ महिमालयोऽभूद् भजे शिवा ता जननीं महिम्नाम् ॥

पितुश्च पत्युश्च तथैव पुत्रयो र्यया पुरन्ध्रीपदवीप्रमाणया ।
कृता प्रतिष्ठा महती भजामि ता कुलद्वयीमङ्गलमण्डनामुमाम् ॥

पादद्वन्द्वमुपास्महेऽनवरत गौर्या सरोजप्रभ
त्रैलोक्यावनदक्षमार्तसुलभ रक्ष समूहान्तकम् ।
विन्यासक्रमपावितस्वजनकाहार्याधिपाया महा -
देवेन प्रणयापराधविनतिष्वाराधित चादरात् ॥

श्रोणीमण्डलवर्णिका [2] सघुटिका जघाग्रभागद्वयी
मीश्वर्या समुपास्महे मृदुनवक्षोमाञ्चलालकृताम् ।
यामालोक्य नितान्तकौतुकजव श्रीकण्ठचक्षुर्गण
सोत्कण्ठ स्पृहयेन्निमेषरहित शेषाङ्गवीक्षाकृते ॥

ससारार्णवतारकप्लवयुग भक्तार्भकालम्बन
शर्वाण्या मसृणोरुकान्ति परिवाहावर्त चक्रद्वयम् ।
जानुद्वन्द्वमुपास्महे शिवमनोरूप.कुरङ्ग पुन -
र्मग्नोन्मग्नतयाऽस्तनिर्गमकथो यत्रानिश भ्राम्यति ॥

कामस्यन्दनचक्रयुग्ममगराट्पुत्रीनितम्बद्वय
पादाग्राणिवरोरुकूबरयुत वस्तित्रिकावस्करम् । [3]
रूपश्रीमधुसारथिप्रचलित चानन्यकान्ताश्रय -
श्रीकण्ठाङ्कसमाश्रयानुमित सौभाग्य सदोपास्महे ॥

---

1 *जिततारक जिततारकासुर ग्रहान्तरगामी च। आधुनिकेन केनापि चन्द्रग्रह प्राप्त । कुमारेण तु बाल्य एव ग्रहान्तरगमनमपि कृतमिति चमत्कार । तारको ग्रहविशेषोऽपि स्यात्। जिततारकत्वरूप शब्दसाम्यमात्रम्।*

2 *Sample of beauty*

3 *तत्तदगानुरूपरथावयवविशेषा अवस्करा ।*

निष्प्रत्यूहमुपास्महेऽद्रिदुहितु कारुण्यदोह कुच -
द्वन्द्व सर्वकलाभिवृद्धिनिलय कैवल्यसौख्योदयम् ।
पीत्वा यद द्विरदानन शरभवश्चात्यन्तमुत्साहिनौ
विघ्नध्वान्तनिवारणे च धिषणालोकप्रदाने नृणाम् ॥

सानन्द समुपास्महे गिरिकुमार्या बाहुमूलद्वय
केयूरच्छविनिर्मलीकरणसरभैकशोभास्पदम् ।
लास्यारभभुजाङ्गहाररचितायाम मनोजद्विषो
नेत्रासेचनक नतार्तिहरण शृङ्गारसारालयम् ॥

बाहुद्वन्द्वमुपास्महेऽचलतनूजाया शिरीषोपम
लावण्यामृतवाहिनीलहरिका लास्याङ्गहाराद्भुतम् ।
पङ्क्तिग्रीवविचालिते च रजतक्षोणीधरे सभ्रमा -
दिच्छाश्लेषविलासतोषितमहादेव जगत्पालनम् ॥

पाणिद्वन्द्वमुपास्महेऽनिशमुमाया हैमवत्या शुभ
फुल्लाभोजनिभ धृताभयवरामोद प्रसादार्थिषु ।
यस्मिन्नामलकायते श्रुतिशिर·सीमन्तशामन्तिका [1]
केनाम्नायनिरूपितार्थविभवा कैवल्यविद्या परा ॥

प्रालेयाचलकन्यकाधरपुटीद्वन्द्व प्रवालद्युति -
स्पर्धाहिलमुपास्महे रसभरा लब्ध्वा यदीया सुधाम् ।
स्वास्थ्य किंचिदिवोपयाति गरलाहारज्वरार्तो हरो
गङ्गाभ·शिशिरीकृत सततमासन्नौषधीशोऽपि सन् ॥

कर्णद्वन्द्वमुपास्महे मुखलसत्सौन्दर्यचन्द्रप्रभा
कासारप्रतिबिम्बरूपसहितश्रीकाररेखासमम् । [2]
रुद्राण्या·शिवनाथचाटुवचनश्लाघाचलत्कुण्डल
योगक्षेमकथा पदाश्रितजनस्याश्रोतुकाम सदा ॥

सश्रद्ध समुपास्महे भवसतीनेत्रद्वय चाद्वय
मीनाकारजिगीषु भक्तजनवाञ्छानुग्रहे साग्रहम् ।

---

1 *शामन्तिका चेमन्तीति आन्ध्रभाषाया प्रतीत पुष्पविशेष ।*

2 *श्रीकार कर्णाकृतिर्भवति विशिष्य आन्ध्रलिप्याम् (ङ्कु) रिति ।*
प्रतिबिम्बसहितत्ववर्णन मिथ कर्णयो प्रतिबिबनिभत्व द्योतनार्थम् ।

भेदध्वान्तनिवारणैकचतुरा दिव्या यदीया च दृग्
यस्योन्मेषनिमेषमात्रविहितौ ब्रह्माण्डजन्मक्षयौ ॥ [1]

भ्रूवल्लीयुगल मृषाशबरसुन्दर्या धनुर्विभ्रम
लोकत्राणमुपास्महे सतिलक यन्नासिकालस्तके।

चञ्चत्कान्ति मयूखयष्टिशरसधानेन वक्त्रद्युति
मुष्णानश्चिकुरान्धकारनिवहो निर्जित्य निष्कासित ॥

विश्व रक्षितुमीश्वरस्य गरल कण्ठे यथा स्थापित
भक्ताज्ञानतमस्तथेव निहित कारुण्यतो मस्तके।

श्रीकाल्या समुपास्महे सुकुटिल धम्मिल्लभागद्वय
सीमन्तोऽञ्चति नीलतोयदतटिल्लेखेव यत्राचला॥

नारायणात्मिका वन्दे नारायणसहोदरीम्।
परा शक्ति शिवार्धाङ्गीं परमानन्दरूपिणीम् ॥ [2]

कृष्णस्तुति

माता काली कृष्णा कृष्णस्त्व वर्णतोऽपि जलदाभ ।
वद देव तत्त्वतो मे शक्तिर्वा शक्तिमान् भवसि॥

मम तावत् प्रतिभासि प्रियजननी कालिकैव त्वम्।
चोदयसि मा ततो मुहु रस्मिन् सविशेषवर्णने देव॥

गीतम् – 1

गोपिकान्वितो विहरसि
कालिन्दीतटे रहसि ॥ गोपिका ॥

पाययन्नमृ सुखार्ता
वेणुरवामृतधारा ।

बृन्दावनान्तपुलिने
चन्द्रकरैरमलिने ॥ गोपिका ॥

सरिता मरुता घोषे
भरिता गीतिरशेषे।

---

1 *ललितासहस्रे -66 उन्मेषनिमिषोत्पन्नविपन्नभुवनावलि*

2 *cf सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।*
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते॥

तव मुरलीसभृति -
गानात च विभूति || गोपिका

सूत्रितनिगमविचारा
गोपीभ्यश्च गभीरा।
पश्चान्नराय गोता
गीताया विपुलार्था || गोपिका ||

हित्वा शरीरसग
कृत्वा ससृतिभङ्गम।
चुम्बित मनो विपञ्ची
सुखयतु नस्तव गीति || गोपिका ||

गीतम - 2

भजरे मानस गोपालम्।
त्रिजगत्पालनकीर्तिविशालम् || भजरे ||

व्रजभुवि वल्लवपरिवारम।
निजमायोद्भवजगदाधारम
गगनानिलतेज सलिलोर्वी -
पञ्चीकरणविवर्तभोगम् || भजरे ||

नगधरमतुलानन्दाकारम्
निगमागमगोचरसचारम।
अगुण गुणिन रहितद्वन्द्वम्
सुगुणाराधितचरणद्वन्द्वम || || भजरे ||

विगतविकल्प नतजनकल्पम्।
खगवाहनमाद्रर्ताशिशुजल्पम्
मुरलीलाल जलधरनील
हिमकरहास महिमावासम् || || भजरे ||

निर्माय मायिकजगन्मुकुरञ्च तस्मिन् क्रीडन्तमात्मपरिकल्पितजीववृन्दे।
तैर्मृग्यमाननिगमान्तवचोवनान्त - लीलाविहार रसिक भज चित्त देवम्।।

पञ्चीकृत त्रिवृदभिख्यमथैकरूप [1]
[2] सप्तात्म यत्किमपि वा निजकार्यमेतत्।

---

1 *Akasa, Prana or Ap*

2 *भागवत III-2-60 पञ्चूतानि महदहकारौ।*

स्वप्राप्ति साधनतया प्रसृत हि येन
त सर्वलोकशरण भज गोपबालम् ॥

माया गुणा महदहकृति रूपभेदा –
स्तन्मात्रभूतगण–तत्कृतकार्यजातम् ।
स्थूल भवेद्यमनुबध्य विचारयोग्यम्
कैवल्यद च शरण भज त विराजम् ॥

य भान्तमेव हिं विभाति रवीन्दुतारा –
ज्योतिर्गण सकल एष जगत्प्रदीप ।
चेतोमयैश्च विषयै प्रकटप्रकाश
त सूक्ष्मतैजसमय भज गोपबालम् ॥

आनन्दचिदघननिवारित तीव्रताप
स्वात्मोपसहृतचराचरजालबीजम् ।
अस्थूलसूक्ष्मविषयानुभवैकसार
प्राज्ञेश्वर भवहर भज गोपबालम् ॥

जाग्रध्दृषीक विषयोर्जितविश्वरूप
स्वप्ने परिस्फुरित तैजससूक्ष्मभोगम् ।
प्राज्ञ सुषुप्तियुतशर्मघन तुरीया –
वस्थैकतत्व मभव भज गोपबालम् ॥

वैराजपुरुषमशेषचरावरस्थ
हेरण्यगर्भमविवर्जितसूत्रभावम् ।
सर्वस्य कारणतयोद्यदुपाधिरूप –
मायेश्वर परसुख भज गोपबालम् ॥

व्याप्त्या समष्टिविधया द्विविध प्रकल्प्य लोक यथारूचि यथाकृतमेवजीवै ।
यात्रा स्वधाम गमनप्रति वर्तयन्त श्रीनन्दगोपतनय भज वेणुलोलम् ॥

सर्वास्ववस्थासु विनिद्रबोध जाग्रत्सुषुप्तिस्वपनाभिधासु ।
अनिन्द्रिय वासनयाविविक्त माया सनाथ प्रणमामि तुर्यम् ॥

मयूरस्य बर्ह निधायोत्तमाङ्गे लसत घनश्यामलज्योतिषागे
वसन्त पदध्यायिना चित्तरङ्गे कृपानन्दरूप भजे बालगोपम् ॥

चरन्त सदा वल्लवीनाकुटीरेष्वदन्त च हैयङ्गवीन नवीनम् ।
हसत जनन्या विलोक्याननाब्ज कृपानन्दरूप भजे बालगोपम् ॥

मुख व्याददान मृदाहारहेतोर्महाश्चर्यरूप च मात्रे दिशन्तम् ।
पुनर्बालभावाल्लुठन्त तदङ्के कृपानन्दरूप भजे बालगोपम् ॥

वहन्त करे वशनाल मनोज्ञ मुखाब्जानिलैस्त समापूरयन्तम् ।
नटन्तच बृन्दावने रासलोल कृपानन्दरूप भजे बालगोपम् ॥

विषण्णाय पार्थाय गीता वदन्त स्वधर्म चरेति प्रजानुग्रहार्थम् ।
जगन्नाटके सूत्रधार प्रधान कृपानन्दरूप भजे बालगोपम् ॥

मुरारि मुरळी

कालिन्दीवीचिकानीतमन्दशीतलमारुते ।
बृन्दावने स्फुरच्चन्द्रचन्द्रिकास्निग्धसैकते ॥

राधिकाहृदयाम्भोजस्वच्छतामिव विन्दति ।
सुधाशौ पुण्डरीकायमाने व्योमसरोवरे ॥

गोपादमुद्रासङ्घातशोभिते यमुनातटे ।
कस्यापि नीलबालस्य जयन्ति मुरळीरवा ॥

अविदित्वैव न॰ साक्षात् केवल भाविता सती ।
गोपचूडामणेर्गीतिस्तनोति परमा मुदम् ॥

**लोके कलासु सर्वासु मधुरा ललिता. कला. ।
तत्रापि सगीतकला तत्र वेणुरवो हरे. ॥**

श्रुते साधारणे गाने चित्तमावर्जित भवेत् ।
कृष्णाधरसुधापूर्णे कि पुनर्मुरळीरवे ॥

मनुष्या गच्छेयु प्रमदमनिदवाच्यममल
प्रतिध्वान दद्यात् प्रकृतिरखिला चेतनमयी । [1]
द्रवेयुर्ग्रावाणो भुवि किसलयेयुस्तरुगणा
लसत्पिञ्छापीडे मधुरमुरळीं गायति हरौ ॥

कालिन्दीतटसीम्नि सैकतमये मन्दानिलै सुन्दरे
चञ्चच्छारदचन्द्रकान्ति सुभगे शान्तिप्रसन्नान्तरे ।
बृन्दारण्यमहाविहारसमये तस्मिन्दिदृक्षाम्यहं
त्वा गोपीर्मुरलीरवामृतरसानास्वादयन्त मुदा ॥

---

1 *चैतन्यमयी । भावप्रधानो व्यपदेश ।*

कारूण्यपूरस्यकटाक्षजस्य स्मितप्रवाहस्य च वक्त्रजस्य।
रागापगाया मुरलीभुवस्ते तीर्थे त्रिवेण्या जगदाप्लुत नु ।।

तत्त्वावबोध यमिना कवित्वबोध कवीनामपि किनराणाम्।
गानप्रबोध भजतामकार्षुः सुखैकबोध तव वेणुनादा ।।

वाणी वेदवनीविहाररसिका वीणा रसप्राणितै
रागैर्गानकलारहस्यपिशुनैरासारयन्ती तव।
श्रुत्वा वेणुसमुद्भवान् नवरवास्त्यक्त्वा विपञ्चीं स्वका -
माश्चर्यप्रमदावधानभरितस्वान्तावतस्थे ध्रुवम्।।

हृद्य कर्णरसायन तव च यद्गीत तदानींतनं
गोपीचित्तहर प्रतिध्वनति तद् भूयोऽद्य वेणूद्भवम्।
पर्णानां मरुता पयोधिसरिता रावेषु च प्राणिना
लोके नादमयीमजस्रमखिले सजीवयच्चेतनाम्।।

गीत-गीता सुखचिन्मात्रमनम्बुदुग्धमिव यद् गीत परार्थ्यं तव
प्रकृतिप्रत्ययशून्यमेव मुरलीनादात्मनासीत् पुरा।
ननु तव्द्याकृतिवैखरी नरकृते पश्चात्कृता भारते
सुलभाद्यापि सवारि दुग्धमिव नो वेदान्तगीतात्मना।। (मत्तेभविक्रीडितम्)

आनन्दादभिजायते च जगदानन्देन सवर्धते
तस्मिन्नेव विलीयतेपि पुनरानन्दे भवल्लीलया।
आनन्दश्च तव स्वरूपमिति वेदान्ते समाम्नायते
स त्व वेणुरवोर्मिषु प्रतिपद भासि प्रभो सर्वदा।।

वशीनालरवामृतश्वसितमात्मीय मनोवल्लकी -
तन्त्रीषु प्रतिसारयाऽसु कृपया कारुण्यसिन्धो मम।
गानोन्मादवशात्ततो विषयसबन्धान्विहायाशु त-
न्नादानन्तझरे यत परमहसानन्दलीला भजे।।

गान यन्मधुर भवन्मुरलिसधान समस्तं जगत्
कृत्वा नादतरङ्गसततिनिरुच्छ्वास पुन शान्तिदम्।
मौन मौनवता मनोहरतर भूत्वा क्वचिन्निस्तुला -
नन्दोल्लासरसश्रिय दिशति तन्नि:श्रेयसायाश्रये।।

दृष्टा स्वप्ने तव मरकतश्यामला कोमला श्री -
र्वंशीनादोप्यभवदतिथि कर्णयोर्मे मनोज्ञ ।
मन्ये चैतत्सकलमपि मत्पूर्वपुण्यार्जिताया
श्रेयोलक्ष्म्या वहति भगवन् भव्यकार्तान्तिकत्वम्।।

श्री

कृष्णसुधाशतकम्

कागकलहगी

सवोधना

वेद्याकारोऽपि पुनर्निरञ्जनो भासि नीरूप ।
वद देव तत्त्वत कि भवसि ब्रह्माथवा माया ॥ 401

प्रथमा

श्रीरामकृष्णमञ्जुल केरवनीलाम्बुजा दयामोदा ।
चेतोऽधिवासयतु मे बृन्दावनवैजयन्तिका कापि ॥

हग्नीलमणिशलाका दुर्वासस्तोषणोपयुक्तपुलाका ।
वल्लवकीर्तिपताका जयति सदा कापि भक्त कैरव राका ॥

क्लेशास्तमय कल्याणाभ्युदय कृष्णवासर सुभग ।
सम्प्रति निशावसानो ममास्तु जाग्रत्परार्थ विज्ञान ॥

भवभीति शिशिरपीडा कश्चन बालातपो [1] हरतु ।
घननीलकान्तिरुचिरो नवपीताम्बरमनोहरालोक ॥

मम कापि जागरूका मनोनभसि कृष्ण रासमण्डलराका ।
राधाचन्द्रास्तु निशा गोपवधूशतसहस्र किरणानीका ॥

द्वितीया

घोषाकाशव्याप्तां हलिवासरकृष्णरजनिसंयोगाम् ।
सन्ध्या वन्दे महिता शुभामपूर्वा मपश्चिमा काञ्चित् ॥

नाना प्रकार भूत प्रक रादभुत भूमिकाभूमिम् ।
स्वपदानुग जन जीवन मज्ञानतमोपह तेज ॥

करुणापवन मुरलीराव लावण्यसिन्धु विष्णुपदम् ।
वहुमन्ये पञ्चमहाभूतमयमभौतिक तत्त्वम् ॥

तृतीया

अपगतससारभया कयापि सनिहितगोपिकया ।
प्रभया वय सनाथा. शुभया नव वारिवाह सनिभया ॥

---

[1] *सूर्योदये कश्चनमेघोपि समीपवर्ती भवेत । नीलकान्तिरयमपूर्वो बालातप इति चमत्कार ।*

एकान्तध्यानयुता कारूण्यलसत्कटाक्षवता।
पाणिपुटे वशवता दरस्मितेनामृताशुकान्तिजिता ॥

मम नाथ मनोबृन्दाधिहारिणी विरहिणी विहिता।
स्वात्मप्रवणा भवता भवतादागधनाराधा ॥

चतुर्थी

अक्रूर कृपानिधये चक्राहत गजविरोधिनक्राय।
परदैव विशेषाय ज्ञानद्युति विहित मोह मोषाय ॥

रथभूत[1] सुपर्णाय स्पृहयाम्यैश्वर्य शक्ति परिपूर्णाय।
विहित चतुर्वर्णाय स्वस्मोदरीत्व परितोषितापर्णाय ॥

मरकत मणिगणरुचये शरणागत वत्सलाय सौख्यभृते।
बृन्दारकवैरिजिते बृन्दावनगोचराय डिम्भाय ॥

मोदप्रदाय करुणामोदवहविलोचनारविन्दाय।
सच्चिद्रूपाय नमो हासध्वस्तान्तरङ्गतापाय ॥

पञ्चमी

असुराणामविषह्यान्महतो महसो मनोऽनूह्यात।
गोपीदृशावलेह्यात् खगवाह्याद्राधिका साहचात् ॥

करुणालहरीतुङ्गात सरसिजमधुमधुरचरणजनिगङ्गात्।
दैवतगणमूर्धन्यात् प्राधान्यान्नन्दघोषभूजन्यात् ॥

नन्दितनन्द कलत्राद् वन्दितनिटलाग्निहोत्रभासुरनेत्रात
सौन्दर्य निन्दित नवीनेन्दुच्छवि विकसितासिताम्बुजपत्रात् ॥

भावुकजन सौजन्याद् द्रावित लोकापकारि राजन्यात्।
शीतलदृक्कसपाताद् ध्यातव्यपवित्र गुणजातात ॥

करतल धृतनवनीताज्जगतीरङ्गस्थलीनटनात्।
दैव नान्यज्जाने दिशाम्बराज्जानुपाणि पर्यटनात् ॥

षष्ठी

अधरादृत यमुनातट भूरुहमुरलीकरारविन्दस्य।
मूर्धालकरण सभाजित भारतवर्ष विहग [2] बर्हस्य ॥

---

1 *भूतशब्द उपमार्थे।*
2 *मयूर* National bird

निगम वचो गोपालस्याजाण्ड कदम्ब मूलस्य।
योगकलारासस्य प्रणवस्वरवेणुगानलोलस्य ॥

मृगनाभितिलकफालस्याशेष जगद्विधान लीलस्य।
भाग्यवता धरणितलस्वर्गस्य पदाम्भुज नौमि ॥

कमपि विलास कलये मायागूढस्य कृष्णचोरस्य।
येनाज्ञानावरण हृतमम्बरकैतवाद् व्रजस्त्रीणाम् ॥

गणयामि गुणान् शौरेर्महामहिम्न परमधाम्न ।
सकर्षणानिरुद्ध प्रद्युम्न मयस्य वासुदेवस्य ॥

मायामयकारणतनुसहितस्यानन्दघनपयोराशे ।
प्राज्ञस्य सुप्त्यवस्थालीनेन्द्रियचित्तवृत्तिजालस्य ॥

सप्तमी

इन्द्रोपलसच्छाये चन्द्रकविजितेन्द्रकार्मुकच्छाये।
सान्द्रघनस्वानाधिकमन्द्रस्वर मुरलिकामहोपाध्याये ॥

कनकाम्बर कलिततनौ नीलाम्बर कैतवस्वकान्तियुजा।[1]
बलभद्रेण समेते काञ्चनमौक्तिक युतेन्द्रनीलरुचौ ॥

करुणासुधासमुद्रे मोहितरुद्रेनुरक्त बलभद्रे।
परमानन्दविकासे परिणतरासे त्रिभङ्गिविन्यासे ॥

कलितयशोदामोदे कस्मिश्चन भक्तकल्पतरुभेदे।
महति सदानन्दगुरौ मञ्जिमसभार आपदुद्धारे ॥

लुलितमनो मालिन्ये दलितेन्द्रब्रह्मगर्वकाठिन्ये।
सकलजगदेकनाथे वशसनाथे सरसगाथे ॥

शरदनुगत वर्षासमयापाण्डु घनोज्ज्वलासिताभ्रनिभे।
साग्रजकृष्ण मराले निष्कल्मष मानसान्तसचारे ॥

वल्लवसङ्गसगन्धे मोचितवसुदेव देवकीबन्धे।
लीये ज्योतिषि परमे पीताम्बरशोभितस्कन्धे ॥

---

1 *समीपस्थकृष्णरूपमेव बलरामशरीरे नीलाबरकैतवेन भाति।*

अव्यय मव्यवहार्य भव्यतम मशेष चिदचिदाहार्यम्। [1]
अव्यक्त पदमव्यादव्यवहितचित्तवृत्तिपरिचेयम्॥

आनन्दलक्षणमये नानादृश्य प्रदर्शनारम्भम्।
आनतजनरक्षणमज्ञानविलक्षण मज व्रजे डिम्भम्॥

आवरणव्यतिरेक भावयति मन. प्रसाद परिपाकम्।
भावुकचकोरराक चाविर्गत लोक मेक मालोकम्॥

ईश्वर हिरण्यगर्भौ विराडपि च यस्य शक्तिलीलाशा ।
कलये ब्रह्म समष्टि सचेतनाचेतन कृष्णम्॥

एकाश तुलितलोक भीकरभवतारक प्रवेकमजम्।
गोपीभूतलनाक ज्योतिर्वजगोचर वन्दे॥

एकीकृतनानात्व स्वीकृत गोपत्व मात्मपरत्वम्।
दूरीकृतमिथ्यात्व शरण मम किमपि दिव्यत्वम्॥

[2] अन्त.पुरीकृताखिलभूतग्राम भजामि घोषारामम्।
तुर्यातीत सुधा-क्षर मनघ कृष्णाक्षर प्रपन्नाराध्यम्॥

कलयामि योगमाया साहित्यमचिन्त्यवैभव किमपि।
श्रुत्यन्तपरमसत्य व्रजसुखसौहित्य मार्तिराहित्यम्॥

[3] क्षालित हृत्कालुष्य पालितमानुष्यमसुरपारुष्यम्।
मुरलीरववैदुष्य निगमाना किमपि भावये भाष्यम्॥

तापसजनतासौम्य गोपीहृदयैक काम्य मतिरम्यम्।
प्रापितसुखपारम्य पापागम्य भजाम्यमृतहर्म्यम्॥

निगमेभ्य श्रोतव्य मतिमद्विबुधान्तरङ्गमन्तव्यम्।
यतहृदयध्यातव्य सततद्रष्टव्य माश्रये भव्यम्॥

---

1 *आङ्गिकभुवन यस्य वाचिक सर्ववाङ्मयम्।*
आहार्य चन्द्रतारादि त वन्दे सात्विक शिवम्॥ इत्याद्यनुसन्धेयम्।

2 *अयमार्या-भेद कन्दपद्यमिति आन्ध्रसाहित्ये सुप्रसिद्ध । माघेऽपि 4-48,5।*

3 *भक्ताना हृदयकालुष्य क्षालनविषयमवधार्यम्। भगवत कालुष्यस्यैवाभावात्। एव विधेषुसर्वत्रेदृश्येव योजना। असुराणा विषये पारुष्यमेव मूर्तीभूतम्।*

निपुणार्जितनिक्षेप स्वपरभिदातीत भूमसक्षेपग ।
विगतमनोविक्षेप रादयाद्रत वालरूपमभिवन्दे ॥

परम करुणा निकेत पराभिध कृष्णरूप परमार्थम ।
पश्यन्त्यादि विभूति कलये सचराचरात्म सभूतिम् ॥

परिचित गोपकवेष परिपालित घोषमुदित भवमोषम ।
परमानन्दोन्मेष परदेवविशेषमाश्रये कञ्चित ॥

पाटित किल्बिषवार शाटीकृतजलद कान्ति समुदारम् ।
नाटित मनोमयूर भजे मह सदयनीत भवपारम ॥

भावे भावे भात गगनापममात्मतत्त्वमाकलये ।
करुणानिलय विषयप्रलय परमेश्वराङ्घ्रिवारिरुहम ॥

विश्व प्राज्ञस्तजस इति रूपभिदा यदात्मपदमेव ।
व्यष्टिगत प्रतिभाति व्रजामि त देवत शरणम ॥

श्रोतव्यगीत मनिश ध्यातव्यपदाम्बुजात मह मीडे ।
द्रष्टव्य रुचिस्फीत मन्तव्यगुणप्रभूतमात्मानम् ॥

सुखयतु सुगुणसमूहो व्रजगोहश्चित्रनीलिमा कश्चित् ।
सुजनावन सन्नाहो जगदिन्दु निभास्य कान्ति परिणाह ॥

मायाकृत परिमाण पुराण माभीर सुन्दरी प्राणम् ।
परमार्थ बोधशाण भवेन्मह किमपि मे शरणम् ॥

मुरली सामाध्ययन स्वर नव वाणी विलास चतुरास्यम् ।
कलये ब्रह्मवतम श्रितजन मानस सरोहसम् ॥

व्रजवनितामोहन मण्डजलोकाधीश वाहन सुखदम् ।
मुखपद्मवेणुरोलम्बजरवरसदोहन वन्दे ॥

लीलालहरी

अगणितसुगुणनिकाय विगलितमाय व्रजाङ्गनागेयम् ।
सभावये यशोदानिर्गाडितकाय मनोऽमेयम् ॥

अवलम्बित गोपवधूचेल ध्यायामि बालगोपालम् ।
मुरलीलोल कञ्चन श्रुतिरञ्जनकिङ्किणीजालम् ॥

[1] अहिवरफणाग्रनटना दखिलाहि शिरांसि पादमुद्राभि ।
योऽलचक्रे देवो विहिताहित भद्रमाश्रये तमजम् ।।

आभीरवधूखेलन मखिल जगत्पालन कृपाकलनम ।
उन्मूलन च जनुष शरण श्रीकृष्णचरण मवलम्बे ।।

कसत्रास कलये ससाराध्यासमच्छताभ्यासम् ।
असातपीतवासो मासलभास दयावासम् ।।

क्षरदमलदुग्धधाराधरकाय गोपसुन्दरी ध्येयम ।
नौमि व्रजे चरन्त नयनवता भाग्यराशि मुद्यन्तम् ।।

गलिताज्ञान कलये कलाप विजितेन्द्रचाप महिमानम् ।
गोप कञ्चा जलदा रव जित्वर वल्गावश निस्वानम ।।

गोपीजुष्टविलास तापत्रय हरमनोज्ञदरहासम् ।
यापित भवप्रयास तापिच्छाभासमाश्रय देवम् ।।

चिकुर शिखण्ड मृददन वांकताम्बा लोकितानना्बुरुहे ।
पर्कटिरा कमल भवाण्ड विकलित दधिभाण्डगाश्रयेऽखण्डम ।।

दण्डितदृप्ताखण्डल मण्डजरथ मतनु रास मण्डलमीडे ।
भण्डनभयद पराक्रम खण्डित शात्रवनिकाय मम्बुदकायम् ।।

दुरितोदन्वदरित्र मुरली मधुपाश्रितास्य शतपत्रम ।
उरुपर्वतातपत्र शरणमये किमपि गोपसौभ्रात्रम् ।।

दूरीभूत विकल्प धाराधरकल्प माश्रितावलिकल्पम ।
ऊरीकृत शिशुजल्प क्षीरोदधितल्प मद्भुत कलयामि ।।

परदुर्लभमाधुर्य शुभचर्य रौहिणेय सोदर्यम् ।
आर्यमये भवतारण चातुर्य निगमतात्पर्यम् ।।

पीताम्बर सवीता गीतामृतसार वश सगीताम ।
आततकरनवनीता ह्रज्जाता चेतनां कलये ।।

दृश्यविवर्ता परिहृत ससृतिगर्ता [2] विरिञ्चिकमलावर्ताम् ।
कलये शैशव वार्ता कामपि धूर्ता व्रजान्तसपरिवर्ताम् ।।

---

1 *सर्पफणोपरि पादसदृश चिह्न दृश्यते। अहितानामपि अनुग्रहप्रद इति।*

2 *चतुर्मुखोत्पत्तिस्थान नाभिकमलमावर्तसनिभमत्र सूचितम।*

मञ्जुलतासेचनक मुष्टिकचाणूरभञ्जन नौमि ।
कञ्चन कञ्जविलोचन मञ्चित वेणु मधुरिमाणम् ॥

मुदित यशोदानन्द विदिताखिलवेदितव्यधीबृन्दम ।
सदयस्वान्तस्पन्द यदुलोकानन्दमाश्रयेऽमन्दम् ॥

मूर्तीभूतकृपासस्फूर्तिनिकेतन मपास्तपूतनमीडे ।
निश्शेषोद्धुत ससृति जूर्तिरुजायातन व्रजालयबालम् ॥

[1] वपुरवधीरित दूर्व क्षपितासुरगर्वमाश्रयेऽपूर्वम् ।
उपनतजनदुक्पर्व व्यपगतदु स्वप्नमञ्चितानन्दम् ॥

वेदान्त परमसत्ये स्वादामृतवेणुगान सातत्ये ।
मोदेनिशमानन्दप्रादुर्गतजीवगोपसागत्ये ॥

व्यत्यस्त पदन्यास नित्यात्मकला निवास मभिवन्दे ।
अत्याश्रमिहृद्वास सत्येतरभुवन मण्डलाध्यासम् ॥

व्रजमन्दिर नैकटच भुजगफणानाटच मर्भक वन्दे ।
निजमहिमप्राकटच भजनविमुखचित्तवैकटच्यम् ॥

शिखिपिञ्छ शक्रचाप सुखिचातकसेव्यमानघनरूपम् ।
अखिलागमैकदीप सखितादृतगोप महमीडे ॥

श्रावितमङ्गलगीत पावित पद भक्तजातमतिपूतम् ।
जात कञ्चित् कलये दुस्तर भव वाहिनी पोतम् ॥

सुरुचिरवल्लवकान्ताकरतलशब्दानुकूलनटदङ्घ्रिम् ।
जगदङ्क सूत्रधार भृशलौल्य किमपि भावये बाल्यम् ॥

सेवित वेणु करसभावित गोवर्धनाद्रि परमाणुम् ।
भावयति कञ्चनार्भक माविष्कृत विश्वरेणुमयमात्मा ॥

स्फुरित मनोहरबर्ह करतलनवनीतमधुरकबलार्हम् ।
दुरिताचारविगर्ह मुरलीसराव माश्रये दैवम् ॥

ऋद्धि कामपि लिप्से श्रीराधा प्रणययोग सिद्धिमहम् ।
ध्वस्तभवतमोवृद्धि हार्दसमृद्धि मुमुक्षुसुखबुद्धिम् ॥

---

1 *सहस्रपरमादेवी शतमूला शताङ्कुरा ।*
सर्व हरतु मे पाप दूर्वा दु स्वप्ननाशिनी ॥ इत्याद्यनुसधेयम् ।

कलयेऽमलिन पुलकित पुलिन रासेश्वराङ्घ्रि नव नलिनम् ।
चुलुकित सलिल रेखावलिन सवर्तिकातलिनम् ॥

नुतरा[illegible] कारुण्यम् ।
यतिबोधप्रावण्य प्रावीण्यं किमपि कलयामि ॥

बृन्दावनसचार वल्लभवल्लवविलासिनीजाग्म ।
बृहदारण्यविचार बहुमन्ये दलितससारम् ॥

मोहातपोपरागं प्रियतमराधानुरागपरभागम् ।
कञ्चिदुपासे योग [1] शुभप्रयोगं सुषिररागम् ॥

व्रजकेतन स्वभृत्य व्रज करुणावेतन यशोदावत्सम् ।
वशविवश गोवत्सं वन्दे ससारभ्रुद रोगचिकत्सम् ॥

रतिपतिजयिगात्र मघाततलतिका दात्र [2] मद्भुतक्षेत्रम् ।
अनघचरित्र कलये सन्मित्र देवकीपुत्रम् ॥

वेणुकला पारीण पाणिगनवनीत भूतनिर्वाणम् ।
करुणाक्षीण कलये राधाप्राण प्रपन्नकल्याणम् ॥

वशीलोल कलये करुणावाल कलिन्दजा तट खेलम् ।
आभील दनुजाना माभीरवधू प्रलोभनाद्भुतलीलम् ॥

श्रीराधारूपसुधा कासार विहार सतताशसम् ।
कलयामि कृष्णहस सदसद्रूपाविवेकविध्वसम् ॥

साधुप्रशसमनिश कञ्चन कलयामि दिविषदवतसम् ।
साधितपापध्वस प्रियतमराधारिरसं च ॥

सुचरितवल्लीकन्द परिचितबृन्द मुकुन्दमाकलये ।
राधानन्दममन्द लावण्य सुधारस स्यन्दम् ॥

रूपकलहरी

अतुलितकृष्णवसन्त यतिकोकिलविनुतिकान्तमश्रान्तम् ।
अपहतगोपीस्वान्त बृन्दासक्रान्तमाश्रये कान्तम् ॥

---

1 *ग्रहयोगविशेषम् ।*
2 *अद्भुतानामाकरम् ।*

आविरतहर्षां मुरलाग्वनवपोयूषमाधुरीवर्षाम ।
कृष्णकमलाप्तदीप्ति [1] भवतापसमाप्तिमभिवन्दे ॥

करुणासाद्र प्रणतोद्धरणातन्द्र महोनिरस्तेन्द्रम् ।
कलये कृष्णाभिख्य व्रजकान्ता तारका चन्द्रम् ॥

कामक्रोधादिरिपुग्रामतृणावर्तमुख्यदनुजगणम् ।
हन्यान्मानसघोषे मम वीर कश्चिदाभीर ॥

कौटिल्य सारल्य हृत्वा कृत्वा च मन्मन कुब्जाम ।
रञ्जयतु दिव्यलावण्यावाल कोपि गोपाल ॥

रचितबुधालिविनोद श्रुत्यन्तवचोविचारशुकसवादम् ।
अत्यन्तसुखोपेत सत्याश्रयकृष्ण पारिजातमये ॥ 501

लीलाकृतिस्वतन्त्र महित कृष्णाख्यमन्त्र माकलये ।
श्रीराधापरतन्त्र चालितपद्मोद्भवाण्डचययन्त्रम् ॥

वटपुट मुरली यमुनातट दुग्ध कलाप गोपतरुणी गोभि ।
हृदयपटे स्फुटचिह्नै रालेख्य किमपि भाति शिशुरूपम् ॥

वन्देय कृष्णरजनीं मोदैकसुधाकरजनिमति विमलाम् ।
स्वोदरगगना भोगा लक्ष्य ब्रह्माण्ड-भ प्रचार जनिम् ॥

वरपीताम्बर सुस्मित शशिरेखा भक्तकल्पतरुशाखाम् ।
निरतचराचर वन्द्या कृष्णाख्या पश्चिमा भजे सन्ध्याम् ॥

वशीस्तनित कमपि श्रावणमेघ स्मरामि शमिताघम् ।
गोपीचपलावलित द्रावितससारजनिदाघम् ॥

शान्तिशशिद्युतिजाला स्वान्तमपूर्वा मनोज्ञशारदवेलाम् ।
चिन्तयति कृष्णलीला सन्ततकरुणापगाप्रसादविशालाम् ॥

श्रुतिमस्तकावतस ललित कृष्णोत्पल दयामधुरम् ।
परिमलता मे चेतोलतोद्भव वेणुभृङ्गसङ्गीतम ॥

निवेदनालहरी

आयुर्हरससृतिविष कलुषपयो यातना शिशु कश्चित् ।
हन्यादमेयमहिमा मदविद्यापूतना कृपया ॥

---

1 *सूर्यकृता तापसमाप्तिरिति विशेषोक्तिविभावनालकारयो सदेहात्तुल्यबलत्वात सकर ।*

उच्चै पदसोपाना कापि लिपिर्मुद्रितास्तु मम हृत्फलके।
कृष्णाक्षराभिधाना सच्चित्सौख्यानुभूति मतिसधाना ॥

गोपवधूविरहातपसाद्र श्रीकृष्णपूर्णिमाचन्द्रम। [1]
शुभ-कमलाकरबोधनमघवार्धिनिरोधन वन्दे ॥

गोपवधूसोभाग्य तापस सप्राप्य भूरितम भाग्यम्।
कलये किञ्चिदपूर्व व्रजगगने कृष्णनक्षत्रम् ॥

गोपन्द्र नन्दनन्दन-नन्दन मार्तहरिचन्दन वन्दे।
गुणऋतुषट्कानन्दन मनुकम्पा स्पन्दन सततम ॥

चेतोवृत्तियशोदा कुर्यात् पुलकाङ्कुर प्रसादा मे।
व्रजशिशुवपुरालिङ्गन सस्पर्शो मुग्धसुकुमार ॥

नवजलदरुचिस्फीत मच्चेतो दुग्धकलशमथनोत्थम्।
वारित भवगदजात विन्देय मधुरकृष्णनवनीतम् ॥

निरतजगन्निर्वाह परमकृपाक्षीर जलधि परिवाहम्।
कलये निरस्त भवदुर्भरदाह कृष्णवारिवाहमहम् ॥

प्रकटात्मबोधसार सकलान्त करण वृत्ति गोपीभि ।
हृदये खेलतु कश्चित् गोपकिशोर कृपापूर ॥

कृष्णश्चरन् सुषुम्नाबृन्दामार्गे स्वनद्वेणु ।
रञ्जयतु रासकेल्या मम चेतो वृत्तिराधिकामनिशम् ॥

गलित मनोमालिन्य दलितेन्द्रब्रह्मगर्व काठिन्यम्।
कलित दया प्राधान्य स्खलितान्य स्फुरतु चैतन्यम् ॥

चेत प्रसादयतु मे पीताम्बररुचिर मूर्तिरुरुकीर्ति ।
धूताशातिमिरार्ति काचिदुष.कान्तिरपगतभ्रान्ति ॥

पुलकयतु चित्तयमुना पुलिन मम बालकृष्ण पद नलिनम्
आशावकाश मखिल परिमलयदनुग्रहाभिनवगन्धै ॥

प्रारब्ध शिलासार व्यपोह्य मायेन्द्रजाल विस्तारम्।
ज्ञानोदयगोवर्धनकरोऽस्तु मम कोऽपि गोपवर ॥

---

1 *एवमादि प्रयोगेषु विरुद्धधर्मशालितावर्णनाच्चमत्कार । असभावितोपमेति काव्यादर्श II-39 कृष्णनक्षत्र कृष्णनवनीतमित्याद्यपि दृश्यते।*

यमलार्जुन भञ्जन मनुजन्मसुभद्रार्जुनेकरञ्जन मिद्धम ।
ज्ञानाञ्जन दिशेन्मे कल्याण कृष्णरूपमनघै साध्यम ॥

विकसतु मम हृदि कस्यचिदर्भकरूपस्य दिव्यगोपस्य ।
सुमगुच्छ [1] करपद्मानीतपदाम्बुजसनाथवदनाब्ज ॥

विततहङ्कारोरगदुर्वृत्तिफणावमर्दनिपुण मे ।
सर्वजगन्नाटचविदो नृत्यतु बालस्य पादाब्जम् ॥

विषयविषवलयकागबद्ध बोधात्मक शिशु कश्चित् ।
ससारकसभीत विमोचयेन्मन्मनस्तातम ॥

शमयतु कर्मदवानलमुत्तमधीगोपिकातटिज्जाल ।
करुणा सुधालवालो घननील कोपि गोपाल ॥

सद्वृत्तिधेनुगोपन दुश्शीलविधि तृणीकृत्य ।
सन्मतिगोबृन्द मे कश्चन बाल पुन प्रदर्शयतु ॥

साक्षात्कार किञ्चन कैशोर दिशतु सूर्यशशिनेत्रम् ।
अक्षिविजित शतपत्र व्रजमित्र मम विचित्रचारित्रम् ॥

सुन्दरबृन्दालम्ब निरत भक्तावना विलम्ब मे ।
चुम्बतु हृदय किञ्चित् बिम्ब वदनाञ्जवेणुरोलम्बम् ॥

स्वपद प्रवण कुर्याद् वल्लवविभुरक्षपाण्डवप्रकरम् ।
विक्षेपावृतिशङ्काभ्रमदुष्टचतुष्टय हित्वा ॥

श्रीकृष्णसुधाशतक
मुदेऽस्त्विद सर्वदेवतामूर्ते ।
मम चास्तु जन्म बन्ध -
न्छिदे कृपा तस्य जलधरस्फूर्ते ॥

शतक कृष्णस्येद
स्वरूपलीला निवेदनारूपै ।
लहरी भेदैर्मधुर
भवतु विनोदाय नन्दशिशो ॥

---

1 करारविन्देन पदारविन्दमित्यादि कर्णामृतपद्यमनुसधेयम् । Bouquet of lotuses

कृष्णकृपाशतकम् -1

कृपा वैलक्षण्यम्

परमेश तव विभूतिषु गणयामि कृपामनन्य कमनीयाम्।
सपद्-विद्यादिषु या प्रभुता सा नास्ति यत्र लोकानाम्॥

ज्ञानश्री विभवादिष्वहङ्कृरोत्येव मानव प्राय ।
तव करुणा मग्नश्चे न्नहि कचिदपि स्मरेदहकारम्॥

भवदीयेष्वपि विद्याविभवेषु "ममे" ति वक्तुमुत्सहते।
न तथा करुणाविषये प्रभवेद् वक्तु च मन्तु च॥

भगवत्कृपया प्राप्त धनादिक मन्यते सर्व ।
नतु "मम कारुण्या" दिति यदि हि वदेद् हास्यतामीयात्॥

कृपा भक्ति गोपालिका

मम साधुजीवनार्थ ज्ञानशिशो पोषणार्थमपि कृष्ण।
गोगोपीवृन्दाना पालक बहुरूप नामधेयानाम्॥ [1]

भक्ति मे कामगवी [2] करुणा गोपालिका च देहि तव।
यदि पालिकैव न स्यादितस्तत स्सचरेद् धेनु ॥

गोपालिका यदि भवेद् रक्ष्येत तया समानीय।
मम चात्मनिलयगोष्ठ बदध्वा भवदङ्घ्रिगोचरे सा गौ ॥

कृपाया महामहिमत्वम्

कृष्ण त्वदीय करुणा शब्दस्पर्शादिभि शून्या।
परम ब्रह्म च नित्य शब्दस्पर्शादिभि शून्यम्॥

वखर्यादि विलक्षणरूपा कापि स्फुरत्यशब्दमयी।
वाचा सरणिरपूर्वा करुणाख्या तव परेश परसौख्या॥

[3] भव्येच्छा तनुमानस सत्त्वापत्त्यादिभूमिकाभिन्नाम्।
वन्दे भवतोऽपूर्वामनुकम्पामष्टमीं भूमिम्॥

---

1 *गृहपशुपक्षिणा प्रीतिपुरस्सर नामधेय (Pet Name) दान दृष्ट हि लोके।*

2 *भक्तिनाम्नी काचिद धेनु, सैव धेनुरिति च। करुणानाम्नी कापि गोपी सैव गोपी चेति।*

3 *शभेच्छाद्या योगभूमिका ।*

काचित्करुणाभूमिर्लसति मनोमोहकारिणी भवत ॥

अङ्गीकरोति रक्षति विनोदयति नेकरूपलीलाभि ।
त्वा शरण भजमान करुणा मातेव मायेव ॥

नि स्वस्तृष्टि गच्छत्यनक्षर प्राकृतोपि विज्ञानम् ।
निर्वात्यमग्णधर्मा दयया ते पाञ्चभौतिकोऽपि च सन ॥

लब्ध्वा भवत्प्रसाद प्रासाद सुखमुपेति तरुमूले ।
तृप्ति करतलभिक्षो निश्चिन्ताह्न्यन्नगान वासेषु ॥

आगत्स सुख लभते सपत्स्वपि विमुखता परा भजते ।
भवदीयदया कवचो निर्भीकश्चरति भक्तस्ते ॥

विद्याश्री कीर्तिकरी स्फूर्तिकरी वाञ्छितार्थ सिद्धिकरी
करुणा कल्याणकरो मोक्षकरी भवतकिंकरी भवत ॥

अकूरापि कूरा करुणा तव दुर्विदग्धहृदयेषु ।
कूर चाप्यकूर करोत्यचिन्त्यप्रभावादया ॥

कठिनो भवति हि मृदुल कठश्च मधुरोपि करुणात ।
आर्द्रीभवति हृदय पतितश्च धातुश्च ॥

कृपाया अन्यविभूतय

माचीकृत्य समाशा-तागिस्रलता प्रगह समरामयम् ।
गत्यहमार्ग दिशता दृक्कम्पा तव विलाम्जितगम्पा ॥

अन्तलकक्षयराहु कृपामृतभर व्रजाङ्गनातारम् ।
भुविहर्षित मदापूर्ण कृष्ण माया-निशाकर नामि ॥

उदित तव प्रसादे सशयनक्षत्रकोटि चाञ्चल्या ।
परमार्थभ्रान्तिनिशा गनोनभसि मे तिरो भूयात ॥

अवतीर्णाया तावक करुणाया वाञ्छनीय किम् ।
स्वपिमि श्वसिमि प्राणिमि खादामि पिबामि विहरामि ॥

त्वदपाङ्गकृपायमुना मम काव्यसरस्वती नीत्वा ।
कृष्ण स्वपदाम्बुजमधु मन्दाकिन्या त्रिवेणिका सृजतु ॥

राज्ञीभूय कृपा ते विदारयतु मदन्तरिन्द्रियपुगम् ।
वशीभूय पुन सा विनोदयतु मे मनो गोपीम ॥

भवदीयकृपालहरी सगीतरवोपललितो देव ।
स्वमपीतो भवतु मम स्वान्तशिशु र्विविधशोकपरिभूत ॥

निर्भर्त्स्य वृजिनरक्ष श्चेतो बालस्य दुर्बलस्य मम ।
विदधातु कृपा भूतिस्तव नामजपाभिमन्त्रिता रक्षाम् ॥

कृष्णपददयागङ्गा सुखचित्परमार्थसस्य पौष्कल्या ।
विषयदवाग्निप्लुष्ट प्लावयतु मदन्तरङ्गमरुभूमिम् ॥

दुर्विषयकर्दमस्थ चित्त सतापयेत्त्वदीयो मे ।
करुणातपो महोग्रो वैराग्योल्लाघता कृत्वा ॥

सक्रोधलोभमोह कृष्णकृपास्पर्शविधिशिला ।
कुर्यान्मे धूतमल [1] सुजातरूप मनोलोहम् ॥

करुणा कान्तशिला ते भिनत्तु मम चित्तपिण्ड [2] मिदम् ।
भववातावरणभवान्मुच्येत यतो हि रागमालिन्यात् ॥

ना कृष्णत तथाहो हृदय न भवेदयोपि मम ।
किं नु स्यात्पाषाण [3] किं साधनमस्य शुद्धिविधौ ॥

अथ वा विदारयतु मे मानस पाषाण काठिन्यम ।
राज्ञीभूय कृपा ते गोपालमहेन्द्र वीररस सान्द्र ॥

कृष्णानुग्रहरूपो हृदि भायादिन्द्रनीलमणिदीप । [4]
विषयज्ञान विभेद हत्वा च विधाय [5] सप्रसाद मे ॥

लुप्तविषय कल्माषो लिम्पतु मम चित्त [6] फलकतलम् ।
एको वर्ण कृष्ण [7] प्रत्यग्रचित प्रकाश परिपूर्ण ॥

---

1 *शोभनकाञ्चनम् ।*

2 *पिण्डम् =अय पिण्डम्, रागमालिन्यम् ।* = Rust of lust *(ताम्रवर्णमयोमलम्)*

3 *श्रीरामकृष्णबोधेषुशिलाप्रतिमादृष्टान्त ।*

4 *शय्यागृहे नीलप्रभो दीप* (bed light)

5 *सप्रसाद आत्मानुभूति निद्रा च ।*

6 Black-board or slate

7 *प्रत्यग्र चित प्रकाश । प्रत्यक्-रचित प्रकाश । नूत्न प्रकाश, प्रत्यगात्मप्रकाशश्चेति ।*

सम्पृष्ट भ्रस्मालाप श्चित्तफलकगा ममास्तु कृष्णलिपि
करुणाद्रव सिक्ता ते परमात्मपदावबोधने शक्ता ॥

विषयानुभवारण्ये भ्राम्यन्त मेन्तरङ्गगोवत्सम् ।
धैर्यस्तम्भे बद्ध्वा कुरु देव दयैकगोचर स्वस्थम् ॥

भवनक्र वक्त्रलग्न मोचयतु मदीयचित्त मत्तेभम् ।
करुणाचक्राकुण्ठितधारा वैकुण्ठनाथ तव ॥

विधिवञ्चितानशेषान् पुनातु सस्कार्-सगरपुत्रान् मे
करुणागगनधुर्न ने यतो भवेय भगीरथश्चायम् ॥

कृपया करोतु भगवानालस्याघासुर भित्त्वा ॥
अनघस्वरूपवृद्धि स्वान्त मे सत्क्रियाशीलम् ॥

ससृतिघोराभ्रमृत सजीवयतादनुग्रहामृतधारा ।
मानसपरीक्षित मे श्रीकृष्णकटाक्षनव्यजलदाधारा ॥

ननु निर्दया दया ते निरङ्कुशा देव या हरति ।
स्वातन्त्र्यमाश्रिताना कर्मणि वचने च सकल्पे ॥

सेय भवत करुणा मयि विलसति देव विश्वरूपवती ।
सर्वत्राकिंचनतामूर्ति सुखकीर्तिविभवसाकल्ये ॥

ननु निस्त्रपा कृपा ते धावति बालेव यस्य कस्यापि ।
यश्चाह्वयते निकट निष्कपटा कौतुकान्मौग्ध्यात् ॥

हिमकरकिरणपयोधरधारासदृशा भवत्करुणा ।
अनवेक्ष्य चोच्चनीच पतति हि सर्वत्र सर्वेषु ॥

स्वैराचारा करुणा पात्रापात्रे च चिन्तयेन्नैव ।
य य वृणोति तस्मिन् लगति परा चापि तुष्टिमावहति ॥

कृपाया: सर्वगतत्वसर्वमयत्वे

कुत्र न दृश्येत कृपा नन्दालयवास निर्गतत्रासा ।
भूमिचरी व्योमचरी समस्तजीवान्तरङ्गचरी ॥

अनिलानलसलिलचरी सोमचरी तिग्मधामचरी ।
कि कि न भवेद् भवत सर्वान्तर्यामिणी करुणा ॥

यदभाव भावयितु शक्नोति नगे न युक्तिशतै ।
कर्ममयी धर्ममयी ब्रह्ममयी भूर्युपाप्तिमयी ॥

अर्थमयी काममयी मोक्षमयी सकलपूरुषार्थमयी ।
स्वादमयी नादमयी वेदमयी सर्वतन्त्रसारमयी ॥

शिल्पमयी कल्पमयी चित्रमयी चारुकाव्य गानमयी ।
आङ्गिक वाचिकसत्त्वाहार्याभिनयाभिरामनाटचपयी ॥

सर्वरसमयत्वम् ।

एको हि रस करुणा तव देव रसान्तर सर्वम् ।
भवति प्रकृतिसमाना रसज्ञपुरुषस्य भोगार्थम् ॥

स्नेहो भवति कृपा ते कैशोरे सहचरेषु गोपेषु ।[1]
गुरुनिचये वात्सल्य भक्तिश्च पदाम्बुजानुरक्तेषु ॥

हास्यो रुक्मिविषयको लोकेषु च विस्मयोऽनल्प ।
वीरोर्जुनादिषु महावीरेषु शमान्वितेषु शान्तरस ॥

कसादिषु रौद्रात्मा पापेषु भय रिपौ च बीभत्स ।
राधाया तादात्म्य [2] रासप्रिय गोपिकासु शृगार ॥

कृपा शृङ्गारसखी ।

स्वान्ताभीरवधूटी लभता विरहातुरा ममापि हरे ।
अन्याभीरवधूवद् दक्षिण भवत प्रसाद दाक्षिण्ये ॥

मुग्धा मम हृदय वधूस्तव पदपरिचारपाटवे शिक्षाम् ।
करुणासखी प्रदत्ता लभता समानपात्रता चापि ॥

मम चित्तवृत्ति वासकसज्जिकया नाथ सगमो भवत ।
करुणासख्युपनीतो भवतूत्कलिकोज्ज्वलात्म मन्दिरया ॥

कामक्रोध मदादिकखलनायक विप्रलब्धखण्डितया ।
लभ्येत धियाश्वासो मम ते कारुण्यदाक्षिण्यात् ॥

भवदैश्वर्य विचारक नानाविधतर्कवाद कलहान्तरिता ।
विस्रम्भमेतु मम धी कृपावयस्योपदेशतो भवत ॥

---

1 *गोपादय तत्तद्रसरूपाया कृपाया यथोचितमाश्रयविषयत्वेन ज्ञेया ॥*

2 *करुणा साक्षाद राधैव देवी । भागवत X -43-17 मल्लानामशनि*

अभिसरतु तव समीप निजरूपध्याननीलपटी।
करुणासहायिनी मम चित्ततमिस्राभिसारिका रभसात्॥

आर्जव धवल सुवेषा ममधीज्योत्स्नाभिसारिका नयतु।
करुणासखी तवान्तिकमनपायविविक्तमार्गेण॥

येय दूतीकरुणा प्रोषितपतिका धिय मम सा।
प्रापयतु तव समीप कान्ताना प्रियतमस्य कान्तस्य॥

स्वाधीनपतिर्भवताद् भवतैव मदन्तरङ्गभीष्मसुता।
कारुण्यविप्रदर्शित सोभाग्यगुणानुकूलेन॥

देवतामयत्वम्।

करुणा कमलभव ते कलये यद्रस सरस्वती जयति।
यस्या फलमिदमाद्य यदिय ललिता प्रवर्तिता विनुति॥

करुणा कमलाक्षस्य प्रसरश्री र्जयति तव रुचिरा।
सपत्ससर्गहरी वैराग्यकरी परार्थ लाभकरी॥

करुणा खण्डेन्दु धरश्चाविष्कृति [1] सर्वमङ्गलो भवत।
हरतु ममाशुभजात विद्याप्रतिबन्ध सघातम्॥

यस्या यो दृष्टिपथ गच्छति स पुन पय काक्षी।
सपद्येत न, सा तव करुणाक्षीराब्धिकन्यका जयति॥

निरत कृपाभवानीं तव कलयाम्यात्मजौ यस्या।
षण्मुख गजमुखसञ्ज्ञौ बोधामोदावभीष्टकरौ॥ 60

करुणा वाणीं कलये तव लीलावल्लकी यस्या।
सूक्ति सुधासगीतै र्जनयेत्प्रमद प्रपन्नानाम्॥

अर्थोऽसौ शब्दश्च प्रतिभापि च वर्णनापि तव करुणा।
कृतिना मुखपद्ममधु प्रसरा निस्सरति काव्यमयी॥

देवत्रयदेवीत्रय रूपेय सर्वदेवतारूपा।
सद्रूपा चिद्रूपा सुखरूपा तावकीनकृपा॥

अवताररूपता

कलये करुणामीन तव येन मदीयमात्मविज्ञानम्।
उद्धृत्य विमति जलनिधि मध्याद् रक्ष्येत निरपायम्॥

---

1 *आविष्कृति साक्षात्कार एव सर्वमङ्गला पार्वती।*

करुणाकच्छपमीडे तव येन मदीय धैर्य शैलेन्द्र ।
चाञ्चल्य जलधिमध्ये ध्रियेत निष्कम्पसस्थान ॥

नौमि करुणावराह तव यैन मदीय धर्म विद्रोही।
नास्तिक्य हिरण्याक्षो नश्येन्मायामय रक्ष ॥

परित पुरत पश्चादूर्ध्वमधश्चापि दृश्यते करुणा।
क्लेशहिरण्यकशिपुहा नृसिहमूर्ति रिव सर्वत स्फूर्ति ॥

सिञ्च मयि कृपाबिन्दु पूरयतु स एव मन्मनो विश्वम्।
अघबलिविक्रमरम्य परिवाहीभूय वामनौपम्य ॥

निशितकरुणाकुठारस्तव मे दलयेत् कटुप्रसवाम्।
दुर्विषह विषय विषरसविततिं दुरितावनीश्वर व्रततिम्॥

कलये विक्रमशाण कारुण्य रामबाण ते।
भवशोषण सनाह लक्ष्येऽमोघ यश परीणाह्म्॥

कलये कमपि स्तबक सकुमुदमिन्दीवरप्रसून चितम्।
व्रज कासार विकास हलिहरिरूप दयामोदम्॥

वैमुख्य विषाद मे यन्ता हत्वा नरस्य कल्पयतु।
आत्मस्वाराज्य जये सारथ्य कृष्णकरुणात्मा॥

करुणाबुद्धमहिसा देशिकवरमानतोऽस्मि मौनधरम्।
आनन्द सहचर ते नास्तिकजनवञ्चनार्थमवतीर्णम्॥ [1]

करुणाकल्कि कलये तव येन युगान्तकोद्भटाघलता ।
खण्ड्यन्ते पाटवभर कृपाणधाराभि रदयाभि ॥

अतिलोकसुन्दरीय तव करुणामोहिनी जयति।
सौख्यामृत प्रदर्शन वञ्चित वैषयिकचित्तदैतेया॥

पञ्चभूतमयत्वम्

नष्टाज्ञानघन ते करुणागगन प्रकाशयतु।
गलित वितर्क मह्य ज्ञानार्क ब्रह्मसपर्कम्॥

धुवतु मम जन्मसतति सैकतरेणून् प्रभञ्जनीभूय।
कृत्वा परप्रकाश भवदीयकृपा हृदाकाशम्॥

---

1 *भागवतम् I-3*

यस्याभात समस्त भासेद सूर्यचन्द्रतारादि।
नदय ज्योति परम कारुण्य किमपि गोपतारुण्यम्॥

कुर्यात कारुण्यजल तव मे जाड्योपतापशान्त्यर्थम्।
शिशिरापचार विधिभि सुखद चिकित्सा रुगार्तस्य॥

करुणा वसुन्धरा ते प्ररोहयतु मे चिदङ्कुर च हृदि।
विस्तारयतु सुगन्ध पुण्यमयमनामय भव्यम्॥

सर्वकरत्व – सर्वविषयत्वे

किकि न करोति कृपा तव देव मयि प्रपन्न परमाणौ।
ऋद्धिकरी बुद्धिकरी जीवात्म परात्म योग सिद्धिकरी॥

भ्रान्तिहरी क्षान्तिकरी दान्तिकरी चित्तशान्तिकरी।
भोगकरी रोगहरी मृत्युहरी नेक जन्म बन्धहरी॥

चेतन सततोत्सव सक्रान्तिवहा विश्वशान्तिवहा।
गलितद्वेषादिगुणा समाज वैषम्य वारिणी करुणा॥ [1]

कि न कृपाविषयस्ते दृश्य व्रजनाथ भवति लोकेऽस्मिन्।
[2] ज्ञानवती बाल्यवती पाण्डित्यवती कृपा च मौनवती॥

स्थूलवती सूक्ष्मवती बहिरन्तर्भासिविश्व रूपवती।
सदसद्भावाभाव ज्ञानाज्ञानादि तत्त्वकोटिमती॥

भुवनाना प्रभृति स्थितिश्च विलय समस्तानाम्।
भवतश्चेकाभरण भक्ताना शाश्वतिक शरणम्॥

कृपा स्वरूपमेव

सात्त्विकतादिगुणेय जयति सदा तव निरस्त मादृश्या।
अपवादकरी करुणा गुणे गुणो नेति शास्त्र वचनस्य॥

केचन करुणा भवत प्रवदन्ति गुण च शक्तिमेके च।
देवीं रमा समाना मन्ये मन्ये स्वरूपमेवाहम्॥

करुणस्त्व तव करुणा चेत्येष हि वाग्गतो भेद।
शक्तिमदैक्य शक्ते करुणैव त्व त्वमेव सा करुणा॥

---

1 *This is the key of Sri Ramakrishna's message (Yogasutra I-33)*

2 *बृहदारण्यकोपनिषत् 3-5*

त्वत्त कृपा कृपाया भवत्प्रसाद स्तत शान्ति ।
आनन्दोपि च शान्ते ग्न्तत आनन्द एव त्वम् ॥

प्रवहेन्मन प्रयागे कृष्णकृपा मे त्रिवेणिका कापि ।
अधरे शोणा वपुषि श्यामा रम्यहसिते च सिता ॥

तमसा कचे पदे व्रजभवेन रजसा च मनसि सत्त्वेन ।
कामपि नौमि लसन्ती मजडा प्रकृति मुरारिकृपाम ॥[1]

राधाया रुक्मिण्या सत्याया श्चापि शक्तिरूपिण्या ।
प्रकृतिगुण शरीरिण्या कारुण्य नौमि भोगज्ञम् ॥

व्रजसचार निगमव्रजसचार भजामि कारुण्यम् ।
गीताचार्य मुरलीगीताचार्य महाश्चर्यम् ॥

शतकोपसहार

चारूकरोत्यरुचिरा रुचिरा कुरुतेऽपि चारुतराम् ।
करुणे तव लावण्य मनुजस्य तनु गिर मति चापि ॥

रौद्रोपि याति मृदुता प्रतिकूलश्चानुकूलत्वम् ।
स्वार्थपरो दातृत्व शासनमात्रेण ते करुणे ॥

मायानामपि माया परमोऽप्यसि चात्मनामात्मा ।
प्रतिभासि त्व करुणे परमोऽर्थ पूरुषार्थानाम् ॥

यो भावो य शब्दो यच्चापि ज्ञेयमस्ति कार्य च ।
सर्वाणि च पर्याया करुणे तव नाम रूपाणि ॥

नाम च रूप च जगद् ब्रह्म प्रियमस्ति भासते करुणे ।
पूर्णमद पूर्णमिद पूर्णतरासि त्व मुभयात्मा ॥ [2]

न हि भूतभौतिक त्व दृश्य स्थूल च नो सूक्ष्मम् ।
अवशिष्टमेव करुणे यच्चान्यद् भवति तत्त्वमसि ॥ [3]

---

1 *मुरारिरेव कृपा । प्रकृति जडा साख्यानाम् । इयन्त्वजडेति विशेष ।*
2 *सर्व खल्विद ब्रह्मेति श्रुत्युक्ता विचारधारामनुसृत्यैवमुक्तम् ।*
3 *नेति नेतीति विचारमनुसृत्यैवम् ।*

सर्वमपेक्षितमुान ह्याब्रह्मस्तम्बपर्यन्तम्।
नापेक्षते प्रमाण भवती करुणा स्वयस्फुरणा ॥

नास्ति तपो नास्ति जपो न व्रतमपि नो मयि श्रद्धा।
परमार्थकाक्षयाऽह तिष्ठामि दये त्वदालम्ब ॥

कुत्र भवेस्त्व करुणे यद्यस्ति न मादृश पात्रम्।
अहमपि तवावलम्बो भवाव आवा परस्परालम्बौ ॥

वैलक्षण्य महिमा सर्वगतत्वादि गुणसपत्।
सर्वकरतादि धर्मा प्रसवा कारुण्यगुच्छेऽस्मिन् ॥

कृष्णकपाशतकम् - 2

भगवत्कृपाया नवनवोन्मेषकारणत्वम्।

अभिनवभावतरङ्गान्
पूरयति ममान्तरङ्गकुल्यायाम्।
जीवन्नदी कृपा ते
विरतासु पुराणभावलहरीषु ॥

प्रसादादीनां कृपापर्यायतैव।[1]

ईशो वा विष्णुर्वा वारिजजन्माथवा भवतु।
सर्वाणि तव कृपालो कृष्ण यथा नामधेयानि ॥

भवतस्तथा प्रसाद. शासनमथवाप्यनुग्रहोऽथ विधि ।
इच्छा वा सकल्प सर्वे कारुण्यपर्याया ॥

गुणगुणिनोरभेद ।

ज्ञानक्रियाबलेच्छा विलक्षणा ते पग शक्तिम्।
करुणारूपा नौमि स्वभावभूता स्वसवेद्याम् ॥

करुणेय करुणस्त्व केवलमिह लिङ्गतो भेद ।
परम चेक तत्त्व शिवा शिवश्चेति भवति यथा ॥

1 *दयाशतके करुणाया अनुग्रहादीना च भदाऽदि वर्णित कार्यकारण भावादिरूप। अत्र तु व्यवहारसिद्धोऽभेद एव समत।*

श्रुतिव्यवहारौ कृपाप्रमाणम ।

'वृणुते तेन', 'त्यागेनैके', 'धातु प्रसादा' दिति च ।
'जीवन्तीति' च मान टीका-पाठादि भेदतस्तव करुणे ॥ [1]

न कदाप्यभ्युपगच्छति नात्मान कोप्युपालभते ।
'मम दोषसभवेय दु स्थिति' रिति दु ख सक्लिष्ट ॥

भगवास्त्व च कृपा ते निन्दाविषयो नृणा प्राय ।
'निष्करुणो हि भवा' निति लोके व्यवहार एष मानमपि ॥

कृपाया एव हानादानाधिकार ।

जीवति चे दस्ति कृपा नो चेन्नास्तीति मन्यते लोक ।
जीवनवन्मरणमपि स्यात्तव कृपयेत्यविज्ञाय ॥

नास्ति तव दया कामा यदि मे सर्वे न पूर्यन्ते ।
अस्त्यन्यथेति बुद्धि प्रायेण नरस्य सभवति ॥

विपद सन्ति यदा मे नास्ति कृपा, यदि न सन्ति भवति तव ।
इति चिन्तयति मनुष्य स्वार्थैकपरायणो मन्द ॥

भवसि प्रसादसुभगो योगक्षेम यदा वहसि ।
विपरीतकर क्रूरो लोकाभिप्रायमनुसृत्य ॥

इष्टमनिष्ट मिश्र त्रिविध हि फल नृणा भवति ।
अत्यागिनामिति भवद्भगवद्गीतापि वदति यथा ॥

अन्ये कृपाविलासा ।

ध्यान ध्याता ध्येय करण कर्ता च कार्य च ।
ज्ञान ज्ञाता ज्ञेय त्रिपुटीरूपा कृपा तव मे ॥

सधान विच्छेदो वृत्तीना विक्लबत्व मुत्साह ।
आलस्य चोद्योगो भवन्ति भावास्तवानुकम्पाया ॥

---

1 *कठोपनिषत 2-23, मुण्डक 3-2-3, यमेवैष वृणुते तेन लभ्य । नारायणीय याज्ञिक्युनिषत, न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशु ।*

कठ, 2-20, श्वेताश्वतर 3-20, क्रमश 'धातु प्रसादात', 'धातु प्रसादा' दिति च पाठौ । तैत्तिरीयोपनिषत 3-6 आनन्देन जातानि जीवन्ति । एव परमात्मना वरण, परिव्राजकाणा सर्वत्याग,, भूतजाताना जीवनदान प्रसादश्च अध्याहारेण च साक्षाच्च कारुण्यमेव प्रतिपादयन्ति श्रुत्यादय ।

उच्छवासो निश्वासो धृति प्रयत्नो विरामश्च।
तव करुणवमम स्याद् भाषितमपि मोन मास्मित च गतम्॥

आत्मान्तारङ्गमपि मे गात्र पञ्चेन्द्रियाणि सर्वाणि।
दृश्य दर्शनमुक्त कृत मत चापि करुणेव॥

नष्टानि चार्जितानि प्रियमपि वा दुखमनुभूतम्।
अपहाय भवन्ति कृपा नान्यत्[1] तेऽनन्तमहिमाढ्याम्॥

अनुसधात्री करुणा द्वन्द्वाना चित्रवृत्तिभेदानाम्।
प्रत्यभिजानामि यया स्वात्मान सतत तेषु॥

कृपाया अपूर्वत्वम।

वाणी नारद विश्वावसुतुबुरुचारु गीत सर्वज्ञै।
मार्कण्डेयपराशर वसिष्ठवाल्मीकि मुख्यमौनिवरै॥

शकरवल्लभलीलाशुक जयदेवादिभिर्महामान्यै।
[2] रामप्रसादचैतन्यदिभिरभिसनुति च यालेभे॥

ध्यायामि कृपा देवीं परस्य ते हृदयवासिनीमचलाम।
मूर्तिभ्योऽप्यष्टाभ्यो मूर्ति भिन्ना च ता नवमीम्॥[3]

कलयामि तवाविरता ममिता कारुण्यपारमिताम्।
सुगतो यतो भवेन्मे मोक्षपथ कण्टकै शून्य॥

सुखदुखेच्छाद्वेषा द्यात्मगुणेभ्यो विलक्षणं धर्मम्।
करुणारूप कलयाम्यविनाभूत परात्मनो भवत॥

[4] भूतमन कालतमो दिगात्मसमुदायतो भिन्नम्।
अनघगुण तव कलये करुणामेकादश द्रव्यम्॥

द्रव्यगुण कर्म समवायाभावविशेष जाति समतीतम्।
अष्टमपदार्थमीडे कारुण्याख्य स्वसवेद्यम्॥

कारुण्य धर्ममेघ समाधिभेद प्रपद्येऽहम्।
तव वर्षति यो वर्ष हृत ताप सुखसुधारूपम्॥

---

1 *तव कृष्णस्य इत्यर्थ।*

2 *The Gospel of Sri Ramakrishna I p-95*

3 *अष्टाभ्य रुक्मिण्यादि महिषीभ्य, शिवाभेदेन पृथिव्याद्यष्टमूर्तिभ्यश्च भिन्नामित्यर्थ।*

4. *भूतशब्देन पञ्चभूतानि गृह्यन्ते। एव चात्र तत्तद्दर्शन प्रसिद्धतत्त्वेभ्यो विशिष्टत्व कृपाया वर्णितमित द्रष्टव्यम। अद्वैतिभि तमसोऽपि द्रव्यत्व साधितम्।*

सुमुदायात् सत्वरजस्तमसा करुणात्मिकामन्याम् ।
पुरुषस्य तवानन्या कलये तुर्याकृति प्रकृतिम् ॥

अन्नाद्यानान्दान्तात् कोशगणादन्तर भिन्नम् ।
कोश कारुण्य तव कलये परमात्मन स्तत्त्वम् ॥

करुणा भगवद्गीता दर्शितपरमार्थ योग सर्वस्वा ते ।
विगतविषादावरणा स्यान्मे विजयोत्सवोदयाविष्करणा ॥

कारुण्यमहावाक्य प्रसिद्धवेदान्तवाक्यतो भिन्नम् ।
भेदाध्यास भिन्द्याद् विना विचार क्षणार्धेन ॥

करुणाताण्डवमीडे महानटस्य तव देवदेवस्य ।
यस्य हरेदारम्भो मामक ससार सरम्भम् ॥

करुणा कपर्दिनी ते विमर्दिनी नौमि मान्द्यमहिषस्य ।
यो यस्या पतिताशो भवति स मत्तश्च पतिताश ॥ [1]

करुणावसन्तमीडे तव येन मदीयमानसोद्याने ।
नुतिचय चूतकलापे श्रूयेत नवोक्तिकोकिलालाप ॥

कलये विक्रमशाण कारुण्य रामबाण ते ।
भवदैत्यबद्धमामक चेतोऽवनिजावने प्रवीण च ॥

सयशोदानन्दबल त्वामाविर्भावयत्वम्बा ।
मम मानसकाराया मनुकम्पा भक्तिशृङ्खलिता ॥ [2]

कारुण्य योगमाया जयति ध्येया प्रपन्नानाम् ।
यद्विश्वरूपमहिमा दुर्विधिकसस्य दुर्निमित्त स्यात् ॥

करुणामुरली भवतो गायेत्प्रारम्भसगीतम् ।
मामकसुचरितरासे विवशीकृत चित्तवृत्तिगोपवधू ॥

कारुण्य रासलीला तव लसतु ममान्तरङ्गबृन्दायाम ।
तोषितधीव्रजयुवति पोषित पुरुषार्थसपत्ति ॥

कृष्णोऽसि हृषीकेशो दयापि कृष्णा हृषीकेशा ।
पञ्चेन्द्रयप्रियत्वात् सहोदरत्वाच्च ते तस्या ॥ [3]

---

1 पतित्वे आशा, पतिता नष्टा आशा यस्येति च यथौचित्य विग्रहो ज्ञातव्य ।

2 कृपा अत्र देवकी । सयशोदेति - यशोदा-नन्द-बलरामयुत, यशोवहमोदसारसहित मिति च ।

3 अत्र कृपा द्रौपदी । कृष्णस्य कृपापि कृष्णा । तयो सहोदयत्व सहैव जातत्वम् । अत एव कृपाया कृष्णसोदरीत्वोल्लेख । द्रौपद्याश्च कृष्णेति नाम प्रसिद्धम् । पञ्चेन्द्रियाणांव

... नपत करुणामया राधा।
आराधकत्व साम्या न्न विद्यते ह्यावयोर्भेद ॥ [1]

भक्तितुलाप्रामाण्य तावककारुण्य पण्यमाकलये।
मौनिशरण्य मूल्यीकृत पुण्य मनादृत हिरण्यम् ॥ [2]

करुणा या सौभाग्य वर्धयति व्याप्य हृदय ते।
ता मेव वदति लोको वक्ष स्थलवासिनीं लक्ष्मीम् ॥

गौरीसरस्वतीश्रीपरिवार कञ्चिदवतारम्।
कारुण्यमेव वन्दे सहज तव सच्चिदानन्दम् ॥

भवत करुणा महती मुरारि नारदमुनीन्द्रस्य।
कलयेद् यदृच्छया मे सन्ततनिर्वाणगान्धर्वम् ॥

वितरतु कटाक्षधेनुर्भवत करुणापय पूरम्।
मम पुष्टिवर्धन स्याद् यस्मादपवर्गनवनीतम् ॥

आधारादि षडम्बुजमण्डलिनी जयति कुण्डलिनी।
ससृति विषजाङ्गलिकी करुणा ते परममाङ्गलिकी ॥

नानाविषयस्नेहो मम पिच्छिलचित्तवृति वर्तिभृत ।
दिशतु पदालोक तव कारुण्यज्वालया लीढ ॥

सस्कारगुग्गुलुर्मे तव करुणाङ्गार निर्दग्ध ।
जनयेद् धूपसुगन्ध सौशील्यमय दुराधर्षम् ॥

मम चित्तरज पुञ्ज ज्वलयेद् घनसारशकल राशिनिभम्।
नीराजन विदधती कारुण्यज्वालमाला ते ॥

गरुडीभूय वराभयपक्षाभ्या प्रापयतु विविक्त त्वाम्।
अविकुण्ठगति सरया तव देव दया मदात्मदेवगृहम् ॥

प्रिया भर्तारो यस्या स्तात्त्व पञ्चेन्द्रयपियत्वमिति द्रौपदीपक्षे। हृषीकेशत्वादिन्द्रियाणामीश्वरश्वात् पञ्चेन्दियप्रियत्व कृष्णपक्षे च। अत. कृष्णस्य कृपाकृष्णायाश्च हृषीकेशत्व समानम्। हृष्यन्त्यनेनेति व्युत्पत्त्या इन्द्रियाणा प्रियाणाच हर्षकारणतारूप हृषीकत्वच। इन्द्रियाणा प्रियाणा च बिम्बप्रतिबिम्बभावसबद्धाना हृषीकपदावगतानामीशत्वत तयो कृपाया कृष्णायाश्चे हृषीकेशत्व सिद्धयति। कृष्णापक्षे हृषीकोपलक्षिता पञ्च (पाण्डवा) प्रिया एव ईशा इत्यपि। कृपा पक्षे सर्वेन्द्रिय हर्षकारणत्वात् हृषीकेशत्वमिति चावगन्तव्यम्।

1 *अत्र करुणैव राधा। वीरसाधनाप्यत्रव्यग्यास्तु तन्त्रशास्त्रसिद्धत्वात्।*

2 *श्रीकृष्णतुलाभारकथात्रानुसन्धेया।*

भवतु मम करग्राह्य त्वदनुग्रहकल्पशाखाग्रम।
येनोन्नीये काम ब्रह्मात्मानन्दनन्दनारामम।

[1] मानससैन्धवखिल्य मम तव करुणामृतासार।
प्राक्तनसस्कारमलै कठिन कदपि विलाप्य मधुरयतु॥

मथुराजाग्रद् व्रजभूस्वप्नान्त द्वारकासुप्तम्।
वैकुण्ठतुरीय ते कलये कारुण्यचेतन्यम्॥

करुणाशुद्धाद्वैत तत्त्व कलयामि निर्मायम।
तदभवतु पदार्थो वा गुणोथ कर्माथ वा द्रव्यम्॥

या दैवापूर्वग्रह भूतप्रारब्धकेतवाच्चलति।
करुणेव हि सा शक्ति स्तत्तद्व्यापार सतता सततम्॥ 701

एक सदद्वितीय सर्व मिद चेतदात्म्यमेव कृपा।
निर्भेदनामरूपा प्रतिष्ठित यत्र मर्त्यममृत च॥

अप्राप्य यतो वाच सह मे मनसा निवर्तन्ते।
उदगच्छन्ति च सर्वा करुणा तद् ब्रह्मणस्तत्त्वम्॥

सत्यस्यापि च सत्य चेतन्यस्यापि चैतन्यम्।
आनन्दस्यानन्द कारुण्य नौमि परमार्थम्॥

सद् - असत् - सदसत् - सदसद्विलक्षण विलक्षणा करुणा।
मायानिवृत्तिरूपा जीवन्मुक्तिप्रदा जयति॥

यदिद व्यक्त विश्व पादोऽव्यक्त त्रिपादमृतम।
करुणैव ते समस्त दृश्य तददृश्यमपि मेयम्॥

प्रियमेवेद हि भवेत् सर्व यस्यात्मनस्तु कामाय।
सोयमनिश पुरस्तान्मम देव प्रादुरस्तु करुणात्मा॥

कृपाया शब्दादिगुणमयता।

हृदयाद गगन विशाला दुदित प्रणव कृपाह्वानम।
यत्तव तदेव लोके विख्यात वेणुसगीतम्॥

चित्तमशान्तिज्वरित मम हरिचन्दन [2] रसार्द्रकर्दमचर्चा।
शिशिरीकरोतु करुणा शीकरसेकप्रभूत सरसस्पर्शा॥

---

1 *श्रीरामकृष्ण बोधे लवणप्रतिमादृष्टान्त। कटु विस्राम्*

2 *हरिरेव चन्दन।*

कुवलयगगनघनाभ यत् परित स्फुरति लावण्यम् ।
तत तव शृङ्गारमय वदामि तत्त्वेन कारुण्यम् ॥ [1]

योऽय स्फुरति समन्ताद् भूतेष्वानन्दमधुररस ।
करुणामकरन्दस्ते स एव हृदयारविन्दनिष्यन्द ॥

नानाविषयप्रवणा जन्तुषु या [2] वासना प्राहु ।
तत् तत्त्वतस्तव कृपासौरभमेवान्तरङ्गपद्मभवम् ॥

कृपा मयसभानिभा

विरलत्वमेव हि भवेत् पौष्कल्ये चिन्तिते चित्ते ।
सगाभावे सगश्चारोग्ये चापि रुग्मत्ता ॥

शैघ्र्य यत्राभिमत तत्र विलम्बो भवेदेव ।
साफल्यमूहित चेत् कर्मसु वैफल्यमेव स्यात् ॥

द्विष्ट दर्शयतीष्ट सुकर दुष्करमघोरमपि घोरम् ।
हेय चोपादेय तव करुणा मयसभासदृशा ॥

मम करणव्यापारा स्तत्तद्विषयेषु मोघयन्ती ते ।
मनसस्तनोत्यपार कृपाविलास श्चमत्कारम ॥

अन्यथयति तव करुणा परिपाक भाविन त यम् ।
सभावये कृताना जनयन्ती विस्मय परमम् ॥

यद्यत् प्रतीक्षित मे तव तत् सर्व विहन्यते दयया ।
निश्चेष्टता विधाय स्वान्तेन्द्रियवृत्तिवर्गस्य ॥

एवमपि रम्यदिष्ट न कथ पपाटयेस्तदपि ।
अहिताचरणे तावक करुणाया पक्षपात किम् ॥

अस्मात्प्रतिघातान्मे मानसमन्तर्मुख भवतु ।
आत्मावलोकनकरा दुज्झितविद्वेषसौहार्दात् ॥

कृपासुभद्रा

कृष्णसहजे सुभद्रे करुणेऽस्तु तवाभयाभिमन्युर्मे ।
विजयाभ्युदयामन्यु शोकमयाशान्तिवृत्रशतमन्यु ॥

---

1 *श्यामो भवति शृगार ।*

2 *अहो पशूनामपि प्रसववात्सल्यमिति मुरारि ।*

कृपायशोदा

मातर्दयायशोदे कृष्ण-किशोरं बधान दुर्ललितम।
आत्मोलूखलमूले श्रुतिपथदूर परालयान्वेष्यम्॥

उपालभ

क्वासि त्वमम्ब करुणे दर्शय चात्मानमन्तिक नय माम्।
त्वन्मे प्रवासजीवितमेतत्तात्कालिक मन्ये॥

अपरिचितलोकमध्ये किमर्थमहमत्र पातितो मात।
विवृतात्मगृहकवाटा वितराभयमतराहूय॥

किं हितमभिलषित किं किं साधितमपि च किं साध्यम्।
जानामि नैव करुणे कुरुष्व तन्मे यदेव करणीयम्॥

उद्धर्तुमनुचित मामुद्धृत्य दये प्रदर्शय प्रतिभाम्।
उल्लङ्घ्य चैव नियमानघटनघटनापटीयसी त्वमसि॥

सन्ततमुद्यमविमुख समर्थये मातरात्मानम्।
मा स्वीकरिष्यसि दये यदाकदापीति विश्वासात्॥

ऐहिकमथवामुष्मिक माचरितु नोत्सहे करुणे।
आलम्ब देहि यथा न पताम्यवसादजम्बाले॥

कृपाविषये लोकोक्त्यलकारा।

उद्धारे वा त्यागे त्वमेव कुरु निर्णयं करुणे।
मम चास्तु मन शान्तिर्मज्जय नीरेथवा क्षीरे॥

यदि हिसितु मेवेच्छसि को नु दये तारको मेऽन्य।
स्वयमेवात्ति वृतिश्चेत् सस्यस्य कथ भवेद्रक्षा॥

ननु देव नि सहायो विनिवर्त्तयितुं कृपा त्वमपि।
भक्तेषु सकृत्प्रवणा कोरुन्ध्यान्निम्नगा निपुण॥

सपन्नो न दरिद्र स्याद्दयया ते बुधो न जड।
त्वदधीनो दीनश्यचेत्युक्ति र्युक्त्या विरुद्धैव॥

किन्तु भवे दधनोपि प्रभूतविभवो जडोपि बुध।
शकटानि स्युर्नावो नाव शकटानि दयया ते॥

यावान् वृक्षस्तावान्, वातोपि भवेत्पयश्च घटे।
चित्त यथायथा मे प्रवण स्यात्त्वयि तथैव मयि करुणा॥

[1] सध्यावन्दन भद्र तवति लीलाशुकोक्तदिशा।
विगलितकर्माचरणा मुखमास्मीमहि कृपाशरणा ॥

विषय [illegible] शाखा गवधूय धिय मम व्यग्राम्।
एकाग्रा कुरु करुण स्वद्व्यवसायात्मिकामेव ॥

एतेनालङ्कुर्वे तव [2] कृष्ण कृपा प्रबन्धगुच्छेन।
येन स्यादामोद पठितॄणा सुमनसा शश्वत् ॥

अभिनृति कन्याया अपि मम ते स्वीकार माननीयाया।
जनयतु शोभातिशय कर्णालकार एष भवदीय ॥

परितापस्य पराकाष्ठा देवीसाक्षात्कारश्च

एव गजास्यप्रभृतीनभीष्टान देवान विभृति परमात्मनश्च।
[illegible] कालीं [illegible] पुनर्विषण्ण ॥

महानतिगत कालो मम ते दर्शन विना।
अतीत दिनगद्यान्य ज्जनुषा निष्फलेन किम् ॥

सताकुले जन्म च पुण्यतीर्थवासोऽनिश दिवि तवाङ्घ्रिसेवा।
अध्यात्मयागेमहतीममास्था तथापि साक्षात्कृतिरप्रपद्यम् ॥

शून्यो [illegible]स्त्वथवापि सयमविधि शून्या त्वदङ्घ्रिद्वयी
भक्तिश्चास्तिकता स्वधर्मविहितानुष्ठाननिष्ठापि वा।
[illegible] दुरितदूरूपण [illegible] धनार्थ कृत।
[illegible] तथापि दर्शनागताप त्वशून्य कुरु ॥

"[illegible] नात्मानमन्तिक नय [illegible]।
[illegible] जातम् ॥"

[illegible] साक्षात्कारविलम्बनम।
[illegible] ॥

[illegible] स्मृत।
[illegible] दिव्यदर्शनम् ॥

[illegible] प्रभामण्डलभासुरम।
नानाविधाद्भुताकार [illegible] सता भयकारणम ॥

---

1 *सन्ध्यावन्दन भद्रमस्तु भवते इत्यादि श्रीकृष्ण कर्णामृतम्।*

2 *They lived with God p-143 worship of Kali and Krishna produces quick results in Kali Yuga (Calcutta 1993)*

मन्दहासमरन्दार्द्र विकस्वरमुखाम्बुजम् ।
स दृष्ट्वा जननीरूप हर्षोन्मत्त इवाभवत् ॥

[1] अन्यानि दिव्यदृश्यानि

कदापि रक्त च कदापि शुक्र वर्ण कदाप्येष विनीलमेव ।
खद्योत चन्द्रानलतारकाणा ददर्श रूपाणि समाधिनिष्ठ ॥[2]

ध्यानावसाने तनुसन्धिबन्धा श्लथीभवन्ति स्म विनेव यत्नम् ।
प्रारम्भनद्धा स्वयमेव तस्य योगिप्रवेकस्य महात्मनो ये ॥

देवताभिरदृश्याभिर्भाषिते स्म जनैरिव ।
लोकमात्रा च शिशुवज्जनन्या स दिने दिने ॥

जननीविग्रहस्याग्रे स्थित्वा तूल निधाय च ।
नासिकापुटयो ग्स्य नि श्वास निश्चिकाय स ॥

ददर्श देव्या सक्रान्ता छायामालयभित्तिषु ।
स स्पष्टावयवाकाग मूर्तिमद्वस्तुनो यथा ॥

शुश्रावदेव्या क्रीडन्त्या पादमञ्जीर शिञ्जितम् ।
कुमारीरूपधारिण्या मन्दिरप्रान्तभूमिषु ॥

पूजाया व्यलीकम

पूजाया तन्मयो देव्या सर्वागस्पर्शपूर्वकम ।
अर्पयामास पुष्पाणि स कराभ्या नकेवलम् ॥

प्रददाति स्म नैवेद्य स्वयमास्वाद्य तत्पुन ।
ल्ध पग्मया भक्त्या शबरीवदशङ्कितम ॥

खादयेदथवा चाय बिडाल वा तदागतम् ।
मत्वा त कालिकामेव तद्रूपसमुपस्थिताम ॥

करोधृत्वा कराभ्या स नृत्यतिस्म सहाम्बया ।
स्पृ पग गन मलपश्च सवया इव कौतुकी ॥

ने स्म गजते तल्पे देव्यर्थमुपकल्पिते ।
मातुयथा शिशु पार्श्वे निरातङ्कमना सुखम ॥

। चक्रु साहस केऽपि विनिवेदयितु जना ।
अधिकारिसमक्षे तु पूजाया त व्यतिक्रमम् ॥

---

1 The Gospel II p 933

2 They lived with God p 138 Vision of the indivisible Satchidananda like a heap of red brick dust

यथा यथा कृता पूजा भक्त्याविष्टेन तेन हि।
तथैव रासमण्या च [1] जामात्राऽनुमताऽभवत्।।

अनुभूते भयभक्ती पूजासमयसगते।
यदाय पूजयेद्देव्या सानिध्ये चासकृज्जनै।।

सर्वात्मना पारवश्यात् रागभक्तिरनुष्ठिता।
इय महात्मना तेन वैधभक्ते र्वरीयसी।।

ददर्श पापपुरुष दह्यमान तपोऽग्निना।
सध्यावन्दनवेलाया स्वाङ्ग सतप्तमप्ययम्।

दास्य भक्ति

अनुतिष्ठन् दास्यभक्तिमनुचक्रेऽनिलात्मजम्।
[2] जातवानरचिह्नश्च स विस्मयकरोऽभवत्।।

मन्दस्मितोपहारं च सीताया दिव्यदर्शने।
सादरं प्राप, राम च तुष्टाव नुतिभिस्तथा।।

"शेषोऽभवल्लक्ष्मण एव यस्य
ते शङ्खचक्रे भरतो रिपुघ्न।
रमा च सीता रघुनायकं त
गदाधर नन्दकिन प्रपद्ये।।

श्रीमन्मङ्गलमोक्षद -
नामान पादपूत निर्जरसरितम्।
ऐकेषु-वचो-नारी
व्रत वधूभूतदृषद मये।।

श्रुतयो यस्य गावश्च वत्स पवननन्दन।
ज्ञानामृत येन दुग्ध त वन्दे रघुवल्लवम्।।

कपय सैनिका यस्य चिक्रीड सेतुबन्धकृत्।
पादचारेण यान च नौमि त रावणान्तकम्।।

निश्चलेन्द्रियवृत्ति त वैदेहीध्यानतत्परम्।
विप्रलम्भपरीताप पुभाव नौमि राघवम्।।

---

1 *मथुरानाथेन।*

2 *बालाकुररूपेण पृष्ठास्थितदैर्घ्यम्। रा जी पुट 93*

नौमि दयाकूपार करुणरसाश्रयनिबन्धनेतारम्।
परिहृतसीता प्रियता परिणाम स्वर्णमूर्ति कलितसवम्॥"

गायत्रीमन्त्रवर्णै श्च रामायणकथा जगौ।
वल्मीकिरचितै· श्लोकै काण्डसप्तकगोचरै ॥

नूतन गायत्रीरामायणम् [1]

तप स्वाध्यायनिरत तपस्वी वाग्विदा वरम्।
नारद परिपप्रच्छ वाल्मीकि मुँनिपुङ्गवम्॥ बालकाण्ड 1-1 (पुट 1)

स यथा कथित पूर्व नारदेन महर्षिणा।
रघुवशस्य चरित चकार भगवान् ऋषि ॥ 3-9 (7)

विवस्वान् काश्यपाज्जज्ञे मनुर्वैवस्वत स्मृत ।
मनु प्रजापति· पूर्वमिक्ष्वाकुस्तु मनो सुत ॥ 70-21 (95)

तेषामतियशा लोके राम सत्यपराक्रम ।
स्वयभूरिव भूताना बभूव गुणवत्तर ॥ 77-26 (104)

रामस्तु सीतया सार्ध विजहार बहूनृतून्।
मनस्वी तद्गतमना नित्य हृदि समर्पित ॥ 77-27 (104)

वनवासहि सख्याय वासास्याभरणानि च।
भर्तारमनुगच्छन्त्यै सीतायै श्वशुरो ददौ॥ अयोध्या 40-14 (178)

रामप्रव्राजन ह्येतत्सुखोदर्क भविष्यति।
देवाना दानवाना च ऋषीणा भावितात्मनाम्॥ 92-30 (258)

नास्ति धर्म कुत· सत्य नार्जव नानृशसता।
यत्र रामस्य वैदेहीं भार्या हरति रावण ॥ अरण्य 52-41 (378)

यथाविजृम्भते सिहो विवृद्धो गिरिगह्वरे।
मारुतस्यौरस पुत्रस्तथा सप्रति जृम्भते॥ किष्किन्धा 67-3 (527)

भक्त्वा वन महातेजा हत्वा रक्षांसि सयुगे।
दग्ध्वालङ्कापुरी रम्या रराज स महाकपि ॥ सुन्दर 54-49 (638)

---

1 *प्रसिद्धगायत्रीरामायणे श्लोकाना परस्परान्वयपूर्वक कथाक्रमो नास्ति। अत्रत्वस्तीति विशेष ।*
पुटसख्या मद्रास - मुद्रिताद रामायण ग्रन्थात (1958)

गमनाय मति कृत्वा वैदेहीमभ्यवादयत्।
तत स कपिशार्दूल स्वामिसदर्शनोत्सुक ॥ 56-8 (6'

दृष्टा सीतेति विक्रान्त सक्षेपेण न्यवेदयत्।
निषसाद च हस्तेन गृहीत्वा वालिन सुतम्॥ 57-36 (6.

वन दत्तवर दिव्य धर्षयेयुर्वनौकस ।
तत प्रहृष्टो धर्मत्मा लक्ष्मण सहराघव ॥ 63-24 (65

स नलेन कृत सेतु सागरे मकरालये।
शुशुभे सुभग श्रीमान् स्वातीपथ इवाम्बरे॥ युद्ध 22-74 (70

धनुर्ज्यातन्त्रिमधुर हिक्कातालसमन्वितम्।
मन्दस्तनितसगीत युद्धगान्धर्वमाबभौ॥ 52-25 (75

ममन्थ च महाकायो राक्षसान वानरेश्वर ।
युगान्ते समये वायु प्रवृद्धानगमानिव॥ 97-10 (86

दृष्टा नेदुस्तत सर्वे कपय कामरूपिण ।
सुग्रीव प्रमुखा वीरा परिवार्य तु राघवम्॥ 100-50 (87

धृतिप्रवाल प्रसहाग्र्यपुष्पस्तपोबल शौर्य निबद्धमूल ।
रणे महान राक्षसराजवृक्ष समर्दितो राघवमारुतेन॥ 112-10 (88

येन सेन्द्रादयो लोकास्त्रासिता युधि धीमता।
तस्मिन काल समायुक्ते न काल परिशोचितुम्॥ 112-17 (889

यो नशक्य सुरेर्हतु न यक्षेर्नासुरैस्तथा।
सोऽयकश्चिदिवासत्त्वां मृत्यु मर्त्येनलम्भित ॥ 113-16 (890

न पर पापमादत्ते परेषा पापकर्मणाम्।
समयो रक्षितव्यस्तु सतश्चारित्र भूषणा ॥ 116-43 (898

प्रहृष्टश्च प्रतीतश्च बभो राम कुबेरवत्।
ते सर्वे वानरा दृष्टा राक्षसाश्च महाबला ॥ 125-27 (911

चक्रप्रहारैर्विनिकृत्तशीर्षा सचूर्णिताङ्गाश्च गदाप्रहारै ।
असिप्रहारैर्द्विविधा विभिन्ना पतन्ति शैला इव राक्षसेन्द्रा ॥ उत्तर 7-54 (940

देवदुन्दुभयो नेदु पुष्पवृष्टिश्च खाच्च्युता।
पितामहमुखाश्चैव सर्वे देवा प्रहर्षिता ॥ 26-57 (983)

तामेव रात्रि शत्रुघ्न पर्णशालामुपाविशत।
तामेव रात्रि सीतापि प्रसूता दारकद्वयम॥ 66-1 (1049)

द्वितीयोभागः ।

अवतारत्वनिरूपणं

ज्ञानसिद्धिश्च

II. अवतारत्व निरूपण ज्ञानसिद्धिश्च ।

विचित्रघटना.

गदाधरेण पूजाया व्यस्ता जातु चपेटिता।
काल्यैव दण्डितास्मीति मेने रासमणी ह्रिया ॥

अतिभक्तिरनर्थयित्यालोच्य प्रहितासु स ।
मथुराख्येन वेश्यासु चकार जननीधियम ॥

ईशस्याचिन्त्यमाहात्म्य मथुराय स बोधयन् ।
श्वेतरक्त सुमा वल्लीं दर्शयामास शङ्किने ॥

भर्गप्रियार्चन बन्धौ निधाय हृदयाह्वये।
ममज्ज सर्वदैवासौ परमार्थस्य साधने ॥ 801

आरोपिता पञ्चवटया द्रुमास्तेन यथोचितम् ।
आलयस्योत्तरे देशे गङ्गारोधसि पावने ॥

सामग्री गङ्गया नीता ह्युद्यानवृतिकल्पने।
यान्ति निष्ठागरिष्ठस्य जडान्यपि सहायताम् ॥

हितबोधमनादृत्य प्रयुक्तो हलधारिणा। [1]
स्रवद्रक्तमुखस्यास्य शाप एव वरोऽभवत् ॥

हठयोगाभ्यासभवा दशा जडसमाधिकृत् ।
निवारिता यतो दिष्टया ज्ञानालोकप्रणाशिनी ॥

यस्यार्पित च नैवेद्य पाणिहाटिपुगेत्सवे।
वैष्णव चरणाद्यार्या "प्रसाद" [2] इति मेनिरे ॥

उपासनपरिक्लिष्टे पिशाचावेशसशयात् । [3]
आनीतैर्मान्त्रिकै रस्मिस्तदभावो ध्रुवीकृत ॥

देवतयाऽवाहितया चण्डीनाम्न्या तथैव स ।
पूगप्रिय समादिष्टो विजहौ पूगभक्षणम् ॥

आवास सरयूनदीतटगता ऽयोध्या पुरा विश्रुता
नन्दग्राम वरस्ततश्च यमुनाया घोष आसीत् किल ।
गङ्गारोधसि दक्षिणेश्वर इति ख्यातो यदीयोऽधुना
देव त शरण भजामि परम श्रीरामकृष्णाकृतिम् ॥

---

1 *श्रीरामकृष्णस्य बन्धुना केनापि। रा। जी। पुट 105 ff*

2 *Sacrament*

3 *स्वजनस्य जातात् सदेहात्।*

श्रीकाल्या करूणापयाभिरनिश संवर्धित पुत्रवत
स्वोत्सङ्गे गुहवद् धृत च विजहत्सापत्नया गङ्गया।
धीर चन्द्रमणीपतेर्बुधखुदीरामस्य पुत्र प्रिय
त हस परम भजामि शरण श्रीराम कृष्णाभिधम्॥

काल्या लोचन कोमुदीकुवलय तद्भक्तिसौधालय
तन्नामाक्षरमालिका जपसुधा पाथेय मोक्षाध्वगम्।
तल्लास्योदितविश्वरूपरसवद्-दृश्यैक सामाजिक
त हस परम भजामि शरण श्रीराम कृष्णाभिधम्॥

स्थातु य प्रभवेन्न लोकजननीं कालीमदृष्ट्वा क्षण
शश्वद्यो लभते समाधिषु जगन्मातु प्रिय दर्शनम्।
अग्रेभान्ति समाधयो मुहुरहो यस्यागुंलस्फोटनात
त हस परमं भजामि शरण श्रीराम कृष्णाभिधम्॥

2. विवाह.

ईदृग्दशा प्रपन्नस्य स्वजना स्वास्थ्यकाक्षिण।
कर्तुं परिणयं तस्य कन्यकान्वेषिणोऽभवन्॥

ते तत्र विषये श्रान्ता आसन् पर्युत्सुका भृशम्।
कुत्र कन्येति तेनैव बोधितास्तु प्रहर्षिता॥[1]

जयपूर्वा रामवाटीं गत्वा ते शारदां वधूम्।
चक्रु श्रीरामकृष्णस्य पत्नीत्वे निश्चिता तत॥

शुल्कप्रदानपूर्वं च रामचन्द्रतनूभवाम्।
ऊन षष्टितमे वर्षे चाष्टादशशतोत्तरे॥

सिद्धार्थि वर्षे वैशाखे तयो परिणयोऽभवत्।
त्रयोविंशतिवर्षोऽयं गदाधरसुधीर्वर॥

शारदा पञ्चवर्षा च सहधर्मचरी वधू।
गुरुषु प्रश्रयवती नित्य भर्तृपरायणा॥

[2] न प्रजायै न भोगार्थ मासीद् दाम्पत्यमेतयो।
विवाहसस्कारविधे पालनार्थं तु केवलम्॥

1 *May 1859*
2 *The Gospel II p 747*

पालको शिष्य वितते ऽभावजाकाविपि ।[1]
वभूवतुस्तौ पितरा वप्राकृतविधानत ॥

पर तु रामकृष्णस्य विवाहे यत प्रयोजनम् ।
उद्दिष्ट बन्धुभिश्चान्यत सवृत्त तु तदन्यथा ॥

व्यवर्धत परीताप स्वस्य च स्वजनस्य च ।
[2] अलौकिको लौकिकश्च विभिन्नो विषय पुन ॥

आशवर्ति पुरूषा सर्वेप्यूढा ससारिणोऽभवन् ।
अनूढा श्चेदथानूढा केचिज्जीवन्ति भीष्मवत् ॥

गदाधरस्त्वपूर्वोऽयं परमाश्चर्यकारणम् ।
बभौ चित्तेन्द्रियव्रातनिग्रहो लब्धविग्रह ॥

न चचाल मनो यस्य सनिधानेऽपि योषित ।
विशिष्य प्रार्थयामास मातरं भुवनेश्वरीम् ॥

सासारिकेच्छा जायाया निर्मूलयितुमात्मन ।
स "ता सफलयामास देवी मे प्रार्थना" मिति ॥

स्वयमेवावदत् पश्चात् पूर्णकामो यतीश्वर ।
श्रीकालीकरुणापात्रं तथा दिष्टचा बभूव च ॥

विकार हेतौ सद्भावे धीरास्ते विकृता न ये ।
कुर्याद्य स्वानुकूलं तं धीराणामुत्तमो हि स ॥

कन्यान्वेषण तत्पर स्वजनमालोक्याब्रवीद्य स्वय
"का बाला क च सा वसे"दिति वधूवृत्त [3] दृशा क्रान्तया ।
इत्थभावविशेष दर्शन निसर्गाश्चर्य धीसपद
त हस परम भजामि शरण श्रीरामकृष्णाभिधम् ॥

वैराग्ये च कलत्रिणोऽपि न भवेद्यस्माद् वरीयान्नरो
निस्सगोप्यनुकम्पते विपदि य कार्पण्यदून जनम् ।
कालीमेघततीक्षणादपि महान् यस्योत्सवो जायते
त हस परम भजामि शरणं श्रीरामकृष्णाभिधम् ॥

---

1 रघुवश । - 24 स पिता पितरस्तासाम् ।

2 भगवत्प्राप्ति रलौकिक रामकृष्णस्य परितापविषय अन्येषातु तस्य शरीरस्वास्थ्यसपादनादिको लौकिक ।

3 उपनिधित्वेन कल्पितेति । द्र शबरीसपर्या पु 21

मनोजयप्रकार - तन्मयत्वञ्च

मुहुर्ध्याननिमग्नश्च वत्सगन् रा निनाथ पट।
निर्णिदो निर्निमिषश्च त्यक्तदहन्दियस्मृति ॥

हेयाहेयज्ञानहीनो वालोन्मत्तपिशाचवत।
केनापि व्याधिना भाव्यमिति भीतो बभूव च॥

उपासनाविधानेषु स्वयमेव च बोधित ।
प्रामाणिकत्व येषा तु पश्चाद्गुरुभिरीरितम॥

भान्ति सर्वरहस्यानि दशास्वेव विधास्वपि।
सततध्यानमग्नस्य विमलस्वान्तदर्पणे॥

[1] नारीषु मातृभावेन कामवाञ्छा यथा जिता।
तथा तेन धनेच्छापि हेमाश्मसमदर्शनात्॥

अजानन्नप्युद्विजते नाणकस्पर्शतो ह्ययम्।
जिह्वादीन्द्रिय चापल्यमजयत् स्वल्पभोगत ॥

तथेव निर्जितो गर्वो जातिवर्णादिसम्भव ।
चण्डालवासेषु कृते र्विविधै शुद्धि कर्मभि ॥

जुगुप्साविजिगीषार्थं सेवित जलमाविलम।
नराणामप्युपसस्पृष्ट तेनानुद्विग्नचेतसा॥

शुनि चाथ श्वपाके च तथा नानाविमानगो ।
लोके पि जान्तरे नाह्य समत्व योगमास्थित ॥

महादेवस्य रुद्रस्य श्रीकण्ठस्य पिनाकिन ।
महिम्न स्तोत्रगीतस्य गायने प गद्गदभृत॥

साक्षात्कृत तदैश्वर्यो भक्त्या परवशो भृशम्।
आनन्दबाष्पधाराभिराप्लुतानन पङ्कज ॥[2]

---

1 *वेधा द्वेधा भ्रम चक्रे कान्तासु कनकेषु च।*
तासु तेष्वप्यनासक्त साक्षाद्भर्गोनिराकृति ॥ - सुभाषितम्॥
भ्रमस्य जागतस्यास्य जातस्याकाशवर्णवत्।
अपुन स्मरण मन्ये साधो विस्मरण वरम्॥ - वसिष्ठ । नीलकण्ठव्याख्या, महाभारते उद्योगपर्वणि 42-15 (पु-84)

2 *असितगिरिसम स्यादित्यादि पद्यपठनावसरे।*

एकदा तन्मयावस्य स्वास्मन मथुरगारवम्।[1]
[2] चन्द्रेणासहमानेन चक्षमे ताडितो गुरु ॥

श्रीकाली चरणारविन्द युगली शश्वद्विहारप्रिय
बाह्यार्थस्मृति बाह्ययोगनिरत श्रीदक्षिणेशाश्रितम्।
योगीन्द्रिमलमानसालयमह मायातमिस्रा–लयम
तं हस परम भजामि शरण श्रीरामकृष्णाभिधम् ॥

3. अवतारत्वनिरूपणम्।

भैरवी।

अथ योगेश्वरी नाम यशोहरपुरीभवा।
भैरवी ब्राह्मणी चेति प्रसिद्धा योगिनीवरा ॥

आगयौ तन्त्रनिष्णाता द्रष्टुकामा गदाधरम्।
योगदृष्टया परिज्ञाते द्रष्टव्ये तापसत्रये ॥

तौ दृष्टौ चन्द्रगिरिजौ रामकृष्णोऽधुना तया।
प्रहर्षमतुल लेभे त च दृष्ट्वा गदाधरम् ॥

श्रीकृष्ण सा यशोदेव माता तनयवत्सला।
[illegible] शोधि ता दृष्ट्वा मातुरग्रे यथा शिशु ॥

[illegible] [illegible]वदद्यत्तस्यै सभ्रमातिशयेन च।
[illegible]नुभूत महत् दु ख यदाध्यात्मिकसाधने ॥

[illegible]त्मात्मनि तथा "चोन्मत्तोऽय" मिति श्रुतम्।
रागुभति परा साभूत् तस्मिन् श्रुत्वाऽखिल तत ॥

[illegible] स महाभाव शास्त्रेष्वित्युपपादिनी।
स्वा[illegible]गेषु पुनरुत्पन्नस्तापोऽस्य तपसो ऽलघु ॥

गधाचतन्ययो रासीदिति त चाप्यसात्वयत्।
असूचयच्चिकित्सा च गन्धमाल्यादि धारणाम् ॥

सा कौसल्या यशोदा च सपद्य तमपोषयत्।
स्वय साधनकालेषु रामकृष्णं तपोऽङ्कितम् ॥

उचिताहारविधिभिर्मान्या मधुर कारितै।
तीव्राभ्या क्षुत्पिपासाभ्या बाध्यमान तपस्विनम् ॥

---

1 *मथुरानाथन दर्शित गौरवम्।*
2 *चन्द्रहाल्दारनाम्ना केनचित्।*

अपि चायोजिता ससत् तया पण्डितसयुता।
जनभ्य ख्यापयामासु रागमोक्तिप्रमाणितम् ॥

वैष्णवचरणो गोरीकान्तश्चान्येऽपि सादरम।
यत्रेश्वरविभूतित्वमवतारत्वमस्य च ॥

ज्ञान वैराग्य भक्त्यादि प्रकर्षो जायते यत ।
अवतार. स विज्ञेयो भगो भगवतो हि स ॥

अवतारा दशैकेषा मन्येषामेकविशति ।
अनन्ताश्च परेषा ते मते परिमितिर्न हि ॥

भवेद्यदावश्यकता धर्मविप्लवकारणात्।
तदैवाविर्भविष्यामीत्यूचे हि भगवान् स्वयम ॥

मथुरायोजितायां च सभायामन्यदा पुन ।
[1] वैष्णवाख्यो महाभक्तो महात्मान गदाधरम् ॥

सादर स्कन्धमारोप्य परा प्रीतिमुपागमत्।
पण्डित परमोदारो महात्मा योगशक्तिमान् ॥

करोति य करे होम निष्ठावान् महिमान्वित ।
गौरीकान्तोऽपि नम्रोभून्मुक्तकण्ठ स्तव पठन् ॥ [2]

योगिकण्ठीरवस्योच्चै स कण्ठरवधर्षित.।
[3] गुरो रनुज्ञया चास्य निवृत्तिपथमास्थित ॥

गच्छता रामकृष्णेन सिहोरग्राममध्वनि।
अदर्शि बालकद्वन्द्व स्वदेहादेव निर्गतम् ॥

ततश्चैवानुभूतेति कथित तेन चासकृत्।
अद्वैतनित्यानन्दाभ्या चैतन्यादप्यभिन्नता ॥

सिद्धीनामनुभूताना नासीदन्तोऽस्य योगिन ।
पूर्वानुभूतमेवास्य बोधितं गुरुभिस्तत ॥

यदि दीक्षा कृषि· श्रद्धा चावतारो जनो भवेत्।
जीव-सिद्धावताराणा विभेदकमिहेष्यते ॥

---

1 वैष्णवचरण

2 हा रे रे रे इति बीजाक्षरसहित "निरालम्बो लम्बोदरजननि क यामिशरणम्" इत्यादि स्तवम्।

3 श्रीराम कृष्णस्य
शिवसहस्रे - 23 गम्भीरघोष ।
- 108 वरेण्य सुमहास्वन ।

शक्तिभाने तारतम्यमिति तेनैव भाषितम् ।
कालान्तरे नरेन्द्रादि शिष्येभ्यश्च दयालुना ॥

"सर्वभूतान्तरस्थोऽपि मानवेषु विशेषतः ।
दृश्यते भगवान्नून विजिज्ञासा यदी" त्यपि ॥

अर्थतत्त्व ग्रहे सूक्ष्मा सप्रदायानुरोधिनी ।
अपि चाधुनिकी तस्य प्रतिभा क्रान्तदर्शिनि ॥

4. साधनाविशेषा

तान्त्रिकसाधना

सिद्धि नित्यार्चने मन्त्रे प्राप्य, तन्त्रिक साधने ।
गदाधरोऽकरो द्यन्न योगसर्वस्व कोविद ॥

अनुज्ञात कालिकया परं स्वस्मिन् प्रसन्नया ।
नार्येव पूज्यते तत्र प्रत्यक्ष देवताधिया ॥

नैके मार्गा सभवन्ति वीरभावादि सज्ञिता ।
प्रेयस्यादिवदाराध्या यत्र देवीह्युपासने ॥

गदाधरेण तु वृतो निरपायो मनीषिणा ।
पन्था यत्र हि वात्सल्य प्रधानप्रक्रिया मता ॥

येन पूज्या भगवती मातृबुध्द्यैव केवलम् ।
कल्पितं मन्दिरोद्याने कपालासन युग्मकम ॥[1]

अनुष्ठानापेक्षित यद् भैरव्याऽ सादित च तत् ।
तया दर्शितमार्गेण रामकृष्णोऽपि साधने ॥

चतु षष्टिषु तन्त्रेषु संसिद्ध प्राप शास्त्रत. ।
अवरोधाश्चान्तराया अनुष्ठाने भवन्ति ये ॥

ते सर्वे समतिक्रान्तास्तेन कालीप्रसादत ।
न शेकु सिद्धय प्राप्ता प्रलोभयितुमेव तम् ॥

ऊर्वश्याद्या यथा कान्ता यतचित्त जितेन्द्रियम् ।
केचिच्च सकटाध्वान के चिद् घण्टापथोपमा ॥

श्रीरामकृष्णबोधामृतम् (तेलुगु) p 92 शवसाधना p 152 शक्तिपूजा
The Gospel I p-123 Tiantra in the company of woman Jnanananda's Bhakta Ramprasad (Telugu) pp 19, 25

भवन्त्यनेक पन्थान सर्वेनि श्रेयसप्रदा ।
इतीमा मतिमास्थाय वामाचाग न गर्हित ॥

भगवत्प्राप्तिहेतुत्वा तस्यानेन महात्मना ।
अनिन्द्य हि स्त्रिया रूप तत्र पापमति त्यजेत् ॥

पयोधरौ यथामातुस्तथान्यासा च योषिताम् ।
तुलस्या विषवृक्षे वा नाभवत्तस्य भेदधी ॥

अश्लील पदमप्यस्य पवित्रा धियमादधात् ।
"कारण" मद्यपर्याय श्रुत्वा विश्वस्य मातरम ॥

सस्मार स झटित्येव कालिका सृष्टिकारणम् ।
एतस्मिन्नेव समये कुण्डलिन्यपि बोधिता ॥

पिपीलिकाहिमण्डूकविहङ्गकपिसक्रमै ।
कुण्डलिन्यां प्रबुद्धाया यान्त्या चक्रेषु च क्रमात् ॥

मूलाधारात् सहस्रार या स्युर्दिव्यानुभूतय ।
शशाकासौ वर्णयितु कण्ठादूर्ध्व त्विय यदा ॥

उत्सर्पति तदा शक्तो न किं चिदपि भाषितुम् ।[1]
लुप्तबाह्यार्थ विज्ञानो विरतेन्द्रियधीक्रिय ॥

"स्वाङ्गान्निर्गत्य सन्यासी मदूपश्चालयेन्मम ।
इडादिनाडिका पद्मषट्क च निजजिह्वया ॥

स्पृष्ट प्रफुल्लतामीयादासहस्रारवारिजम् ।
ततो भवेत्समारब्धो निर्विघ्न साधनक्रम' ॥

यत्तेन बालवेषेण यतिना बोधित चतत् ।
तोतापुरि भैरवी च बोधयामासतुस्तत ॥"

स्वय गदाधरश्चेति जगादानुभवान् स्वकान् ।
अतीतभाविनोर्ज्ञान तदासीदस्य धीमत ॥

अन्येप्यनुभवा दिव्या असाधारणलक्षणा ।[2]
महाश्चर्याणि रम्याणि दृष्टानि विविधानिच ॥

---

1 *श्रीरा कृ बोधमृतम् p 339*

2 *आसन्निति वचनविपरिणाम कार्य ।*

देवताना च रूपाणि काली येभ्योऽत्यरिचत।
जातपुत्रां ददर्शासौ वनिता पुत्रवत्सलाम् ॥

क्षणान्तरे सुत हत्वा गङ्गांभसि तिरोहिताम्।
देहकान्तिरभूत्तस्य तदा काञ्चन सनिभा ॥

नालक्षि तस्या वैशिष्टयं नद्धे रक्षाविभूषणे। [1]
तन्त्रक्रिया समाप्तेति मुमुदे भैरवी स्वयम् ॥

विदित समये प्यस्मिन् रामकृष्णेन "भाविनि।
काले स्वसंनिधि केके प्राप्नुवन्ति बुधा" इति ॥

रक्षितु जगदम्बाख्यां रक्तग्रहणि पीडिताम्।
मथुरस्य सतीं तेन व्याधि जग्राह याचित ॥

ततश्चोपशम वाञ्छन् ययौ कामारिपुष्करम्।
ग्राम रामेश्वर द्रष्टुं भ्रातरं भैरवीयुत ॥

शारदाप्यागता तत्र चतुर्दशवयास्तदा।
मातुर्गृहाद् ज्ञातवार्ता पत्युरागमन प्रति ॥

अभूत्पर सनिहिता भैरवी तत्कुटुम्बिषु।
आदर प्राप सर्वैश्च बन्धुभिस्तत्र दर्शितम् ॥

गदाधरगुरुत्वादप्युत्सेकं परम गता।
निषेधन्ती निजं शिष्यं शारदाभाषणेऽपि च ॥

गते कालेऽथ दोष स्व विदित्वा भैरवी तत।
अवतारस्वरूप त विदधौ कुसुमार्चितम् ॥

जगाम च तत शीघ्रं यतिधर्मपरायणा।
एकषष्टितमाद्वर्षान्निवद्वयशताधिकात् ॥ 901

आरभ्य भैरवी प्रायो रामकृष्णस्य सनिधौ।
षड् वत्सरानुवासेय मुदा परमयोगिन ॥

[2] अवसत्तत्र षण्मासान् प्रीत. स्वग्रामसीमनि।
गुरुदेव प्रार्थितश्च हेमागिन्यै वरं ददौ ॥

काञ्चन निर्मिते। विभूषणस्य देहकान्ते श्च वैलक्षण्य नाधिगतमिति भाव
Infra p 155, III-5 काञ्चनादि वैमुख्यम्'
1867 A D

''रामकृष्णे''ति तेनोच्चैरुक्त प्रकृति माययौ।
चन्द्रस्तु गुटिकासिद्धि-प्रभावाद् धनिन. सुताम्॥

पपात कस्यचिल्लब्ध्वा शिखरात् सिद्धिवेश्मन ।
रामकृष्णस्य निर्याणानन्तर च कदाचन।

ब्रह्मानन्दे मठाध्यक्षे सति चन्द्रमहाशय ।
आगत्यालोक्य तच्छायाफलक (Photo) सजलेक्षण. ॥

भ्रातर्भ्रातरिति क्रोशन् विललापकुलेन्द्रिय ।
गिरिज
गिरिजो रामकृष्णाय स्वागजेनार्चिषाऽभवत्॥

तिमिरे दर्शयित्वाथ पन्थान महिमोज्झित ।
ततश्च योऽवशिष्टोऽभूत् प्रभाव श्रेयसे तयो ॥[1]

कृपयाकृष्य निदधे रामकृष्णे तमीश्वरी।
अन्ये
जगन्नाथ पुरी वाथ गङ्गासागरसगमम्॥

दिदृक्षवो मार्गमध्ये दक्षिणेश्वरमागता ।
लेभिरे रामकृष्णस्य सागत्य तत्र साधव ॥

व्यवस्था मथुरेणासौ कारयामास सादरम्।
निवासाहारविषये तेषामतिथियोगिनाम्॥

आसीच्च कस्यचित्साधोस्तेषामेकस्य पुस्तकम्।
स्वयं विलिखित यत्र रामनामैव केवलम्॥

सारभूत सर्ववेदशास्त्राणा महिमान्वितम्।
नाम्नो भगवतश्चैव भेदधीर्यस्य नाभवत्॥

अन्यो महात्मा विमलब्रह्मतेज स्फुरन्मुख ।
प्रात सायाह्नवेलासु बहिरागत्य सद्मन ॥

वीक्ष्य प्रकृति सौन्दर्य नृत्यति स्म मुदान्वित ।
मायेन्द्रजालसदृश परम विस्मय गत ॥

प्रार्थितो हृदयेनान्यस्नामिति प्रत्यबोधयत्।
अभेददर्शिनो वारि कलुष निर्मल समन्॥

---

1. ...गिरिजयो । श्रीरा कृ ...बोधामृतम् (तेलुगु) पुट 133-134 तौ भैरवीशिष्यौ।

[1] स्वाश्रये प्रवण यस्य चित्त विष्णुपदेऽनघे।
भागीरथ्यम्बु रथ्याबुनिभ तस्याविशेषत ॥

उक्त्वैवमनुयान्त त शिलाक्षेपै रतर्जयत्।

नारायण शास्त्री

ततो नारायण शास्त्री महान् शास्त्रेषु पण्डित ॥

चित्त श्रीरामकृष्णस्य रञ्जयामास बुद्धिमान्।
प्रज्ञया तत्वचर्चासु विनयेन श्रुतेन च ॥

राजस्थान निवासी स द्वात्रिशद्वत्सरावधि।
विधाय गुरुशुश्रूषा विद्यासु निपुणोऽभवत् ॥

आस्थानपण्डितपद महाराजेन दित्सितम्।
नाङ्गीचकार वैरग्यमासीत्तस्य तथाविधम् ॥

भगवद्दर्शने तृष्णा प्रगाढा च महामते ।
अभूदनुष्ठानपर सदाचारपरायण. ॥

लेभे च दीक्षा सन्यासे रामकृष्णाद् गुरोरसौ।

पद्मलोचन

निधाय निकटे नित्य पद्मलोचनपण्डित ॥

कर्पट जलपात्र च परैरनभिलक्षितम्।
गत्वा पदानि कतिचिद् धौतमृष्टाननस्तत ॥

इष्टदैवानुग्रहेण वादेषु विजयी भवेत्।
पात्रादिक परिकर हृतवत्येकदा गुरौ ॥

महता विस्मयेनास्मिन्नुपलभ्येष्टदैवतम्।
स्वात्मार्पण स विदधे परिपूर्णमनोरथ ॥

कृष्णकिशोर

[2] गृह कृष्णकिशोरस्य रामकृष्णोऽसकृन्मुदा।
यातिस्मश्रोतुमध्यात्म रामायणकथामृतम ॥

भगवन्नाम्नि विश्वास तदीय प्रशशस च।
यत कृष्णकिशोराय सतृष्णायाहृत जलम् ॥

---

1 अविशेषालङ्कारोऽत्र नूतनो मदुपज्ञम्।

2 The Gospel I p 117

क्वचिज्जल्पेत् क्वचिन्नृत्येद्धसेत्परिहसेदपि।
क्वचिदुद्यात् क्वचिदगायेत् कुयदिव हठ क्वचित् ॥

यथा दशरथस्याग्रे कौसल्यायाश्च वा पुरा।
अनुगच्छेद् वार्यमाणो नदीं जिगमिषुच माम् ॥

अमर्षादप्यह नीरे मज्जयित्वा पुनस्तत ।
पश्चात्तप्तो भवाम्येव कि मया कृतमित्यपि ॥

अन्यदा रुदते तस्मै सतुषान् पृथुकानहम्।
दत्वाथ खादतस्तस्य रसना वीक्ष्य विक्षताम् ॥

''नवनीत जनन्या ते मया दत्तमिद'' त्विति।
विलपाम्यनुतापेन भृशव्याकुलमानस ॥

अद्यापि रामलालोय वर्तते मम सनिधौ।
पद्मपत्रेक्षणो बाल सुकुमारो मनोहर ॥

न चेय मम विभ्रान्तिर्यदि भक्ति समाहिता।
स्वयं दर्शयते देवः सर्वेषा परमेश्वर ॥''

सकृदेव प्रपन्नेन प्रायशो दृश्यते हरि ।
अय श्रीरामकृष्णस्तु प्राप सततदर्शनम् ॥

तदा स्यात्तेनविज्ञातं रामतादूप्यमात्मन ।

श्री राधाकृष्णोपासना, तद्दर्शन च

स चैवं वर्णयामास कृष्णोपासनमात्मन. ॥

''आत्मान मन्यमानोऽह कृष्णस्य प्रेयसी सदा।
वस्त्रभूषा कलापेषु कान्तासमितमाचरम् ॥

तदा मथुरनाथाद्याः प्रेक्षका ये च सगता ।
न शेकु प्रत्यभिज्ञातुं मा जना संस्तुता अपि॥

आदावुपासिता राधा मया प्रियतमा हरे ।
लब्ध च दर्शन तस्याः कृष्णानुग्रहलिप्सुना ॥

हेमपुष्प परागाभ वपुर्यस्या मनोहरम्।
राधामूर्ति र्यथा सीता मय्येव समलीयत ॥

राधायाश्च तथान्यासा गोपिकाना मभेदधी· ।
अस्मिन् ममाभवत्काले कृष्णसेवानुरागिण. ॥

महाभाव [1]

दु सहो विरहोप्यासी द्येनांगे रक्तबिन्दव ।
समदृश्यन्त सर्वस्मिन् रोमकूपविनिर्गता ॥

निश्चेष्टानीन्द्रियाण्यासन् शवतुल्ये कलेबरे ।
राधाचैतन्ययोरासीदेव विरहतीव्रता ॥

अयमेव महाभावो भावाना मूनविशते ।
यत्र प्रेमशमादीनां भवेदेकत्र संगम ॥

भावस्य यस्य कस्यापि साधना जीवितं ग्रसेत् ।
मयि तावदिमे सर्वे प्यभिव्यक्ता समग्रत ॥

सक्षेभयेन्महाभावस्तनु हस्ती कुटीमिव ।
तरोरध स्थितस्यापि महाभाव प्रभावत. ॥

म्लानानि तरुपर्णानि तापेन स्युर्यथाग्निना ।
मम देह तथा तप्त भैरवीस्प्रष्टुमक्षमा ॥

स्नानक्रियार्थमनयद् वस्त्रेणान्तरितं यता ।
प्लुष्टाऽभवन्ममाङ्गेषु लग्ना स्नानीय मृत्तिका ॥

अशक्नुवस्तदा सोढु "न जीवामी"ति रोदिमि ।
साक्षाच्चक्रे तत शौरे रूप भुवनमोहनम् ॥

तदा बभासे सकल कृष्णदेवमय जगत् ।
ततोऽयमपि लीनो भूद्यथा रामो ममात्मनि ॥"

तृणपुष्प दर्शयित्वा "कृष्णसौन्दर्यमीदृशम् ।
बभूवेत्यवद च्छिष्यान् यथादृष्टं तत. परम् ॥

अपश्यदेकदा दृश्य श्रृण्वन् भागवते कथा. ।
यस्मिन् श्रीकृष्णपादाब्जनिर्गता कान्तिसन्तति. ॥

ग्रन्थं भागवत स्वं च स्पृशति स्म मुहुर्मुहु· ।
भगवद्-ग्रन्थ-भक्ताना मभेदं च तथा[illegible]म् ॥

The Gospel of Sri Ramakrishna [illegible]

एव श्रीकृष्णतादात्म्य मपि तस्यावबोधितम् ।
अतश्च रामकृष्णत्व रामकृष्णे ह्युपस्थितम् ॥

रामत्वेन दशेन्द्रियाननमन·पौलस्त्यमुन्मथ्य य
कृष्णो धर्षितपापचेदिनृपति सपद्यमान पुरा ।
वैदेहीति च रुक्मिणीति विदितामध्यात्मविद्यामगात्
त देव शरणं भजामि सतत श्रीरामकृष्णाकृतिम् ॥"

7. ज्ञानसाधना

देशिक· प्राप्य ससिद्धि योगयोर्भक्ति-तन्त्रयो ।
ज्ञानयोगेपि तां प्राप्तु निश्चितात्मा गदाधर· ॥

प्रचक्रमे साधयितु समाधिं निर्विकल्पकम् ।
[1] लयविक्षेपशून्य च कषायास्वादवर्जितम् ॥

निश्चल च शमे जीवब्रह्मैक्यानन्द सततम् ।
जीवन्मुक्तिप्रद ध्वस्तमाय जन्मनिवारणम ॥

द्वैतार्थराजयोगोक्त [2] समाधिभ्यो विलक्षणम् ।
ज्ञानज्ञेय विभागादि शून्यमेकरस परम् ॥

अखण्डशुद्धचैतन्य स्वरूपानुभवप्रदम् ।
वैयक्तिकी जीवबुद्धि र्नितान्त यत्र लीयते ॥

मध्याह्न च [illegible] छाया सलिले लवण यथा ।
[illegible] कालान्तरे स्वयम् ॥

रामकृष्णा [illegible] परमेश्वर ।
[illegible] लागमन ॥

[illegible] ।
[illegible] ।

---

1 लये सबाधयेच्चित्त [illegible]

2 सवितर्क निर्वितर्का [illegible] वेदान्तशास्त्रप्रसिद्ध । (द्र वेदान्तसार) [illegible] समाधि [illegible] गी - I-60, II [illegible] धर्ममेघ सप्रज्ञातस्यैव पराकाष्ठेति योगसूत्रव्याख्यातार (4-2[illegible])

अन्यद्विचारज ज्ञान मन्यज्ज्ञान समाधिजम् ।
साक्षात्कारभव चान्यत् त्रिविध त'' दिति स्फुटम् ।। [1]

दीक्षागुरुः तोतापुरि:-तदनुगृहीतो निर्विकल्पसमाधिश्च ।

आजगामैकदा ज्ञानी महात्मा दक्षिणेश्वरम् ।
ददर्श रामकृष्ण च तोतापुरिसमाह्वय ।।

योऽवधूतो महायोगी शुकवत् सुखचिन्मय ।
दृढप्रांशुशरीरश्च विजितेन्द्रियमानस ।।

नागाख्य संप्रदायस्थश्चत्वारिंशत्समा स्तप ।
चकार नर्मदा तीरे विजने गहने वने ।।

पञ्चापगादेश (Punjab) भवश्चाभूत् कुलपति· स्वयम् ।
यतीना शतसप्ताना सन्यासाश्रमिणां गुरु ।। [2]

त्रिरात्रादूर्ध्व मेकत्र वासो यस्मै न रोचते ।
परं स्निग्धमनास्तस्मिन् रामकृष्णे स देशिक· ।।

वसिष्ठश्च यथारामे कृष्णे [3] सादीपनिर्मुनि· ।
अब्रवीत्तंच ''वेदान्त विद्यायामधिकारिणम् ।।

पश्यामि त्वां बोधयामि यदीच्छसि वदे''ति तम् ।
अनुज्ञात· कालिकया रामकृष्णश्च शास्त्रत· ।।

संन्यासग्रहणे धीमा श्चकार मति मुत्तमाम् ।
पितृणामात्मनश्चापि श्राद्धकर्म समाप्य च ।।

किंतु सर्वेषा सार्थकतैव ।
''परोक्ष ब्रह्म विज्ञान सर्वाघौघ निबर्हणम् ' ।
परोक्ष ब्रह्म विज्ञान शाब्ददेशिकपूर्वकम् ।
बुद्धिपूर्वकृत पाप कृत्स्न दहति वह्निवत् ।
आद्यो हि मोक्षो ज्ञानेन द्वितीयो रागसक्षयात् ।
कृत्स्नक्षयात् तृतीयस्तु व्याख्यात मोक्षलक्षणम् ।।
शास्त्रेण नश्येत् परमार्थदृष्टि कार्यक्षम नश्यति चापरोक्ष्यात् ।
प्रारब्धनाशात् प्रतिभासनाश एव त्रिधा नश्यति चात्ममाया ।।
वराहोपनिषत् II - 69 बृहदा उ 2 4 5 दृष्टव्य श्रोतव्य
The Gospel I P 27
सादीपन, सांदीप इत्यपि पाठो ।

विधाय विरजाहोम शिखा सूत्र विहाय च।
काषायधारण चक्रे तोतापुरि निदेशत ॥ [1]

साष्टागप्रणतैस्तस्य समानमकरोद् गुरो ।
लोकक्षेमविधानार्थमाश्रमोऽय विधीयते ॥

आश्रमाणा च सर्वेषा संन्यास परमार्थद ।
स्वय त्यक्त्वा स्वय मुक्त्वा सन्यासी चापरानपि ॥

शिक्षयेन्ममतात्याग मोचयेन्मृत्युबन्धनात्।
सन्यासी तादृशोभूत्वा रामकृष्णो गुरूदितम् ॥

उपदेश च जग्राह वेदान्तार्थोपबृहितम्।
"मायामयं जगन्मिथ्या निर्गुण ब्रह्म शाश्वतम् ॥

अद्वैतमेव परम ज्ञान भवनिवारणम्।
देशकालक्रियाहेतुनानोपाधिविवर्जितम् ॥

अमृतत्वप्रद सत्य निष्कल पूर्ण मित्यपि।
समाधौ रामकृष्णस्तु न शशाक निरासितुम ॥

उपस्थित जगद्-दृश्य यतमानोऽपि निर्भरम्।
उपासितं चिरंकाल कालीरूप विशेषत ॥

तथाविध तमालक्ष्य परितो वीक्ष्य तद्गुरु ।
गृहीत्वा काचशकल भ्रूमध्ये च निपीडयन् ॥

अत्रैवावहितं चित्त कुरुष्वेति तमादिशत्।
उत्पपात ततो वेगाद् रामकृष्णस्य हसवत् ॥

मानस ब्रह्मचैतन्य झटित्येवानुपाधिकम्।
छित्त्वा विवेकखड्गेन जगद्-दृश्य ततस्तथा ॥

ध्यातपूर्व विशेषेण रूप काल्यास्तदोदितम्।
अवाप परमो हंस समाधि निर्विकल्पकम् ॥

दिनत्रय तथा तस्थौ दशाया स च तादृशि।
तोतापुरिश्च ता दृष्ट्वा सिद्धि तस्य समाधिजाम् ॥

विस्मयं परमं गत्वा मनस्येव मचिन्तयत्।
"अहो मया यदेवाप्तं शरद्दशचतुष्टये ॥

---

1 *1864 A D The Gospel II p 1028*

एकेनैव दिनेनासौ तदवाप समीप्सितम्।"
त्रिरात्रादधिक काल यो वसेन्नैव कुत्रचित्॥

एकादशावसन्मासान् स गुरु शिष्यसनिधौ।
तस्मिन् समाधिकालेऽस्य रामकृष्णस्य कश्चन॥

प्राणस्पन्दोऽथवा चेष्टा न काप्यङ्गेष्वदृश्यत।
विधातु प्रकृतिस्थं त "हरि ओमिति" कर्णयो॥

गुरुरुच्चै रुच्चचार तस्यान्तर्मुखचेतस।
राम कृष्णेन बाह्यार्थ स्मृति लब्ध्वा पुनस्तत॥

साक्षात्कृत तदा ब्रह्म तदेवानन्दलक्षणम्।
शिव शान्तमनाद्यन्त सगुणं निर्गुणं परम्॥ [1]

प्रतिभातै सहस्रेण तत्त्वार्थप्रतिपादकै।
आम्नातै र्नामभिश्चैव हृष्टेनाभिष्टुत ध्रुवम्॥ [2]

अविज्ञेयमनिर्देश्यमवाङ्मानसगोचरम्।
अद्वैतामृतमानन्द श्रुतिकान्ताशिरोमणि॥

नाना सिद्धान्तधिक्कारिप्रपचप्रत्युपस्थिति।
तस्याष्टमूर्ते रीशस्य मूर्तित्वा ज्जगतो विभु॥

स्वतस्त्वव्यवहार्यत्वा न्नानात्वेन निरूप्यते।
साम्य वक्रस्वभावोक्ति मुख्य न्यायाभिशोभिना॥

श्रुतिस्मृति पुराणेषु दर्शितिन पथा बुधै।
नानात्वबीजमैकात्म्य चान्व ेव समर्थितम॥

ईशकेनकठप्रश्न मुण्डमाण्डूक्य बोधितम्।
तैतिरीयैतरेयोक्त श्वेताश्वतर साधितम्॥

छान्दोग्यविद्यामहितं बृहदारण्यशोधितम्।
महावाक्यप्रसिद्धार्थ लक्ष्यरूपह्न्यबाधितम॥

---

1 *श्रीहर्षेणापि नैषधीये (21-52 to54) पर ब्रह्म स्तुतम्।*

2. *छान्दोग्योपनिषत् 8-1-1 शाङ्करभाष्यम् - दिग्देशगुणगतिफल भेदशून्य हि परमार्थसत्, अद्वय ब्रह्म मन्दबुद्धीनामसदिव प्रतिभाति। सन्मार्गस्थास्तावद भवन्तु, तत शनै परमार्थसदपि ग्राहयिष्यामीति मन्यते श्रुति। ब्रह्मसूत्रभाष्यमपि द्रष्टव्यम् (4-4-6)। श्रीरामकृष्णेन ब्रह्मणि सगुण निर्गुणभावना समन्वयस्तद्राहित्यं च बोधितम्। द्वैताद्वैतविवर्जित तत्त्वमिति अवधूतगीता I- 36 Infra pp 119, 141, 146*

2 Contd

परब्रह्मण स्तोत्रोपाकम उपपादन च --

वरमज्ञानतो ज्ञान बाह्यार्थविषयाश्रयम् ।
तस्यचापरमार्थत्वाद् भवत्यल्पं प्रयोजनम् ॥

अध्यात्मविद्या विद्याना सर्वासा तु वरीयसी।
पुरुषार्थो हि परमो निर्वाण लभ्यते यया ॥

सा विद्या द्विविधा भाति सगुणा निर्गुणेति च ।
श्रुतिस्मृति प्रमाणेषु तथावेद्यस्य दर्शनात् ॥

तथापि निर्गुणा विद्या प्रशस्या परमार्थदा ।
प्रत्यगात्मा पर ब्रह्म यत्रास्ति विषयोमहान् ॥

सन्ति वेदपुराणेषु देवताविषया स्तवा ।
उच्यते नामभि स्तोत्र ब्रह्मण. प्रीतयेऽधुना ॥

ब्रह्मनामसहस्राख्य वेदान्तप्रतिपादितै ।
किंचिदेकपद नाम कि चिदत्र समासगम् ॥

पादग चार्धग चैकवाक्यस्थमपि किंचन ।
नमोनारायणायेति नामावलिवदर्चने ॥

नाम्ना तु वाक्यरूपाणाग्रहणायोग कारणात् ।
ब्रह्मण प्रतिमाभावन्नार्चनार्थानि चात्र हि ॥

स्तोत्रार्थान्येव नामानि सहस्रादधिकानि च ।
नाम्ना पुनरुक्तेरदोषत्वम् -
यानि कानीह नामानि श्रूयन्ते पुनरुक्तवत् ॥

विशेषणतया कानि विशेष्यत्वेन कानि चित् ।
ग्रन्थभेदाच्च भिन्नानि तानि गृह्णन्तु सत्तमा ॥

किंचिदन्यच्च वक्तव्यमस्मिन् प्रकरणे मया ।
[illegible]गो नामसाहस्रप्रचुरे स्तुति वाङ्मये ॥

यत्र यत्र पदावृत्तिस्तत्रार्थान्तिरयोजने ।
महान् यत्न कृतो विद्धि पुनरुक्ति जिहासुभि ॥

प्रसिद्धनानार्थपदेषूचितोय श्रम पुन ।
अभिन्नार्थेषु शब्देषु चार्थभेदप्रकल्पने ॥

सर्वत्र न चमत्कार पीड्यते तु सरस्वती ।
मुहुराहूतनामैव श्रवणेऽवहितो नर ॥

पुन पुन कीर्त्यमानस्तथा देव प्रसीदति ।
पुनरुक्तिरलंकार एव नामानुकीर्तने ॥

ममात्र नैवाभिमत विदुषां दोषदर्शनम् ।
पुनरुक्ते ऽदोषत्वे पक्षान्तरमुदीरितम् ॥

ध्यानम्

ऐश्वर्य परमं यस्य वागगम्यमिहोद्यत ।
वाग्विधेयं कर्तुमहं त वन्दे परमेश्वरम् ॥

परब्रह्मसहस्रनामस्तोत्रम्

ॐ, भूर्भुव सुवस्सत्यं पवित्रमथमङ्गलम्, ।
भर्गो वरेण्य सवितुश्चित्तवृत्ति प्रचोदकम्, ॥

गायत्री, परमा विद्या, सन्ध्या, श्री., परमेश्वरी, ।
सावित्री, प्रतिभा, शक्ति, सर्ववर्णा सरस्वती, ॥

परा, पश्यन्तिका, देवी, मध्यमा, वैखरी, ध्वनि ।,
प्रकृतिप्रत्ययाकार सर्वमात्राक्षरस्वरम् ॥

पद, पदार्थ, स्तद्वेद्यो विषय कलशादिक ।
विषयाणा स्वभावश्च, परिणाम., क्षयो, लय. ॥,

अर्थदेहेन्द्रियस्वान्ताज्ञानोपाधिक, मव्ययम् ।,
अध्यासानामधिष्ठान, निरधिष्ठान, मच्युतम् ॥

मायाङ्कशुद्धचैतन्यपूर्णशीताशुमण्डलम् ।
नानात्व भस्मसछन्नाद्वैताङ्गारोज्जवलद्युति ॥

अनन्त विश्वचैतन्य, जीवचैतन्य विग्रहम् ।
अनादिनिधन ब्रह्म पर, मव्यक्तमक्षरम् ॥

मृन्मयाकार दृश्यस्य कारण मृत्तिकोपमम् ।
तत् साक्षाच्च परोक्षाच्च बुद्धमुक्तस्वभावकम् ॥

प्रतिष्ठा जगतो, नित्य, सर्व वेदात्मक मह ।
तमस्तोयद मध्यस्था विद्युल्लेखामतल्लिका ॥

ब्रह्मणो दिक्-पाल-त्रिमूर्त्य-वताररूपता ।

सुरेश्वरो, वीतिहोत्रो, धर्मराजोऽथ नैर्ऋत ।
वरुणो गन्धवाहश्च यक्षराजो, महेश्वर ॥

सुखदुःखाभेदबोधि विधुचन्द्र नराकृति ।
सद्यो जातस्तत्पुरुषो, वामदेव स्तथेश्वर ॥

अघोर इति विख्यात सोमो, हैमवतीवह ।[1]
पञ्चाननो जन्मबन्धमत्तद्विप विदारण. ॥

---

1 *गौर्या सिहवाहनत्व प्रसिद्धम् । शिवस्य अर्धनारीश्वरत्वाद हैमवतीवहत्वम् ।*

शाक्तमायादि सशब्दितार्या सक्रान्तचिद्वपु ।
ईश्वरेशो देवदेव. कालकाल परात्पर ॥

तदनन्यविभूतिश्चविष्णुर्वैकुण्ठमन्दिर ।
हृदयस्थाब्धिकन्यैक हेमाभोजसरोवर ॥

[1] ब्रह्मा, वराहो भूगोल समुद्धर्ता च, नारद ।
दत्तात्रेयश्च, भगवान् यज्ञ श्चोरुक्रम पृथु ॥

नरनारयणौ द्वन्द्व, कपिलश्च महाऋषि ।
पाठीन, कूर्मराजश्च धन्वन्तरिश्च मोहिनी ॥

नरसिंहो, वामनश्च, भार्गवो जमदग्निज ।
कौसल्यासुप्रजा राम पराशरतनूभव ॥

श्रीकृष्ण-रामौ, बुद्धश्च कल्किर्विष्णुयश सुत ।[2]
यश्च धर्माभिरक्षार्थ युगान्ते प्रभविष्यति ॥

एवमाद्यवतारैकविंशत्यरसुदर्शन ।
स्वपदध्यायि योगीन्द्र मन पद्ममधुव्रत ॥

वेधा वाणीशिरोधार्य स्फुटल्लोकदल व्रजम् ।
वेदसौरभनि.श्वास मपूर्व सरसीरुहम् ॥

[3] महिदासश्चैतरेयो गजेन्द्रार्तिहरो हरि ।
सुजातश्च कुमारश्च सनत्पूर्व. सनन्दन. ॥

सनकश्च हयग्रीवो हसश्चक्रधरो मनु ।
[4] सायगृहश्च गरुडो वटपत्रशयी ध्रुव ॥

पुरुषश्चौपनिषद. स्वीये प्रकरणे स्थित. ।
अनन्यशेषो नित्यश्च शास्त्रयोनि रनीश्वर ॥

---

1 *अवतारगणना भागवतपुराणे - I स्कन्धे द्रष्टव्या।*

2 *कल्किरेव विष्णुयशा इतिआन्ध्रमहाभारते अरण्य पर्वणि (IV) एवमन्येऽप्यवतारा द्रष्टव्या ।*

3 *महिदास एव नारद इति केचन भागवतव्याख्याकारा ।*
महिदास ऐतरेय इति छान्दोग्य श्रुति, 3-16-7

4 *सायगृह इति कृष्णस्य पूर्वजन्मस्वन्यतमम् - महा भा अरण्य 12-11*

ब्रह्मण औपनिषदत्वम् -

ईश- आवास सर्वजगत, सर्वभूतान्तरस्थित ।
कर्मिणा गृधिमुक्तानामाराध्य, परमेश्वर ॥

विजिज्ञासुभिरन्वेष्य सोहमस्मीति तत्त्वत ।
प्रत्यगात्मस्वरूपश्च, जुगुप्सारहित, शिव ॥

सभूत्यसभूतिरूप, तदतीतं, निरञ्जनम् ।
अनेजच्च, जवीयश्च, दुष्प्राप दैवतैरपि ॥

अन्तर्बहिश्च, तन्मध्य, दवीयश्च समीपगम् ।
दलन शोकमोहादेरनिष्टस्यैक्य दर्शिनाम् ॥

तिष्ठद् धावन्मातरिश्वा, सर्वकर्म विधारक ।
स्वयम्भू, रमृत मृत्यु., पदार्थाना विभागकृत् ॥

अपापविद्ध सशुद्धमेक, शोकविवर्जितम् ।
भूयिष्ठ परिचारार्ह, पूषैकर्षि सदेकदृक् ॥

अकाय मव्रण, शुक्र मनीषी परिभू कवि ।
दातार्थाना समस्ताना, विद्याविद्योभयास्पदम् ॥

यमस्त्वापा विधाताच, प्राजापत्यो, जगत्पति ।
[1] कल्याणतमरूप च तेज सूर्योऽनिल· क्रतु ॥

हेमपात्रावृतमुख सत्यधर्मार्थिदर्शनम् ।
[2] विद्वान् वयुनजाताना, मग्नि सुपथनायक ॥

कर्मिज्ञान्यायुरमृतप्रदो, वायु परात्पर ।
ईशावास्य श्रुतिवचो जिज्ञास्यमहिमोदय ॥

केन वाग वाच, श्चक्षुष श्चक्षु, प्राणा प्राणस्य, जीवनम् ।,
श्रोत्र श्रोत्रस्य, मनसो मनस्तेषामगोचर. ॥

पूजनीयतम ब्रह्म, विदिताविदितात्परम् ।,
यक्ष, वीर्यप्रद श्चात्मा, सत्य विद्याऽमृतत्वदा ॥,

---

1 *बृहदारण्यकोपनिषत् 4 4 4*

2. *विद्वान् जानन्, वयुनानि कर्माणि प्रज्ञानानि वा - शकरभाष्यम् विद्वान् विदश्च - अमर । पाणिनि 7 1 36, शतुर्वसु*

मीमास्य देवताभिश्च, प्रत्यगात्मतया स्थितम् ।
बोधे बोधे च विदित, मविज्ञात विजानताम् ॥,

विचेय सर्वभूतेषु वेदितव्यमिहैव, [1] सत् ।,
इन्द्रादीना परीक्षार्थ वज्रीकृततृणाङ्कुरम् ॥,

पुनर्विद्यावता तेषा प्रसन्न, बलवत्तमम् ।,
उमा हैमवती ब्राह्मीनाम्नी विद्यापि, तद्वनम् ॥,

विद्याविनययुक्ताना धीराणा बन्धमोक्षदम् ।,
अन्वेष्य सर्वभूतेषु, विद्युज्ज्योतिस्तमोपहम् ॥,

अग्नीन्द्रवायुभि स्पृष्ट, मन सकल्पकारणम् ।,
आयतन, सप्रतिष्ठा, साङ्गा वेदास्तपो दम ॥,

समस्तपापहरण, स्वर्गलोकप्रद मह ।,
केनोपनिषदुल्लेख्य, पदवाक्यप्रमाणितम् ॥ [2]

कठ । श्रेयश्च प्रेयसो भिन्न, सापराय, महाद्भुतम् ।
अतर्कविषयं तत्त्व विवृत नचिकेतसे ॥

वैवस्वतोपदिष्ट च मृत्युना, ध्रुवमव्ययम् ।
अध्यात्मयोगाधिगम, धर्माधर्मविलक्षणम् ॥

अभय चाशरीर च, शरीरे समवस्थितम् ।
आत्मेन्द्रियमनोयुक्तो भोक्ता, काष्ठा परा, गति ॥

मदामद गह्वरेष्ठं, पुराण च, महल्लघु ।
इन्द्रियाणि, तदर्थाश्च, मनो, बुद्धि, र्महान्, विभु ॥

अव्यक्त परम, तस्मात्पुरुषोप्युत्तम पर । [3]
गुहाप्रविष्टस्तपसोजात प्राणो, जगत्प्रभु ॥

मोक्षद पूर्वभावीचाप्यदितिर्देवनामयी ।
शुद्धोदक निभो, ऽवक्रचेता देहपुराधिप ॥

---

1 केन 2-5 कठ 2-4 बृ. 4-4-14 गीता 5-19

2 शकराचार्यस्य पदभाष्यं वाक्यभाष्यमिति भाष्यद्वय केनश्रुते । तत्र निरूपित मित्यर्थ ।

3. छान्दो VIII

शमसच्चरितप्रज्ञा समाधिगुणसाधित. ।
वाड्मनोबुद्धिमहतामुपसहारभूमिका ॥

शातआत्मा ऽचलो दुर्ग, परागिन्द्रियदुर्लभ ।
ब्रह्मक्षत्रौदनो विश्वस्यात्ता मृत्यूपसेचन ॥

मन प्रग्रहवान देहस्यन्दनो बुद्धिसारथि ।
विषयाध्वेन्द्रियाश्वश्च रथयात्रासमुत्सुक ॥

अशब्दमस्पर्शरस, गन्धरूपविवर्जितम् ।
भञ्जन मृत्युपाशाना, शब्दस्पर्शरसादिवित् ॥

अनन्त, परम, गुह्य, मनादि, च सनातनम् ।
गूढोत्मा सर्व भूतेषु सूक्ष्मदृष्टि प्रकाशित ॥

आवृत्तचक्षुषा ज्ञेय स्वात्मन्येव मनीषिणा ।
II स्वप्नजागरितान्तस्थो, मध्वदो भुवनेश्वर ॥

अङ्गुष्ठमात्र पुरुषो, विधूम ज्योति रुज्ज्वलम् ।
हस शुचि, र्वसुर्होता व्योमसच्चाद्रिजा, बृहत् ॥

प्राणापानान्तरालस्थो, वामन., सुरसेवित· ।
एकोऽनेको, जागरूक. सुप्तेषु, रविसनिभ· ॥

निर्लेपो बहुरूपश्च भुवने ऽनल वायुवत् ।
आत्मस्थ. परमो मोद· प्रकाश. सर्वभासक ॥

वि टपोऽश्वत्थ वृक्षस्य मूल पत्र सुमं फलम् ।
अविविक्त स्वप्नतुल्य पितृलेके कृतान्वित· ॥ [1] 1101

गन्धर्व लोकेऽप्यनृजु सलिलान्त स्थ वायुवत ।
मलिने हृदि चादर्शे विपर्यस्तावभासक ॥

विमलीभूतबुद्धौ च प्रतिबिम्बनिभ. स्फुट ।
छायाभिन्नातप इव ब्रह्मलोके स्वरूपभाक ॥

---

1. कृतान्वित कर्मफल भोगान्वित· ।
R D Ranade A Constructive Survey of Upanishadic Philosophy p 20
छान्दोग्योपनिषत 8-7 4 अप्सु आदर्शे ।

विदितो जन्मनीहैव नि श्रेयसपदप्रद ।
काठकश्रुतिसवेद्य, स्वप्रकाश सुखैकभू ॥

प्रश्न I ब्रह्मनिष्ठै र्ब्रह्मपरै परम ब्रह्म सेवितम् ।
ब्रह्मचर्य तप श्रद्धा व्रतानुष्ठान साधितम् ॥

आदित्य चन्द्रादि तनू रयिप्राणात्मकस्य च ।
मिथुनस्य प्रजाना च हेतुर्देव प्रजापति ॥

माया च हरिणो ज्योति, र्ब्रह्मलोक, परायणम् ।
विश्वरूपो, जातवेदा, उपदिष्ट कबन्धिने ॥

II अथर्वागिरसा सत्य, व्रात्यो, विश्वस्य सत्पति ।
प्रजाबाणाभिधेयस्य शरीरस्य विधारक ॥

वाड्मनश्चक्षु श्रोत्रादि षट्कषट्पदनायक ।
श्रीप्रज्ञादे· प्रदाता च, मातृवत्परिपालक ॥[1]

त्रयी-ब्रह्म-क्षत्र-यज्ञ रथनाभि, र्बलिग्रह ।
वैदर्भये भार्गवाय सदिष्टो मुनये प्रभु ॥

III इन्द्रियप्राणवृत्तीना जनक, सविधानकृत् ।
पुण्यपापमनुष्यादिलोकाना मार्गदर्शक ॥

छाया, सम्राड्, विभु प्राण सप्तार्चि र्मन-आयति ।
आश्वलायनकौसल्य विदितो, हृदयस्थित ॥

IV ब्रह्म प्रणयन, ज्योति प्राणाग्नि र्जाग्रदाश्रय ।
मनोलीनेन्द्रिय स्वापो, देव स्वपितिनामक ॥

स्वप्नग, सदसद -दृष्टादृष्ट दृङ्महिमाञ्चित ।
पृथिवी, पृथिवीमात्रा, चक्षु, र्दृश्यं, [2] वचश्च, वाक् ॥

चित्तं, चेतयितव्यो, ऽहंकारोऽ, हंकृतिगोचर ।
एवमाद्यस्य सर्वस्य वासोवृक्षो, ऽक्षर, परः ॥

आत्मा सर्वस्य, सर्वज्ञश्चेन्द्रियर्थाशुभास्करः ।
तत्त्वं गार्ग्येण विदितं, विज्ञानमयविग्रहम् ॥

---

1. *छान्दो 5-24-5.*
2. *वागिन्द्रियविषय ।*

V परापरब्रह्मरूप, मोकारख्य समुच्चितम् ।
मात्रावेदत्रयाकार नृ-चन्द्र-ब्रह्मलोकदम् ॥,

शान्तमायतन नित्य बाह्याभ्यन्तरमध्यमम् ।,
अमृतत्वप्रद, शैब्यविदित, भयवर्जितम् ॥

VI प्राणादि षोडशकल, [1]सुकेशाज्ञातवैभव ।,
अन्त शरीरे संलक्ष्य, नामरूपादिवर्जित ॥,

अमृता च कला शुभ्रा, परम ब्रह्म शाश्वतम् ।
यजमानश्च, कर्ता च विज्ञानात्माऽमृतो, ऽनघ. ॥,

नानाचेतनसिन्धूनां सगमैकसुधार्णव. ।,
अविद्याया परं पार, सेतुश्च, तरण तरि· ॥,

दक्षिणोत्तरयानाभ्या मगम्य विरज पदम् ।,
प्रश्न षट्कसमाधान पिप्पलादसमर्थितम् ॥

मुण्ड I ऋगथर्वयजु सामसमूहो वेदसागर ।,
प्रपञ्चतन्तुसन्तानस्योर्णनाभिर्गुणाकर. ॥,

सर्वज्ञं सर्वविद् ब्रह्म, श्रद्धा ज्ञानमय तप. ।
अकृत, कारण सत्य–नामरूपान्नकर्मणाम् ॥,

आहुति., सप्तजिह्वश्च, सुकृतं, च परामृतम् ।
लोक लोकि निधान च सेतुरेको मनोऽमनाः ॥

II अमूर्तो, विश्वरूपश्च, सदसत् तमसः पर· ।
अन्तरात्मा, ह्यजो, नित्यो रुक्मवर्णः परावर. ॥

सत्येन लभ्यस्तपसा सम्यग्ज्ञानेन यत्नत ।,
परमं धाम सहजं प्राप्यं धातुपसादतः ॥,

महत्पदं सनिहितं वरणीयं गुहाचरम् ।
लक्ष्यमोंकारकोदण्डस्याप्रमत्तात्मपत्रिणः ॥

तन्मयीभावयुक्तस्य मुमुक्षो विजयावहम् ।
ज्योति र्हिरण्मये कोशे, सर्वविज्ञानशेवधिः ॥

---

1. मुण्डको 3-2-7

आनन्दरूप विरज दिव्य, ब्रह्मपुरे स्थितम्।
नामरूपविनिर्मुक्त शिथिलग्रन्थिभिर्वृतम्॥

III समानवृक्षसवासिसुपर्ण सखमुत्तमम।
अणुरूप, तारकादिभासक, निष्कल मह ॥

लभ्यश्च वरयित्रैव निष्कामेन कृतात्मना।
कलाना पञ्च दशाना लयस्थानमनश्वरम्॥

ऐक्यप्रद ब्रह्मविद्, [1] शिरोव्रतवतार्चितम्।
ब्रह्मप्रोक्तब्रह्मविद्या रहस्य, वेद्यमुत्तमम्॥

अथर्वागी सत्यवह भारद्वाजागिरोमुखै।
शौनकेन च विज्ञात ज्ञानमेक समस्तगम्॥

परापराख्यविद्यार्थ, परमार्थविवेकद।
अपुण्यपाप ममृत वेदान्त ज्ञाननिश्चितम्॥

सन्यासयोगशुद्धानां मुक्तिद, भेद वर्जितम्।
मुण्डकोपनिषद्धाव्य, परमात्मपदं, शिवम्॥

माण्डूक्य ओंकारख्य मिद दृश्य सर्व दृगुपलक्षणम्।
भूतभावि भवद्रूप कालातीत मथाक्षरम्॥

एतद् ब्रह्मायमात्मा च चतुष्पादाभिशोभित।
जाग्रद्दशो बहि प्रज्ञ सप्ताङ्गः स्थूलभोगवान्॥

एकोनविशतिमुख पादो वैश्वानराहय।
अकार. प्रथमामात्रा सर्वकामार्थदायिनी॥

अन्त·प्रज्ञ. स एवापि तैजस प्रविविक्तभुक्।
स्वप्नस्थानगतो देवो, मात्रया च द्वितीयया॥

उकारत्वेन विज्ञेय श्चोत्कर्षो ज्ञानसतते।
एकीभूत सुषुप्तिस्थ प्रज्ञानघन विग्रह ॥

आत्मानन्दमय प्राज्ञश्चेतोमुखसुखैकभुक्।
पादस्तृतीयो मात्रासु मकार रुगान ॥

---

[1] प्रश्नोपनिषत् I I शिरस्यग्निधारणलक्षण

अन्तर्यामी, सर्वयोनि, भूताना प्रभवाप्ययौ।
सर्वेश्वरश्च, सर्वज्ञ स्वप्नकामविवर्जित ॥

दृश्यभिन्नो दृक्-स्वरूप श्चैकात्मप्रत्ययोदय ।
शान्तश्चानुभयप्रज्ञ. शिवोऽद्वैतो ऽह्यलक्षण ॥

अग्राह्योऽव्यपदेश्यश्च, प्रज्ञाप्रज्ञविलक्षण ।
पादमात्रारूपभेदप्रपञ्चोपशमोऽमल ॥

पादश्चतुर्थोऽमात्रश्च, प्रणव पादवर्जित ।
परिपूर्णो निर्विभाग परमात्मा पर पदम् ॥

वाच्य वाचक रूपस्य प्रणवस्यैकमास्पदम्।
माण्डूक्यश्रुतिसराध्य वाङ्मन कर्मदुर्लभम् ॥

तैत्ति । शिक्षामहासहितात्मा पञ्चाधिकरणो विभु ।
अधिलोक मधिज्योति रधिविद्यमधि-प्रजम् ॥

अध्याम वियदापश्च विद्या सधि प्रजापि वाक्।
ऋषभश्छन्दसा मिन्द्रो मधुमानमृतोक्षित. ॥

सुमेधा ब्रह्मण. कोश सच्च त्यच्च विचर्षण ।
[1] भूर्भुव सुवरन्यापि चतुर्थी व्याहृतिर्मह. ॥

माहाचमस्य मुनिना विदित महदद्भुतम्।
आदित्य चन्द्रौ ब्रह्माग्ने चाङ्गीभूत सुरान्तरम् ॥

अन्तर्हृदय आकाश पुरुषश्च मनोमय. ।
हिरण्मयोऽमृतो देवस्तालुकान्तर्विवर्तन. ॥ [2]

इन्द्रयोनिर्महद् ब्रह्म स्वाराज्यं मनसस्पति ।
विज्ञान पति राराम आत्मा विष्णु रुरुक्रम ॥

चक्षु श्रोत्र मनो वाक्त्वक् [3] पाङ्क्त पूर्ण दमस्तप ।
ऋत सत्य त्रिशकृक्त वेदानुवचनार्थगम् ॥

कीर्तिरूर्ध्वपवित्रश्च भववृक्षस्य रेरिवा।
स्वाध्याय भूतिधर्मा दिष्वप्रमादश्च दातृता ॥

---

1 छान्दो IV- 17 - 1 to 3 लोक -देव - वेद - रसा महाव्याहृतय शंकरभाष्यम्।
2. महाभारते शान्ति पर्वणि 284-71 (p 561) नीलकण्ठव्याख्या।
3. ऐतरेय ३।

आदेशश्चोपदेशश्च समर्शश्चानुशासनम् ।
II सत्य ज्ञान मनन्त च पर व्योम गुहाहितम् ॥

सर्व काम प्रद ज्ञान प्रतिष्ठा भूतकारणम् ।
प्राणि जातौषध चान्न शारीरश्चायुरात्मक ॥

अन्नप्राणमनोविज्ञानानन्दा कोशपञ्चकम् ।
उपसक्रमितानन्द पञ्चकोशान्तरस्थित ॥

पुच्छभूत पर ब्रह्म सदसद्विचिकित्सितम् ।
सुकृत रस आकाशश्चाभय रहितोदरम् ॥

इन्द्रसूर्याग्नि वाताना मृत्योश्चभयकारणम् ।
[1] निष्काम श्रोत्रियावाप्तपूर्णानन्दरसात्मकम् ॥

जन्माद्यस्य प्रपञ्चस्य यतस्तत् कारण परम् ।
योगक्षेमवह जन्तो कामरूप च सामगम् ॥

III सुव [2] र्न ज्योतिरमल प्रत्यक्ष बृहदन्नदम् ।
तैत्तिरीयश्रुतिज्ञेय पुनरावृत्ति वर्जितम् ॥

ऐ उ I एक आत्मा, ऽग्रसभूत श्चाम्भोमरमरीच्यपाम् ।
लोकाना लोकपालाना मग्न्यादीनामपीक्षिता ॥

स्रष्टा मुखादिसपन्नपुरुषस्य महात्मन ।
अन्नायुर्ब्रह्म ततम सुराणामन्नकारणम् ॥

वृत्ति धृतिश्चसकल्पो विद्रुति सर्वनान्दनम् ।
प्रज्ञान ब्रह्म हृदय जङ्गमस्थावर जगत् ॥

जूतिर्मनीषा विज्ञानं देवा इन्द्र प्रजापति ।
पुरुष सुकृत मूर्ति रिदन्द्रोऽलंभवो [3] ऽभव ॥

अशना च पिपासा च भागिन्यौ देवताहवि ।
अन्नमन्न ग्रहीता च [4] कोहमित्यनुचिन्तक ॥

---

1 *बृहदा IV -3 - 33*
2 *नकार उपमार्थ । सुवरादित्य, तद्वत् ।*
3 *अलभव अलभाव, पर्याप्तता ।*
4 *Cf Ramana Maharshi who am I*

II नित्यानित्य क्रिया धारस्त्रिस्वप्नावसथोद्बव । [1]
III मन सज्ञानमाज्ञान दृष्टिर्मेधा मति स्मृति ॥

भूतानि बीजजातानि चासु कामो वश क्रतु ।
अयोजालोपम देह बन्ध निर्जरभीतिदम् ॥

छिन्दतो वामदेवस्य गर्भस्थस्यापि मोक्षद ।
ऐतरेयश्रुतिज्ञेय रहस्य परम महत् ॥

श्वेत I देशकाल निमित्तादि व्यवस्थाहेतुरव्यय ।
ध्यानयोगेन ससाध्य प्रधान प्रकृति परा ॥

उद्गीत व्यक्तमव्यक्त शक्ति र्ज्ञानबलक्रिया ।
स्वभावो नियति कालो दिव्य धाम च शाश्वतम् ॥

आत्मतत्त्व बिम्बरूपं वीतशोकमनामयम् ।
ऋचा सद्म च देवाना पर व्योमाक्षर पदम् ॥

II आत्मसस्थ प्रत्यगात्माऽप्रतिम. सर्वतोमुख ।
ब्रह्मतत्त्व सर्वपाशविनिर्मोक्ष क्षरातिगम् ॥

विश्वमायानिवृत्तिश्च सर्वद्वन्द्वविवर्जित. ।
III एको रुद्रो विश्वरूपो जालवान् विश्वतोमुख. ॥

विश्वतस्पादजो देव प्रेरिता परिवेष्टिता ।
IV ब्रह्मचक्रभ्रमो हस. संभवो जगतो, हर· ॥

ब्रह्म त्रिविधमात्मस्थ शुभा बुद्धि. शिवा तनू. ।
परिणामयिता कर्मफल भोक्ता फलप्रद· ॥

विद्याविद्यारूप आत्मा चेतनानां च चेतनः । [2]
हृदिस्थो मनसा वेद्यो घृतान्तर्मण्डसंनिभ ॥

भवभीरुभिराराध्यश्चाजातो दक्षिणानन. ।
V कपिलो गुणसपन्न सम्राड् भुवन पालक· ॥

---

1. *ऐत / उ / शाङ्करभाष्यम् 3-12 स्वप्नत्रय जाग्रदाद्यवस्था. / आवस्थात्रयं दक्षिण चक्षु, मन., हृदयाकाशश्च / अथवापितृशरीर / मातृगर्भाशय / स्वशरीर च / 4/1-4 उद्भव (जन्म) त्रयं रेतोनिर्गमरूप, प्रसव, स्वदेहान्निर्गमश्च / क्रिया = इन्द्रियव्यापार· /*

2. *कठ 2-2-13*

आराग्रमात्रो ऽनन्तश्च निर्लिङ्गो लिङ्गभेदयुक् ।
निष्कल कातारूपश्च दिग्रूपो दिग्विवर्जित ॥

VI माक्षीचेता गुणीदेवो, ज्ञश्च कर्म विर्वतन ।
अजो वशी शिवो नील कला सर्गकर प्रभु ॥

सूक्ष्मैरात्म गुणैर्युक्तो निर्गुणश्चेश्वरेश्वर ।
कार्यकारणरूपश्च साख्ययोग समर्थित ॥

श्रुतिगम्यो रहस्यार्थ श्चन्द्रसूर्यादिभासक ।
आत्मबद्धि प्रकाशश्च विधाता ब्रह्मण स्वगट ॥

प्रधानक्षेत्रज्ञपति र्मुमुक्षुशरण परम् ।
अत्याश्रमि ध्येयपद प्रसाद गुणमण्डितम ॥

सुलभ. परया भक्तया सर्वश्रुतिसमन्वय ।
श्वेताश्वतरसवेद्यस्वरूप परमेश्वर ॥

छान्दोग्य I छन्दोगैर्गीत उद्गीथ प्रणवश्चेति बहृचै ।
प्राणादित्यतयोपास्यो वाग्दोह श्चान्नदो महान ॥

ओङ्कारोऽष्टम उद्गीथस्तद्विद्याविषयोऽक्षरम् ।
सर्वकाम-प्रद सर्वरसाना रसवत्तमम् ॥

उश्च गीश्च थकारश्च देववेदत्रयात्मक ।
भूमा कौषीतकिप्रोक्त आदित्यान्तर्हिरण्मय ॥

उन्नामा पुण्डरीकाक्षो धूतपाप्मा बृहस्पति ।
वाक्-प्राणावक्षिपुरुषो ब्रह्मचोक्थ त्रयीमयम् ॥

गति स्पर्श स्वर स्तोभ सत्प्रतिष्ठा परायणम् ।
आकाश सविता देवो वरुणश्च प्रजापति ॥

II साम पञ्चविध साधु हिकारादि च सप्तकम् [1]
विनर्दि गानमुद्गान धर्मस्कन्धस्तपोमृतम् ॥

आदित्य वैश्वदेव च भूर्भुवस्स्वस्त्रयीभवम् ।
अक्षर तपसो जात सतृण्णाखिलवाङ्मयम् ॥

---

1 II 8-1 सप्तविधमपि साम

मात्रा यज्ञस्य सवन तद्विधाता फलप्रद ।
III [1] मधुविद्यासमाराध्य सर्वकर्मा प्रभाकृति ॥

इदरूपस्सर्वरूपस्तज्जलानप्यनादर ।
अवाक्यन्तर्हृदि ब्रह्म शाण्डिल्यमुनिसेवितम् ॥

कृष्णाय देवकीजाय घोरोक्त यज्ञदर्शनम् ।
अध्यात्म मन आकाशश्चाधि दैव चतुष्पदम् ॥

वाक्-प्राण-चक्षु श्रोत्राधि दिगादित्याग्निवायुपात् ।
उपास्य ब्रह्म तत्त्वेन तेज [2] कीर्ति-यश प्रदम् ॥

IV सवर्गविद्याविषयो रैक्वाज्जानश्रुति श्रित ।
वायुप्राण स्वरूप च ब्रह्मवागनलग्रह ॥

हिरण्यदष्ट्रो बभस [3] श्चानसूरि र्महाशन ।
देवाना जनिता गोपा भुवनस्य विराट् प्रभु ॥

जाबालसत्यकामेन पादैर्ब्रह्म चतुष्कलम् ।
प्राक्-पृथिव्यग्निप्राणेषु विभक्त षोडशात्मकम् ॥

वायोरग्नेस्तथादित्या त्प्राणात्साक्षादुपार्जितम् ।
[4] प्रकाशानन्तज्योतिष्मल्लोकायतनवत्प्रदम् ॥

सयद्वाम प्रकाशात्मा वामनीर्भामनीरपि । 1201
प्राणो ब्रह्म च क ब्रह्म ख ब्रह्माभेदबुद्धिगम् ॥

ब्रह्मा चाध्वर्युरुद्गाता होता वेदचतुष्टये ।
वाङ्मनसे वर्तनी च यज्ञो वायुप्रतिष्ठित ॥

अनावृत्तिभय ब्रह्मपथगम्य सनातनम् ।
/ प्राणो ज्येष्ठो वसिष्ठोऽम. [5] श्रेष्ठो वागादिवृत्तिषु ॥

---

1. *बृहदा II - 5-1f*
2. *कीर्ति =कृत सशब्दने । यश =अशू व्याप्तौ*
   इति धातुभेदादर्थभेद । बृ उ 1-2-5 प्राणा श्चक्षुरादयो वै यश ।
3. *भक्षणशील ।*
4. *प्रकाश वल्लोकेति प्रत्येकमन्वय. । आयतनवत्प्रदमायतनवल्लोकप्रदम् ।*
   छा 4 4 - 4 to 4 8 4
5. *बृ उ I-3-21 शाकरभाष्यम् - सा च अमश्चेति तत् साम्न सामत्वम् ।*

सलोकपर्जन्यधरा-पुस्त्रीरूपोऽग्निराहुति ।
महाशालैश्च मीमास्य आत्मा वैश्वानरो विभु ॥

सुतेजा विश्वरूपश्च प्रादेशोऽभिविमानवान् ।
अग्निहोत्र च भूतानामन्नदो [1] मातृसमित ॥

VI तत्त्वमस्यादि वाक्यार्थ सद्विद्याविषयो महान् ।
त्वमर्थश्च तदर्थश्च तयो रैक्य भिदोज्झितम् ॥

सर्वलोहमयव्यापकैकलोहमणिप्रभ ।
नखकृन्तन निर्माण कर्ष्णायस समाकृति ॥

घटाद्युपादानमृत्तिकोपमो, जगदाश्रय ।
स्वज्ञानजनिता शेष प्रपञ्चज्ञान सतति ॥

समस्त बहुधा जात मिदमग्रेऽद्वितीयसत् ।
नासद् एक तपोनिष्ठ प्राणिसधात कारणम् ॥

तुष्टिद वृष्टिद ज्योतिस्तेजोबन्न त्रिवृत्कृतम् ।
रोहित शुक्लकृष्णे च नामरूप त्रिधास्थितम् ॥

सविकार निर्विकारमन्नादो धातवस्त्रय ।
अणिष्ठो मध्यमश्चेति स्थविष्ठश्चेति विश्रुता ॥

पुरुष षोडशकलो मनश्चान्नमयाकृति ।
प्राण आपोमयस्तेजो मयी वाक् स्वपिति प्रभु ॥

मूल शरीर शुंगस्य प्रतिष्ठायतन परम् ।
अणिमा सत्य मात्मा च जगतो देवता परा ॥

नानापुष्पसमानीताविविक्त मधुसनिभ ।
सपत्त्यतरितव्याघ्रसिहकीटादिभेदधी ॥

नानाजीवनदीभेदतिरोधानैक्य वारिधि ।
हर्षदो द्रुमशाखादे र्जीवात्मा जीवनस्रव ॥

दृश्य-न्यग्रोध विस्तार सूक्ष्म वीज कणोऽणिमा ।
जगल्लवणनीरान्तर्निलीन लवणोपम [2] ॥

1 छा । 24 - 5 प्रश्नोपनिषत् II -13
2 बृ II 3 19 छा VI II I
3. बृ II 4 12 उदकसैन्धवखिल्य दृष्टान्त

सदिष्टमार्ग मेधावि प्राप्त गान्धार सनिभ ।
मुमूर्षु वाङ्मन प्राणतेज संपत्तिरव्यया ॥

सत्याभिसंधनिर्मोक्ष-प्रदस्तप्तकुठारवत् ।
VII सनत्कुमारस्कन्दोक्ता भूमविद्या सुरर्षये ॥

ऋगादि नामरूप च, करण वाङ मनोमयम् ।
चित्तसकल्पनध्यान विज्ञान बलरूपकम् ॥

अन्नाप्तेजोनभोरूप स्मराशाप्राणरूपकम् ।
सत्यं पर ब्रह्म वेद्य भूमानल्पसुख परम् ॥

अमृत यत्र नैवान्यो दृक्-श्रुति ज्ञान गोचर ।
स्वे महिम्निस्थित नित्य तमस· परमुज्ज्वलम् ॥

आत्मानन्द कामचार प्राक्-पश्चा दक्षिणोत्तरम् ।
अहमात्मा पुरस्तादप्युपरिष्टात् समन्तत. ॥

आत्मक्रीडश्चात्मरति स्मरादीना च कारणम् ।
वीतरोगो ऽमृत्युदर्शी चादु खस्तमस. पर. ॥

आहारसत्त्वशुद्ध्या च स्मृतिलभेन साधितः ।
[1] पश्यो वीतकषायस्य मुक्तिदो ग्रन्थिभेदक ॥

VIII पुण्डरीक ब्रह्मपुरे दहर वेश्म चान्तरम् ।
अक्षेत्रज्ञैरसप्राप्यहिरण्यनिधिसंनिभ· ॥

गच्छन्तीनामहरह प्रजानामप्यगोचरः ।
स्वरूपेणाभिनिष्पन्न सप्रसाद स्वराड्विभु. ॥

सकल्पज समुत्थान सर्वकाम फलप्रदम् ।
अन्वेष्टव्य विजिज्ञास्य भूताकाशनिभ नभ ॥

सर्वभूतचयावास· समाहित जगद्गणम् ।
कर्मजितलोकभिन्न हृदय ध्रुवमक्षरम् ॥

हृद्ययं स्थित आत्मा च ख्यातो हृदयनामक ।
ब्रह्मचर्य-समासाद्या ब्रह्मपूरपराजिता ॥

सकारश्चामृत तत्त्वं तकारो गर्त्यलक्षण. ।
तद्-द्वयस्य वशीकर्ता यकारश्चोभयाश्रय. ॥

---

1. *मुण्डकोपनिषत् III-1-3*

सकारश्च तकारश्च यकारश्चाक्षरत्रयम् ।
सत्य ब्रह्मैव लोकश्च ब्रह्मलोक इति श्रुत ॥

परो ऽपहत पाप्मा च विशोकोविजरोव्यय ।
पर ज्योति र्विमृत्युश्च सत्यसकल्प कामवान् ॥

विजिघत्सो ऽपिपासश्च गतभीर्भयनाशन ।
विधृति सेतु रमृत जहत्सुकृतदुष्कृतम् ॥

सकृद्विभातमहिमा प्रतिबिम्बेतरो ऽमल ।
अशरीरमधिष्ठान मसस्पृष्टप्रियाप्रियम् ॥

देहस्वप्नसुषुप्तिस्थ विनश्वरविलक्षण ।
निरञ्जन कृतात्मा च धूतरोमहयोपम ॥

राहुमुक्त शशाकाभ पुनरावृत्तिवर्जित ।
छान्दोग्यश्रुति सवेद्यो, [1] महय्य पुरुषोत्तम ॥

बृहदा I उषाश्चाहर्मुख सूर्यो वातोऽर्कोऽश्व प्रजापति ।
आगिरसो देवताऽत्मा साम ब्रह्मण्यवस्थिति ॥

शरीरादे र्बल वीर्य यश प्राणेन्द्रियाणिच ।
स्वरो बन्धु सुवर्ण च प्रिय आत्माऽप्रमायुक ॥

पूर्व मोषन् पाप्मचय पुरुषश्चेतिकीर्तित ।
कीर्तिरैकात्म्य विज्ञान [2] श्लोको निर्वाणलक्षण ॥

[3] असत्-तमो मृत्युभिन्न सर्वान्तरतम पदम् ।
सलोकता च सायुज्य सज्ज्योतिरमृत परम् ॥

प्राणविद्या जपस्यार्थश्चासत सत्प्रवर्तक ।
तमसो ज्योतिर्गमको मृत्यो रमृतदर्शक ॥

अहब्रह्मास्मि-वाक्यार्थो ब्रह्मविद्याप्यनन्तदा ।
वामदेवादिविज्ञातमनुसूर्यात्मभावन ॥

मन-आत्मा च [4] वाग्जाय प्राणप्रजोऽग्रसभव ।
चक्षुर्मानुषवित्तश्च श्रोत्रदैवतवित्तक ॥

---

1 *पूजनीय*

2 *छा 3-18-6 कीर्ति यशश्च ।*

3 *कठ II-1-13*

4 *जायायानिङ् (5-4-134) तथापि समासान्तविधे रनित्यत्वम् ।*

यज्ञादि पाङ्क्तकृत्स्नश्च पुरुष षोडशीकला।
इदमग्रेभव ब्रह्म चात्मलोक कलामय ॥

अक्षिति नामरूपे च सत्य कर्म-विधारकम्।
अशेषनाम्ना मुत्थान मुक्थ रूप च कर्म च॥

II राजा जिष्णुश्च वैकुण्ठ श्चापराजिष्णु [1]रीश्वर ।
अजातशत्रु-बालाकि सवादविषयीकृत ॥

अतिष्ठा सोम आत्मन्वी चादित्ये शशि वातयो ।
छायाया दिशि चादर्शे बुद्धौ पुरुषसज्ञक ॥

[2] स्वपित्यन्तर्हृदाकाश पुरीतन्निलय पुमान्।
लोकतन्तूर्ण नाभिश्च प्राणाग्निकणपावक ॥

सत्य सत्यस्य विज्ञान मयोऽमूर्त च मूर्तवत्।
दक्षिणाक्षि स्थितो "नेति-नेती" त्यादेशगोचर ॥

तेजोमयोऽमृतमय इन्द्रो मायाभिरन्वित ।
अविज्ञेयश्च विज्ञाता ब्रह्मात्मा द्वैतवर्जित.॥

द्रष्टव्यश्च प्रियतम श्रोतव्य· श्वसितागम ।
मन्तव्यश्च निदिध्यासाविधेयो विदिताखिल ॥

मैत्रेयीविद्याविदितो विज्ञानघनविग्रह ।
अयमात्मा सर्वमिद भूत विद्यायन महत्॥

पृथिव्यापोऽग्नि रादित्यो दिशश्चन्द्र स्तडिद्-द्युति ।
आकाश स्तनयित्नुश्च सत्यधर्मात्मक मधु॥

दध्यङ्डाथर्वणप्रोक्त सात्म्यो दसो मधूच्चय ।
सर्वानुभू पुरिशय· पुरुरूप सनातन ॥

श्रुतिप्रधानतात्पर्य मधुकाण्ड समर्थितम्।
III ब्रह्मतत्त्वमनार्त च जनकेन विचारितम्॥

अतिमुक्तिश्च मुक्तिश्च ग्रहो ऽतिग्रह एव च।
वायुर्व्यष्टि समष्टिश्चा प्यपमृत्यु भयान्तक ॥

---

1 पाणिनि 3-2-136 ।0 138 कर्तर्येवाय प्रत्यय । शाकर भाष्ये तु "अपराजिष्णु र्न च परैर्जितस्वभावो भवती"ति। 3-2-139 ग्लाजिस्थश्च क्स्नु ।

2 छा 6 8

इन्द्र सर्वांतरश्चात्मा सुपर्ण परमेश्वर ।
स साक्षाच्चापरोक्षाच्च जराशोकादिवर्जित ॥

पाण्डित्यबाल्यमौनाना निर्वेदविदितोऽक्रिय ।
कहोल विद्यासवेद्य. परमात्मा परागति ॥

अन्तर्यामी धरादीना सर्वैरविदितश्च तै ।
निविच्य देवतासख्या शाकल्याय निवेदिता ॥

त्यदेक पुरुषो देव शारीरो वृक्षरूपक ।
रूप प्रतिष्ठा हृदय ब्रह्मौपनिषद. पुमान् ॥

विज्ञान परमानन्द रातिर्दातु परायणम् ।
IV अदृष्टश्चाक्षरो दृष्टा ह्यसग सर्वशासक. ॥

सन्दृब्धसर्व लोकश्चाप्योतप्रोतजगत्पट ।
[1] जीव सैन्धव खिल्याब्धि रविद्याया निबर्हण ॥

आदित्य चन्द्राग्निवाचो ज्योतींष्यात्मा परस्तत. ।
स्वय ज्योति पर ब्रह्म सन्ध्ये स्वप्ने प्रकाशवत् ॥

मात्राससर्ग रहित शुक्र सृष्टिप्रवर्तक ।
आरामवानप्रकाशो प्येकहसो हिरण्मय. ॥

स्वप्नान्तमपि बुद्धान्त विमल पापवर्जितम् ।
अलुप्तदृष्टि र्दृश्यात्मा प्राज्ञो विरहितद्वय. ॥

एकश्च सलिलोऽद्वैत. सपच्च परमाऽव्यया ।
ब्रह्मलोकश्च शारीरश्चाविनाशी सनातन ॥

पेशस्कारी पुराणश्च साधुकारी विमुक्तिद. ।
एकधैवानुद्रष्टव्यो नेहनानेत्यजो ध्रुव. ॥

सेतुश्च भूतपालश्चाप्यप्रमेयो विधारण ।
शमादिसपत्तिमता वेद्य स्वात्मतयात्मनि ॥

ब्रह्मविद ब्रह्म भवतीत्यनुभूतिप्रसादक. ।
याज्ञवल्कीय काण्डोपपादित परमेश्वर. ॥

V दैवीच वाग् दमो दान दया ब्रह्म बृहद विभु । [2]
हकारश्च दकारश्च यकारो हृदयाह्वय ॥

---

1 छा 6-13-1.

2 सुबालोपनिषत् ।।।

महद् यक्ष प्रथमज स्वर्गवीर्यबलप्रदम् ।
ज्योतिषा ज्योतिरादित्य सत्यभूय महानज ।।

भू शिरस्को भुवर्बाहु स्व प्रतिष्ठ शुभावह ।
वषट् स्वाहा-स्वधा-हन्त रूपस्तनचतुष्टयी ।।

प्राणर्षभा मनोवत्सा त्रयी-धेनुश्च वाङ्मयी ।
देवाना च पितृणा च नराणामन्नदायिनी ।।

अन्न च जाठरो वह्नि वैश्वनरसमाहय. ।
घोषवानन्नपचनो जीवता देहमाश्रित ।।

उक्थ तपश्च परम क्रतुश्चैनोनिबर्हण ।
विद्युद् ब्रह्म च भारूप सत्यसकल्प ईश्वर ।।

सावित्रीनाम गायत्री षड्वर्णा चाक्षराष्टका ।
लोकवेदप्राणमयी [1] गयसत्राणतत्परा ।।

त्रिपदा जगदाकारा, तुरीयाघ्रि "परो रजा" ।
[2] "असावदो मा प्रापच्चा"प्यपदा, निरुपाधिका ।।

उपस्थान ब्रह्म चान्न परम दर्शत पदम् ।
ज्येष्ठ.श्रेष्ठ. प्राणनामा वागादिभ्यो विशेषवान् ।।

वाग् वसिष्ठा दृक् प्रतिष्ठा श्रोत्र सपच्च कामदा ।
मनश्चायतन प्राण सुहय. सैन्धवो बली ।।

लोक पर्जन्य पुरुष योषिद्रूपोऽग्निरर्चित ।
पर ब्रह्म परा काष्ठा खिलकाण्ड निरूपित ।।

बृहदारण्य वेदान्तगीतैश्वर्य लवो महान् ।
[3] अनात्मदु खाचिद्भिन्न सदात्मानन्दविग्रह ।।

[4] बोधोऽ नुभूतिश्चित् प्रत्यक्-चैतन्य चेतना चिति ।
असंसृष्टमखण्डार्थ लक्ष्य वेदान्तनिश्चितम् ।।

गया प्राणा ।

परो *रजसि सावदो मिति गायत्री चतुर्थपाद - त्रिपुरातापिन्युपनिषत् - ।*

अनात्म*शब्दप्रयोग तेजोबिन्द्वादिषु द्रष्टव्य ।*

अध्यात्म *- नृसिहोत्तरतापिनी - सर्वसार - महानारायण - वराह - पाशुपतब्रह्माद्यासु* ***श्रुतिषु*** *चिद - बोधादि प्रयोगा दृश्यन्ते। नामसख्यानप्रकार -- ओभूरित्यदि -* [illegible] ***शाति*** *284-78* [illegible]

बृन्दारकश्च रोचिष्णुस्तेजस्वी ज्योतिषापति ।
वसुधानो वसुदान स एवाद्य स उ श्व ॥
स एवाद्य स उ श्व इति

ब्रह्मनामसहस्र ये दनुसधीयते सदा।
मन प्रसाद शान्तिश्च सोख्यमप्यनुभूयते ॥

ब्रह्मणो नामसाहस्रे सगुणस्यापि कीर्तनात।
गीयते केवलाद्वैतपरमात्मस्तुति पुन ॥

गायत्रीमन्त्रवर्णैश्चशुभै सशोभितानना।
पादत्रयपरिक्षिप्तै परतत्त्वार्थगोचरै ॥

कालिकाभिन्नगायत्रीरूपपरमात्मस्तुति[1]

ओकाररूपमपि सर्ववच प्रपञ्च
मानन्दबोधमपि निर्विषयानुषगम्।
आकारभागपगतावयव च विद्वि -
र्यद्वर्णित तदवताज्जगदात्मतेज ॥

तत्त्वं विदुर्न विबुधा अपि यस्य कृत्स्न
प्रत्यक्स्फुरद्यदपि माति न चित्तवृत्ति ।
यल्लीलयेदमभवत्सचराचर यद
भाति स्वय तदवताज्जगदात्मतेज ॥

सर्वज्ञताञ्चितमवृत्तिभिदावमृष्ट
सवित्प्रभादलितमोहभयान्धकारम्।
सच्चित्सुखैकमधुरानुभवस्वरूप -
मेकाग्रमानसविभिन्नरहस्य मीडे ॥

विभ्रान्त्यरण्यविलयानलहेतिजात
मायाविलासपरिनिर्मितनामरूपम्।

रिति विग्रहरूपाणि, मोक्षद इत्यादीनि कर्तृपदानि, विशेषण-विशेष्य - साहचर्याणि, परा गति, पुरुष पर इत्यादीनि पुनरुक्तान्यपि निरुपपदानि नामानि पृथङ्नामतया सख्येयानि। एकश्रुति गताना छन्द सोक यर्थ पुनरुक्ताना तु नाम्नामेकवारमेवगणनम्। तथापि सहस्राधिकानि नामानि कीर्तितानि।

1 *स्वोपज्ञटीकया पृथङ् मुद्रितेय स्तुति ।*

यदभूतवस्त्वपि विकल्पमलीमसाना
सदिग्धतत्त्वममलीकुरुतान्मनो मे ॥

तुर्य पद श्रुतिरवोचदजाग्रदादि -
भावत्रयात्यकतयाऽपि तदात्मक यत्।
तुर्यत्वधर्मरहित सकलान्तरात्म -
तत्त्व पुरो विलसतादपुनर्भवाय ॥

वश्येन्द्रियैर्विनयमञ्जुलशीलवृत्तै -
र्याऽऽविष्कृता हृदयपकजकोशगुप्ता ।
यल्लाभतोऽन्यविभवा प्रतिभान्ति तुच्छा -
श्चेतो धिनोतु मम सा परमार्थलक्ष्मी ॥

रेण्वभ्रविभ्रम मपण्डितदृड्निरोधि
मायोष्मजृम्भित मनन्तनिकेतनाया ।
शाम्यत्यनुग्रहरसेन विना न यस्या
स्तुष्टिं तनोतु हृदि सा परमात्मवृष्टि. ॥

इन्दुप्रसाधितमनोज्ञकिरीटभासा
मुक्ताप्रवाळतपनीयविभाविलासाम् ।
सध्याभिवदनजुषा मधिदेवता त्वा
गायत्रि लोकजनयित्रि भजे मदम्बाम् ॥

यं प्राप्य साध्यमितर न विदिन्ति विज्ञा
यो ब्रह्मलोक इति वेदशिरस्स्वधीत ।
यश्चान्तरगकुहरे यमिनां प्रकाश
स्वान्त प्रभासयतु मे परम स्स बोध ॥

भर्मप्रकाशमिति साकृतिवादियुक्ति-
र्ज्योति स्वयप्रभमिति प्रकटाद्वयोक्ति ।
सान्द्रप्रमोदरस इत्यखिलानुभूति-
र्यत्रोपपन्नरचनाश्शरण तदेकम् ॥

गोभि र्विभासयति यो जगदर्करूप -
श्चन्द्रात्मना च रजनि गृह मग्निधर्मा ।
चिद्रजितातरुपधानमयो हि देह
देवो दिशेन्मम पद तमस. पर स ॥

देहादि विश्वरचन परिणामकार्य
केचिद्वदति नियमै परिपाल्यमानम्,
केचिद्विवर्तकृतविभ्रमजालमेव
सेवे तदाश्रयमविप्रतिपन्नतत्वम् ॥

वस्तुप्रमाणनिरपेक्षमनाद्यनन्त
कालस्वरूपमकल सहजप्रबोधम ।
साव्यावहारिकविकल्पनिरासभूमि
भूमानुभूतिसुखद शरण प्रपद्ये ॥

यस्माद्भवन्ति सुखदु खभयाभयाद्या
भावा भवाम्बुधिसमुद्धरणैकनौ र्य ।
नालं समाधिविधयो यदवाप्तयेऽत
स्वात्मार्पण हि विदधामि पराय तस्मै ॥

धीव्योम्नि भस्फुरति वृत्तिघनैर्विहीने
सौम्यप्रभाविलसन विगतान्धकारम् ।
मन्त्रानुसारिदृढभावनयानुभाव्य
तत्रास्तविक्रिय उपैतु मन प्रशान्तिम् ॥ 130

मत्वा यमाहितमना प्रजहाति धीर
ससारविभ्रमभुवौ किल हर्षशोकौ ।
निर्द्वन्द्वमुज्झिततम करुणापयोधि -
र्दैवस्स मे दिशतु पारमहंस्य मोक ॥

हित्वा ममत्व मनपेक्ष्य शरीरयात्रा
यत्रैकतानमतयो यतयो भवन्ति ।
लोह यथा भवति कान्तशिलावकृष्ट
चेतस्तथा लगतु मे परसौख्यसीम्नि ॥

धिष्ण्य पर श्रवणचिन्तन धारणादि -
सोपानगम्यमनपायि निरार्गसिद्धम ।
दह विपापमजडं भुवनस्य नाभि -
मोंहविभिद्य कृपयावतु सत्वर माग ॥

यो लब्धसिद्धि दित ग्रत प्रतिभ व च
प्रादुर्गताकृतिवद प्य आत्मलोक ।

ज्ञान स्वरूपविषये न ददाति सम्यक्
त तत्त्वदर्शनकृते शरणगतोऽस्मि ॥

योगावधानसमये मुनिमानसान्त -
र्विद्युल्लतादिविविधाकृतिभिर्विभाव्य ।
आनन्दयन्नवगत परम श्रुतिभ्यो
देवस्समेऽवतरताद्दययान्तरङ्गम् ॥

नह्यात्मवृत्तमनस पुनरुद्भवोऽत्र
नाऽसौ जरामरणशोकभयार्तिजुष्ट ।
आदेयमस्य न च किञ्चन नापि हेय
तस्मै नमोऽस्तु गलिताखिलबन्धनाय ॥

प्रज्ञानमात्रतनु, जन्तुहृदन्तरस्थ
माकाशरूपमपि सृष्टिवितानशोभम् ।
आदित्यवर्णमथवा भुवनैकचक्षु -
राविर्भवेद्यदपि वाऽस्तु ममात्मतत्त्वम् ॥

नोद्य किलैतदिह ससृतिवारणाय
सम्प्रार्थ्यसे करणशुद्धिमता मया किम् ।
नेव, तथापि कृपयैव जगत्पितर्म
ईशास्यकाममनुपूरय पालयाशु ॥

दत्त न मे स्वयमुपैतु मयि प्रभो त्वा
मुक्त्वा कृपा तव, विना स्मरण न या स्यात् ।
सापि स्मृतिर्न भवत. करुणा विनेति
क्लिष्टस्थितिर्मम परिष्क्रियता त्वयैव ॥

यात्वस्तु वा मम सुखासुखरागजालं
स्पृष्टवोपरिष्टतलमात्मविपञ्चिकाया ।
किन्तु पधानसहजस्वरगायनी स्यात्
त्वत्प्राप्तिसाधन निरन्तरचिन्तनेषा ॥

गायत्री मन्त्रवर्णेश्च स्तुत्यैव परमश्वरम् ।
रामकृष्ण पुनस्तस्य सतता प्रार्थयेत कृपाम् ॥

विहाय नानाविषयावलम्बान् भावोर्मिजालानसुखानशेषान् ।
सर्वान्तरात्मन! भवदीयचिता सुधाब्धौ मज्जतु मानसं मे ॥

विद्या ममास्तीति कदाचिदीश । मान्योऽहमन्यै रिति मन्यमान ।
भवाम्यहम्भावपराजितात्मा व्यपैमि मूढो भवतश्च दूरम् ॥

यदा मन श्चितयते भवत न मे समोऽस्तीति तदाऽवलिप्त ।
यदा तु चित्तं विषयाभिलोल तदा विषण्ण स्तदलाभतोऽहम् ॥

इत्थ मन श्चचल मानियतु मार्ग न जाने करुणैकसिधो।
यथैव तत्कर्षति मा तथाहं भ्रमा म्यनिच्छ न्नपि दुर्बलात्मा ॥

भावयतु कमपि भाव यस्मिन् कस्मि श्च लगतु चित्त मे।
सर्व त्वमिति मतिर्या मयि ता कृपया स्थिरीकुरुष्व विभो ॥

विरमति परदोषान्वेषणाया न चित्त
न च मम निजदोषज्ञानलेशोऽपि तावत्।
कथमिव भवदीय ध्यानदूर. सुखी स्याम्
भवदमल कृपाया पात्र मेन विधेहि ॥

वदति वेदातविदो भवत वाचामगम्य मनसश्च दूरम्।
तत्त्वां कथ तोषयितुं प्रभु. स्या लिप्से तवानुग्रहमेकमेव ॥

८. गुरुसानिध्यम्

एव प्रतिदिन काले परमात्मानमीश्वरम्।
पराशक्ति च जगतो मातर भवतारिणीम् ॥

रामकृष्ण स्तुवन् प्रीत्या चक्रे करतलध्वनिम्। [1]
तोतापुरिस्तदाकर्ण्य महाज्ञानी शुकोपम. ॥

महात्मा ब्रह्मसाम्राज्यसम्राड् वेदान्तकेसरी।
आत्मैक्यानुभवादन्यत् सर्व मिथ्येति निश्चित ॥

"कि मपूपान् करोषीति" वदन् परिजहास तम्।
"धिक्कारो भवतारिण्या स्यादेव भाषण तव ॥

वेदे यदेव विदित परम ब्रह्म शाश्वतम्।
सैव काली विभात्यत्र प्रत्यक्षं दक्षिणेश्वरे ॥"

इति दत्तोत्तरश्चासीत् स्वशिष्येण समन्युना।
तोतापुरि स्तत पश्चात्सिंहसंहननोऽपि सन् ॥

1 *"चपाती" इतिमूले।*

[1] अवधूतो विधिवशाद् रक्तग्रहणिपीडित ।
बाधामसहमानश्च मर्तुं गङ्गामुपाद्रवत् ॥

गच्छेदसौ यत्रयत्र जले पातयितु तनुम् ।
तत्रतत्रापि गम्भीरा जानुदघ्यभवन्नदी ॥

अनिच्छन्तीव त हन्तुं मावहन्ती च विस्मयम् ।
बोधयन्तीव "मृत्युर्वा जनिर्वाप्यन्ददेव वा ॥

नृणा विना कालिकाज्ञा कदापि न भवे" दिति ।
[2] स्वातन्त्र्यमपि चास्माकं तयादत्तं हि देहिनाम् ॥

स्तम्भादौ रज्जुबद्धानां पशूना गोचरो यथा ।
तदैव तेनावगत शक्तेर्माहात्म्यमक्षतम् ॥

[3] अभेदो ब्रह्मण· शक्तेरग्नेर्दाहादिवेष्यते ।
सबीजस्यफलस्येव सशक्तेश्चास्यपूर्णता ॥

इतिकृत्वा मति भव्या तोतापुरिरत परम् ।
श्रीकालीं लोकजननीं स्तोतुमेवोपचक्रमे ॥

महात्मा ज्ञानिनांश्रेष्ठस्तत्त्वयाथार्थ्यं पारदृक् ।
गुरोर्गुरुरिद नून न जानातीति नो पुन ॥

महिमख्यापनाच्छक्तेरभूल्लोकप्रबोधकम् ।
तस्य प्रमादलोशोऽय शिष्ये यदवहेलनम् ॥

स्खलितमपि रम्यम्

भवेदेवोपकाराय भङ्गोऽपि महता भुवि ।
गङ्गा हरजटाभ्रष्टा सवृत्ताः स्म सजीवना ॥

क्वचित्परुषमुक्त हि परत्र क्षेमकृद् भवेत् ।
कैकेयीरूक्षवचना जगदेतदरावणम् ॥

विज्ञानदोहद चित्त महर्षीणा चल क्वचित ।
पराशरान्मत्स्यगन्ध्यां जज्ञे ब्रह्माऽचतुर्मुख· ॥

अधिकारप्रणाशेन फलमप्यधिक तत ।
अनर्हा यादवा राज्ये राजकर्ता (Kingmaker) स्वयं हरि ॥

---

1. *शरीरस्मृतिदूरोपि च सन्नित्यर्थ ।* 2 *पुरुषकार ।*

3 *The Gospel II p 652 Parabrahma sahasra nama is to be understood in this sense Supra p 93, Infra pp 141n, 146*

भवेत् सतत्यविच्छेदा क्वचिद् दुष्टप्रतारणा।
आदमस्य (Adam) प्रलोभेन प्रजातन्तुरकुण्ठिता ॥

कल्पते पुण्यकार्याय ह्यनाचारोऽपि कुत्रचित्।
वाणी विधिमुखोच्छिष्टा निगमान्तप्रवाचिका ॥

दक्षप्रजापतिरुषा प्रसभ "भव त्वं
सचारशील" इति नारद आप शापम्।
बोधाय दैवनरदैत्यमन प्रवृत्ते
धर्मस्य चाभवदवस्थितिहेतवे स· ॥

विकारोऽपि क्वचिद् दुष्टो वहते रामणीयकम्।
मायासक्षुभित ब्रह्म जात तु जगदद्भुतम् ॥

विवेकभ्रष्टाना भवति विनिपात शतमुख -
स्त्विति प्रोक्त प्राय स्खलितविमुखै पूर्वकविभि । [1]
प्रमादो धीराणामपि सहज इत्युक्तिशरणा
वय ह्यत्र ब्रूम स्खलितमपि रम्य क्वचिदिव ॥

उषित्वा कतिचिन्मासान् शिष्यस्य निकटे गुरु ।
अनुज्ञात कालिकया निर्ययौ दक्षिणेश्वरात् ॥

चक्रतुस्तौ विनिमय भक्तिज्ञानरहस्ययो ।
[2] "विद्यया विद्ये" ति वचो याभ्यामेव प्रमाणितम् ॥

सगमश्च तयोरेव लोककल्याणदोऽभवत्।
स्कन्दनारदयोर्यद्वद्यथा कौशिकरामयो ॥

यथा [3] सांदीपनिमुनि-श्रीकृष्ण परमात्मनो ।
गोविन्दभगवत्पाद शङ्कराचार्ययोरिव ॥

यन्निमित्त हि विज्ञान रामकृष्णेन बोधितम्।
परतत्त्वार्थग लोके धर्माणां सारसग्रह ॥

अनुष्ठानैकतात्पर्य सुबोधतम मद्भुतम्।
ससारबन्ध निर्मोक्षि प्रद निर्वाणसौख्यदम् ॥

दत्त हनुमते पूर्व रामेण परमात्मना।
अर्जुनाय च कृष्णेन नरेन्द्रायाथ दास्यते ॥

---

1 *भर्तृहरि*

2 *गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा।*
अथवा [illegible] ॥

3 *सादीप, सार्दीपन इत्यादिपाठा*

रामेणापि सता प्रभञ्जनभुवे कृष्णेन पार्थाय च
श्रुत्यन्तार्थ वचा मयोक्तमखिल तद् दुर्ग्रह सप्रति।
मत्त्वैव सकलै सुबोधमवदद्यस्तत्त्वसार गुरु -
स्त देव शरण भजेमहि वय श्रीरामकृष्णाह्वयम्॥

युद्धे सारथिना विषादकलिल ग्रस्तान्तरङ्गो नरो
गीताबोधसुधारसायनचिकित्सोल्लाघ आसीत्पुरा।
येनारक्षि दयालुना भवरणे खिन्नो नरेन्द्रस्तथा
देव त शरण भजेमहि वय श्रीरामकृष्णाह्वयम्॥

समाधिकालानुभवविशेषा ।

लब्धज्ञानो गुरोरेव रामकृष्णो व्यराजत।
वार्यमाणोऽपि भैरव्या तान्त्रिकाभिनिवेशया॥

तस्थौ षण्मासपर्यंत समाधौ निर्विकल्पके।
प्रारब्ध कर्म वशत सकल्पादीश्वरस्य च॥

शरीरधारण कुर्वन् सता केनापि सेवित ।
स सततसमाधिस्थ तमिमं साधुपुङ्गव ॥

विधाय चागतप्रज्ञं ताडनेनापि वा तदा।
खादयेत्किञ्चिदाहार बलादेव दयापर ॥

जानन् हि लोककल्याण काल्यानेन चिकीर्षितम्।
रामकृष्णोऽपि चादिष्टस्तदैव जगदम्बया॥

"प्रपञ्च ब्रह्मणोर्मध्ये स्थेय 'भावमुखे' त्वया।
यत्नेन रक्षतात्मान लोकसंग्रहकारणात्॥"

समाधौ तस्य मग्नस्य शवप्रायस्य योगिन ।
मक्षिकाश्च विशन्ति स्म नासिकापुटयोर्मुखे॥

केशाश्चासन् जटीभूता कायश्चास्य मलीमस ।
यद्यन्यस्य दशैवं स्याद् दिनानामेकविंशते ॥

ऊर्ध्वं शरीरपात स्यादिति तेनैव भाषितम्।
रक्तग्रहणिबाधाभृत्तस्य तेषु दिनेषु च॥

शरीरसद्भावमति कर्तु मेव तपस्विन ।
मुहु समाधिगगने विहारासक्तचेतस ॥

समष्टिचैतन्यदृश्यम् -

"साक्षात्कृत मया दृश्यमेकदा सचराचरम्।
मनुष्यतिर्यगाधार प्राणिकोटि समाकुलम ॥

आग्लैस्तुरुष्कैश्च जनै. समाकीर्ण मया सह।
धनिभिर्निर्धनैर्भृत्यै पारिशुद्ध्यनियोजितै ॥

यत्र तण्डुलशाकादि राशयो भूरिशोऽभवन्।
सर्वेभ्यो यवन कश्चिच्छगवात्तण्डुलान् ददौ ॥

हेयादेयात्मभिर्द्वन्द्वै र्दृश्य यदपि मिश्रितम्।
तदाऽत्मा मे सप्तजिह्वजिह्वाप्रसरविभ्रम ॥

देहान्निर्गत्य पस्पर्श तान् पदार्थान् भिदोज्झित ।
एक सर्व मिद नेह नानेति प्रतिवोधयन् ॥" [1]

इति साक्षात्कृताद्वैतचैतन्यो ऽनुभव निजम्।
वर्णयामास शिष्येभ्यो मुदा कालान्तरे गुरु ॥

देहास्तित्वमतिं विहाय भयदव्याधिव्यथार्तोऽपि सन्
निर्यत्न लभतेऽस्मा भूमिषु गतिं यो निर्विकल्पादिपु।
सलाप कुरुतेऽम्बयेव शिशुवद् यो विश्वमात्रा गुहु -
स्त हंस परम व्रजामि शरण श्रीरामकृष्णाभिधम ॥

9. परमतानुष्ठानम्।

सम्प्रदायाध्वन पार मनारस्य स हसवत्।
गत्वा पारमहंस्येन पदेनालकृतो बभौ ॥

निरूपयिष्यन् धर्माणा सर्वेषामेकलक्ष्यताम्।
बभूव तस्यानुष्ठाने रामकृष्ण प्रयत्नवान् ॥

यस्माद् बिभ्यति शास्त्राणि परधर्माद् भयावहात्। [2]
खण्डनेनान्यधर्माणां स्वधर्म स्थापित पुरा ॥

अनेनाचरणादद्य चेतीद परमाद्भुतम्।
नास्त्येव गुणसाकल्य कस्मिन्नपि मते परम ॥

गम्य तु प्रापयन्त्येव मतानि विकलान्यपि।
पर प्राप्तवत केय समीहा साधने पुन ॥

---

1 The Gospel I p 70, 282, II p 746, 831 Vision of Consciousness

2 भगवद्गीता 3-35

सा न चदुपदेशार्थमन्यधर्मावलाम्बिनाम् ।
व्याधिग्रस्तोऽपि सोत्साह स्वास्थ्यमासाद्य किञ्चन ॥

''महम्मदीय''मनुष्ठातु स चकार मति मतम् ।
''सूफी''मतानुसारेण लब्ध्वा गोविन्दरायत ॥

उपदेश मनुष्ठान द्रष्टु''मल्ला'' चकार स ।
स्वधर्मविषय सर्वे प्यनेन प्रस्मृतास्तदा ॥

विशिष्य कालिका देव्या [1] धाम भव्य च पावनम् ।
दिनत्रयानन्तर चादर्शि तेन समाधिना ॥

तेजस्वी पुरुष कश्चिददीर्घश्मश्रु स्फुरद्वपु ।
प्रत्यक्ष सगुणात्तस्मा त्ततस्तत्त्व च निर्गुणम् ॥

चतु सप्ततिके वर्षे नवद्वय शताधिके ।
''क्रैस्तिवीय''मतव्याप्ति समारब्धात्र भारते ॥

''इस्लाम्'' - मतगुपास्याथ ''क्रैस्तवी''माचचार स ।
उपासन प्रक्रिया तत्सप्रदायपुरःसरम् ॥

शुश्राव शभुचरणान्मल्लिकोपाह्वयाद् बुधात् ।
''बैबिला''ख्य मते ग्रन्थ प्रमाण क्रैस्तवे महत् ॥

[2] यदुमल्लिकस्य गृहे रामकृष्णो ददर्श च ।
रम्य ''क्रीस्तो'' श्चित्रपट मातुरुत्सङ्गवर्तिनः ॥

प्रसरन्त कान्तिपुञ्ज तस्मादात्मनि चाद्भुतम् ।
साक्षात्कार ततो लेभे समाधौ ''क्रीस्तु'' योगिनः ॥

[3] चिपिटस्यमुखाम्भोज तेजोमण्डलमण्डितम् ।
रराज तस्य [4] यद् ग्रन्थैस्तदीयैश्च प्रमाणितम् ॥

ततश्च सगुणात्तेन निर्गुण तत्त्वमीक्षितम् ।
प्रभुदयालुमिश्राख्यो मत क्रैस्तव माश्रित ॥

श्रीरामकृष्णबोधामृतम् (तेलुगु) p 138
The Gospel I p 34
ततनासिकस्य ।
चैपिटत्वम् ।

दृष्ट्वा श्रीरामकृष्ण च कदाचिद् दिव्यदर्शने ।
अभेद क्रीस्तुना तस्य स्वानुभूत न्यरूपयत् ॥

सप्रीत परमो हस कृत्वा तत्करचालनम् ।
अनुजग्राह "वाञ्छा ते परिपूर्णा भवे" दिति ॥

अन्यश्च क्रैस्तवो भक्तो "विलियम्स्"नाम चैकदा ।
प्रपन्न परम हस हिमाद्रावकरोत्तप ॥

एव मताना सर्वेषा गुरुदेवेऽस्ति सगम ।
कुटिलाना मृजूणा वा सरितामिव सागरे ॥ [1]

त्रय्यां साख्ये योगतन्त्रे शैवे शाक्ते च वैष्णवे ।
क्रैस्तवे मह्मदीये वा यद्यत्तत्त्व परायणम् ॥

तद्भक्ताभीष्टसिद्ध्यर्थ रामकृष्णे प्रकाशते ।
तदिहास्ति यदन्यत्र नेह यत्तन्न कुत्रचित् ॥

यथा वेदान्तविद्यानां भूमाद्यानामुपासका ।
सनातना महात्मानो नारदाद्या महर्षय ॥

तथाचचार धर्माणा गुरुदेव· स्वय विधीन् ।
सर्वमतसामरस्यं चानुष्ठाने न्यरूपयत ॥

यत्प्रचारो ह्योकलक्ष्यं महनीयेऽस्य जीविते ।
"यदेव ज्ञानिना ब्रह्म परमात्मा स योगिनाम् ॥

भक्ताना चापि भगवा नपारप्रेमसागर· ।
स्वधर्ममपरित्यज्य परधर्मेषु सादरै· ॥

साधुभि· साधकैर्भाव्य मसूयारहितै" रिति ।
न केवल क्रैस्तवादि मतानामेव साधितम् ॥

सामरस्यं स्वधर्मेऽपि ज्ञानादीना निरूपितम् ।
नरेन्द्रेण यदुद्घुष्टं पश्चात्पाश्चात्य भूमिषु ॥

वर्षेऽस्मिन् भारतेऽस्माक तदपूर्व न किचन ।
देशकालनिमित्तादि रुपाधिर्यत्र कल्पित ॥

तत्त्वे साक्षात्कृते तस्मिन् देशत कालतोऽपि वा ।
विप्रकृष्टस्य भूतस्य कस्यचिद्वा भविष्यत ॥

1 महिम्न स्तोत्रम् - त्रयीसाख्य योग

मा न्यैज्ञनि किमाश्चर्य मीदृशैस्तत्त्वदर्शिभि ।
श्रीरामकृष्णप्रमुखै र्भगवद्भावभावितै ॥ 1401

पार प्राप्य पर स्वधर्मविधिना धर्मान्तरेषूदित –
प्रस्थानाचरणेन चापि परमार्थाद्वैतमेव स्वयम् ।
येन स्थापितमात्मदर्शन कला सर्वस्वसवेदिना
त हस परम भजामि शरण श्रीरामकृष्णाभिधम् ॥

10. तीर्थयात्रा

तीर्थप्राशस्त्यम् –

निरूपयन्ति शास्त्राणि [1] निष्कामाना महात्मनाम् ।
पूताना तीर्थभूताना तीर्थेभ्योऽपि वरिष्ठताम् ॥

तथापि परमो हसो नवद्व्यशताधिके ।
अष्टषष्टितमे वर्षे तीर्थयात्राभिलाषत ॥

मथुरेण सभार्येण सहितो हृदयेन च ।
परिवारेणोचितेन ययौ तीर्थानि सेवितुम् ॥

पुण्यक्षेत्रेषु सर्वेषु माहात्म्य विद्यते महत् ।
पवित्रताध्यात्मिकता भगवत्सनिधानत ॥

महात्मभि सेवितत्वाद् बहुभि शश्वदादरात् ।
अनेकै साधुभिर्मान्यै स्तप शीलैर्महर्षिभि ॥

[2] वैद्यनाथपुरासन्न ग्रामे गच्छन् क्वचिद्गुरु ।
जनास्तत्रस्थितान् दृष्ट्वा दारिद्र्यभरपीडितान् ॥

साश्रुनेत्रो दयानिघ्नो मथुरेण महात्मना ।
कारयामास सतुष्टानन्नवस्त्रादिदानत ॥

किमत्र चित्र शिष्योभूद् दीनसेवा परायण ।
ईदृशस्य गुरोरेव विवेकानन्दयोगिराद ॥

---

1. *महाभागवतम् 1-13-10 तीर्थीकुर्वन्ति तीर्थानि स्वान्तस्थेन गदाभृता ।*
10-84-17 न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामया ।
सुभाषितम् –परदार परद्रव्य परद्रोहपराङ्मुख ।
गङ्गा ब्रूते कदागत्य मामय पावयिष्यति ॥

2. *1868 A D*

अन्यदा पि चकारेव ग्रामे मथुरपालिते।
कुत्रापि सेवा दीनाना नारायणस्वरूपिणाम् ॥

तत काशी जगामाय पुण्य विश्वेश्वरालयम्।
याऽदृश्यत पुरी दिव्या काञ्चनेनेव निर्मिता ॥

यथा पुराणग्रन्थेषु विस्तरेण प्रशसिता।
बहूना यतिवर्याणा मावास पुण्यकर्मणाम् ॥

यत्र विष्णुपदाभोजमकरन्दझरी नदी।
व्योमकेश जटाजूटमल्लीमाला विराजते ॥

केदारनाथनिलये चान्य देवालयेष्वपि।
पदेपदे रामकृष्ण समाधिविवशोऽभवत् ॥

पद्भ्या गच्छन् धरण्या वा नौकया वाऽपगा तरन्।
नद्यां प्रवहणस्याश्रे त्यक्तदेहेन्द्रियस्मृति ॥

तिष्ठन् समाधिनिष्ठोऽसौ "प्रवाहेऽय पते" दिति।
सर्वाश्चकार तत्रस्थान् पश्यत कातरान् जनान् ॥

गङ्गाया पावने तीरे ददर्श मणिकर्णिकाम्।
मथुरादिसमेतश्च तरन् प्रवहणे नदीम् ॥

काश्या त्यक्तशरीरणा तेनादर्शि महात्मनाम्।
जीवाना कर्णपुटयोस्तारक मन्त्रमुच्चरन् ॥

पुरुष पिङ्गलजट कश्चित्तुहिनशोभन ।
तदन्तिके कापि कान्ता तेषा मुक्तिप्रदायिनी ॥[1]

श्लथयन्ती च कृपया शरीरत्रयबन्धनान्।
ससार पुनरावृत्ति विनिवारण सभ्रमा ॥

त्रैलिङ्गस्वामी [2]

रामकृष्णस्ततोऽपश्यदातपोत्तप्तसैकते।
सुखोपविष्ट मान्भ्राणा पुण्यराशि सविग्रहम् ॥

त्रौलिङ्गस्वामिन सिद्धपुरुष मौनमास्थितम्।
विराजन्तं समासाद्य महतीं ज्ञानभूमिकाम् ॥

---

1 *पार्वतीपरमेश्वरौ।*

2 *Yogananda's Autobiography of a Yogi, p 284 ff*

जना वदन्ति यस्यायुरनेकशत वत्सरम् ।
भटैर्बद्धोऽपि काराया निर्यन्न यो बहिर्ययौ ॥

दिगम्बर स्वैरगतिर्योगशक्तिप्रभावत ।
विनिर्मित स्नानघट्ट काश्या येन महात्मना ॥

स चक्रे रामकृष्णाय नस्यचूर्णप्रदानत. ।
स्वागत विश्वनाथस्य प्रतिबिम्ब इव स्थित ॥

तत परमहसोऽपि ददावातिथ्यमादरात् ।
पायसान्नादिना तस्य विस्मितो ज्ञानसपदा ॥

तत्त्वमेकमनेक वेत्यनुयुक्त समादधौ ।
स्वामी तदेकमित्येव मौनादङ्गुलिसज्ञया ॥

स्वामिना चाप्यनुज्ञात काशीयात्रा समाप्य ताम् ।
तीर्थराज प्रयागाख्य रामकृष्णो ददर्श च ॥

त्रिवेणीसगमे स्नातो ययौ बृन्दावन तत ।
नन्दन नन्दबालस्य वल्लवामरवज्रिण ॥

"न दत्त मे पुनर्द्रष्टु बृन्दामि"ति नु चिन्तया ।
रामकृष्णोऽद्य संवृत्तोऽ पूरयद्यो मनोरथम ॥

गवा च गोपबालानां तरता यमुना नदीम् ।
दृश्यं च हर्षयामास स्मारयामास त हरिम् ॥

"अत्राखिल जल क्षेत्रमपि बृन्दावनीभुवि ।
सागत्याद् भवत पूत दृश्यते न भवा"निति ॥

स्मार स्मार रामकृष्णो बाष्पपूर्णेक्षणोऽभवत् ।
राधाकुण्ड तथा श्यामकुण्डिका कालियह्रदम् ॥

दृष्ट्वा हर्षसमाविष्ट समाधि परमन्वभूत् ।
भक्त्या ददर्श गङ्गाख्या श्रीकृष्णचरणाब्जयो ॥

विख्याता सिद्धयो यस्या विविधा भक्तिसभवा ।
रामकृष्णे महत्यासीत्तस्या गौरवभावना ॥

वृद्धाया अपि, या मेने राधिका त समागताम् ।
स्वादिष्ठान् विविधान् भक्ष्यान् भोजयत्या तयैकत. ॥

तस्मागंगय कातरेण हृदयेनापि चान्यत ।
मुहुराकृष्यमाणोऽभूद् रामकृष्णोऽवशस्तदा ॥

गृहीत्वा बालक कृष्ण तरन्त पितर नदीम् ।
ददर्श दर्शनि दिव्ये [1] मथुराया ध्रुवस्थले ॥

नीत्वा पक्ष दिनाना स बृन्दारण्ये, पुनर्ययौ ।
काशीमेव यत्र दृष्टा भैरवी तन्त्रदेशिका ॥

महतेऽस्य प्रमोदाय तेन चोक्ता हितैषिणा ।
काश्या माजीवितान्त च वस्तव्यमिति सादरम् ॥

[2] महेशचद्र निकट वीणा श्रवण कौतुकी ।
गत्वा "श्रवण विघ्न मे मैवकार्षी समाधिना ॥"

इति काली च सप्रार्थ्य पपौ गानरस मुदा ।
तदाग्भ्य प्रतिदिनं महेशोप्याजगम च ॥

दिदृक्षु: परम हस तन्निवास तदादरात् ।
रामकृष्णो गयाक्षेत्रं न ददर्श गदाधरे ॥

लीयेतात्मेति मन्वानस्तद्विभूतितयात्मनः ।
दक्षिणेश्वरमागत्य पुण्य बृन्दावनीरज. ॥

पञ्चवटचा तथान्यत्र प्रतिष्ठाप्य स चाब्रवीत् ।
"बृन्दावनसम क्षेत्रमिदमप्यद्य पावनम् ॥

बृन्दावन रजो गङ्गा जगन्नाथनिवेदितम् ।
नेवेद्यमपि मेध्य स्यादन्यसाधारण नहि ॥"

11. पुनर्यात्रा

कालीघट्ट नगर्या च कलुटोलाभिध स्थलम् ।
हृदयेन ययौ साक रामकृष्णोऽ वलोकितुम् ॥

भक्तसघसमाहूतश्चैतन्यभजनोत्सवम् ।
वर्तमाने भागवतग्रन्थ पारायणे सति ॥

श्रीचैतन्योपचारार्थ कल्पिते पुष्पभूषिते ।
स आसने स्वय तस्थौ ध्यानातर्मुखमानस ॥

---

[1] ... The Gospel I p 361

[2] ... मर्कीर इति प्रसिद्धोवैणिक ।

हृतान्यविषयज्ञान श्रीचैतन्य इवापर ।
ऊर्ध्वोत्क्षिप्तभुजो नृत्यन् सस्मितो मोहयन् जनान ॥

आनन्दविवशान् कृष्णनामसकीर्तने रतान् ।
स्वमाक्षिपन्त मुक्त्वैक "भगवान् दास" नामकम् ॥

वत्सरे सप्ततितमे नवद्वयशताधिके ।
चैतन्यजन्मभूमि च नवद्वीप जगाम स ॥

हृदयेन समेतश्च मथुरेण मुदान्वित ।
काल्नास्थले मार्गमध्ये ख्यात त वैष्णव यतिम् ॥

"भगवान् दास" नामान ददर्श च ननाम च ।
तदाय भगवान्-दास क्रोधी समभिलक्षित ॥

आवर्तयन्नक्षमाला य कंचिदपराधिनम् ।
स्वसमाजाद् बहिष्कुर्वन् सपृष्टो हृदयेन स ॥

हृदय "किमर्थमीदृश कर्म सिद्धस्यापि सतस्तव ।"
भ दा "नहि मह्यमिद किन्तु लोकसंग्रहहेतवे ॥"

निशम्यासहमानस्तद् गुरुदेवस्तमब्रवीत् ।
गर्वित विनतं कुर्वन् समन्यु कठिनं वच ॥

रा. कृ. "भगवन्त विहायैक को भवान् लोकसग्रहम् ।
कर्तु समर्थो दासस्त्वं सर्वेषामेव भूतले ॥"

काल्नाग्रामान्नवद्वीप चैतन्य जननस्थलम् ।
सहान्यैर्यात्रिकैर्गत्वा तरन प्रवहणे नदीम् ॥

कुत्रापि दूरतोग्रामाद्रामकृष्णो ददर्श च ।
द्वौबालकौ स्फुरद्रूपौ दरहासलसन्मुखौ ॥

नवद्वीपतया ख्याते ग्रामे साप्रतमद्भुतम् ।
दर्शन तादृश नासीदस्य ध्यानगतात्मन ॥

"निमग्न स्यान्नवद्वीप प्राचीनमधुनांभसि ।"
इति ध्रुवीकृत तेन रामकृष्णेन धीमता ॥

तथा चरित्रशास्त्रज्ञैस्तथ्यतास्य निरूपिता ।
प्रत्यावृत्तश्च यात्राया संकल्पादीश्वरस्य च ॥

एकसप्ततिके वर्षे नवद्वयशताधिके।
विषज्वरेण मथुरो नीत. कालीपदान्तिकम्॥

दयावतो गुरोस्तस्य योगशक्तिप्रभावतः।
[1] षोडशाब्दमितं कालं सेवया धन्यजीवन॥

हृदयरामः

समाप्ततीर्थयात्र सन्नागतो दक्षिणेश्वरम्।
[2] अवाप हृदयो भार्या वियोगं विधिनिर्णयात्॥

ततः किंचिदिव प्राप्तो वैराग्यं कालमक्षिपत्।
भगवच्चरणध्याने सनिर्बन्धं गुरु ततः॥

समाधिजाश्च सप्रेप्सु रनुभूतीरयाचत।
"तवालं मत्सपर्ये" ति वार्यमाणोऽपि तेन स.॥

तत स्वं रामकृष्णं च ददर्श प्रभयावृतम्।
अभूमिस्पृष्ट चरण देववद्विस्मयावहम्॥

तद दृष्ट्वा गुरुदेवं स उच्चै राहूय चाब्रवीत्।
अनुभूतिमपूर्वा ता विस्मयाज्जातसंभ्रम॥

"कि चिदेव त्वया लब्धं कालिकायाः प्रसादतः।
अल तेऽनेन हर्षेण संभ्रमावसर कुत."॥

एव वदन् रामकृष्णः प्रकृतिस्थं चकार तम्।
मथुरोऽपि च तत्सर्वं ज्ञात्वोवाच यथार्थवाक्॥

भगवन् हृदयो वाहमन्यो वाप्यस्तु मादृश।
नार्होऽवाप्तु दशाभेदान् समाध्यानुभवाश्रयान्॥

त्वमेव कालिकाव्याजाद् ददद् गृह्णस्तथाविधम्।
अनुभूतिविशेषं च करोष्यद्भुतमित्यपि॥

किन्तु पञ्चवटीं गत्वा तपोऽनुष्ठातुमिच्छया।
स्वय कदापि हृदये गुरोरेवासने स्थिते॥

दुर्भरोऽस्य ततस्ताप शरीरे समजायत।
"इष्टदा मत्सपर्ये"ति पुनः सांत्वनपूर्वकम्॥

---

1 *1855 to 1871*

2 *पुनर्यात्राया पूर्वमेव।*

सोऽशाम्यद्गुरुदेवस्य करस्पर्श चिकित्सया।
वैदेह्यन्वेषणासक्त श्रीराममिव लक्ष्मणः॥

सिषेवे हृदयो रामकृष्णं मुक्तिगवेषकम्।
किन्त्वन्ततस्तु हृदयो मिथ्याचारो धनाशया॥

पूर्वं यथा सिषेवे तं तथा पश्चाद्दुराग्रहात्।
निनिन्द परमं हंसं गुरुदेवं तपस्विनम्॥

तथा निनिन्द कठिनं तां निन्दां सोढुमक्षमः।
यथा ऽसकृद्रामकृष्णः प्राणत्यागेऽकरोन्मतिम्॥

तथापि तं क्षमस्वेति प्रार्थयामास कालिकाम्।
ततस्त्रैलोक्यनाथस्य मथुरानाथजस्य च॥

सुतां नियुज्य हृदयो बालिकां तान्त्रिकार्चने।
अभून्निष्कासितस्तेन वर्णधर्मव्यतिक्रमात्॥

[1] ततः कदाचिद् हृदयः पुनर्द्रष्टुं समागतः।
गुरुदेवं गृहोद्याने यदुमल्लिकसन्मणेः॥

उवाच साश्रुनायनः पश्चात्तप्तेन चात्मना।
"नयामि दिवसान् ब्रह्मन् त्वद्वियोगेन दुःखितः॥"

सान्त्वपूर्वं ततस्तेन चानुज्ञातो महात्मना।
गुरुणा रामकृष्णेन निर्जगाम यथागतम्॥

12. मातृश्रीशारदा साहचर्यम्।

यथा शमादयो धर्माः साधके विलसंति हि।
तथा ज्ञातवति ब्रह्म सौजन्य प्रणयादयः॥

परिपाक पर यन्ति निर्मूल्यन्ते न जातुचित्।
द्वन्द्वातीतश्च निःसंगो ज्ञानी भवितु मर्हति॥

सानुकम्पस्तथापि स्यान्नतु शुष्कविरक्तिमान्।
इत्यत्र विषयेसाक्षाद्रामकृष्णोनिदर्शनम्॥

स्वय परिव्राजकः सन्नय संगविवर्जितः।
स्वीचक्रेशारदां पत्नीं सहजीवन कांक्षिणीम्॥

The Gospel II pp 643-644.

यथा हेमवती देवी शंभुर्योगीश्वरेश्वर ।
कामारिपुष्करे वर्षचतुष्कात्पूर्वमेवहि ॥

सागत्य रामकृष्णस्य शारदानुबभूव यत ।
तदेव चिन्तयन्ती सा परा प्रीतिमुपागमत ॥

कितृन्मत्तस्य जायेति या जनश्रुति रात्मनि ।
स्वयं जिज्ञासमाना ता स्त्रीभि सह समुत्सुका ॥

गच्छन्तीभिर्नवद्वीप [1] "दोलराका" दिदृक्षुभि ।
अनुज्ञाता चानुयाता जनकेन सचेतसा ॥

पद्व्यामेव [2] बहुक्रोशां श्चरन्ती दक्षिणेश्वरम् ।
जगाम परमोत्साहा मार्गमध्ये सकौतुका ॥

वनस्थलनदीशैलान वीक्षमाणा मनोहरन् ।
अनभिज्ञा [illegible] क्लेशाना दुःखदायिनाम् ॥

[illegible] पाभयेन च पाडिता ।
[illegible] लब्धु कुत्राप्यवस्थिता ॥

[illegible]
[illegible] ॥

[illegible] सलपन्ती [illegible]
[illegible]

[illegible]
[illegible] कान्ता [illegible]

[illegible]
[illegible]

उवाचौ [illegible]
नह्यस्ति [illegible]

---

1 दोलापूर्णिमोत [illegible]
2 80 Miles

एवमुक्त्वा तत पत्नीं स्वस्था कृत्वा चिकित्सया।
व्यवस्था कल्पयामास तस्या वासाय सादरम ॥

मातुश्चन्द्रमणीदेव्या निवासे वाद्यमन्दिरे।
शारदऽनन्दविवशैवाभवत्पत्युरादरात् ॥

कृतार्थयन्ती चात्मान श्वश्रू पति मुपाचरत्।
गृहकर्मभ्य आरभ्य ध्यानादे साधनावधि ॥

शिक्षणीय रामकृष्णो यत तत् सर्व मशिक्षयत्।
अष्टादशाब्दवयस ता शिष्या प्रथमा गुरु ॥

विवेकिनीं हितालापैर्बहुधा च प्ररोचयन्।
[illegible]न्द्रमा जगदम्बाया रमाया सोदर प्रिय ॥

"[illegible]न्दमामे"ति विख्यात सर्वेषा मातुलो यथा।
सर्वत्मना सेवनीय सकलैरीश्वर प्रिय ॥

[illegible]ाक्षात्काराय सतत तथैवानघया त्वया।
जीवित सफलीकार्य भगवत्सेवनादिति ॥

[illegible]भवत्तस्या भोजनदिषु च स्वयम।
[illegible]निताङ्गदय जानन स ता सहृदयाग्रणी ॥

[illegible]चकार पणयात सुवर्णभरणैरपि।
[illegible] हित पथ्यमपचद भोजन शुचि ॥

[illegible] दुर्बलस्य तपस्विन।
[illegible] दृढकायाऽस्मि रावृत्तस्तव पोषणात् ॥"

[illegible] भर्ता रामकृष्णोऽपि शारदाम्।
"[illegible] सबन्धस्तया मम च नेतर ॥"

[illegible]स्थ ब्रुवन्नेव सकौतुकम्।
[illegible] प्रायाश्चरकालानुवर्तिन ॥

[illegible]
[illegible] नित्वैदोदाहाणम।
[illegible]पधानश्च ार्थिना।
[illegible] ग्प्रोऽग्र व्यर्थ पूर्णीकृतो मया ॥
[illegible] स्त्कृतवान।

लुप्तप्रज्ञान्नष्टचेष्टान् रामकृष्णस्य वीक्ष्य सा।
भीता हृदयमाहूय वृत्तमस्मै न्यवेदयत्॥

स कर्णे रामकृष्णस्य भगवन्नाम कीर्तयन्।
व्यधात्तमागतप्रज्ञं यत्नेनावहितः शनै ॥

ततः [1] प्रज्ञाद्यागमार्थं रामकृष्णोऽपि शारदाम्।
समाधेर्यस्य यन्नाम जप्यं भगवत स्त्विति॥

अबोधयद् विस्तरेण लक्षणाख्यानपूर्वकम्।
सा च शिष्या सती सिद्धिं प्राप ध्यानादिसाधने॥

निर्विकल्पसमाध्यान्तां पतिदेवे गुरौ सति।
प्रसादशान्तिनिलयो मनस्तस्या स्तदाभवत्॥

मृदु सूचीध्वनिं सूक्ष्मं विसोढुमपि चाक्षमम्।
शारदाप्रसन्नादीनां मन्त्रदीक्षाकृता तया॥

तथा च धन्यमात्मानं चक्रतुस्तौ परस्परम्।
श्रीशारदारामकृष्णौ दम्पती महिमान्वितौ॥

अनुद्धता सती व्रीडाद् विशेषज्ञापि शारदा।
बिडाली भस्मसंछन्नवर्णेति पतिवर्णिता॥

"मयि वा शारदायां वा प्रीतिरस्त्यधिका तव।"
इति श्रीगुरुदेवेन गौरी पृष्टा कुतूहलात्॥

सा शिष्या तां प्रियतरां निर्दिदेशैव मातरम्।
वदन्त्येव च "हे कृष्ण नहि राधाधिको भवान्॥"

गुरुदेवो विनोदार्थं स्पर्धामेकामयोजयत्।
वपुःकान्तिप्रकर्षस्य निर्णयार्थं कदाचन॥

अभ्यर्थिनौ स्वयं चान्यः स्फुरद्रूपश्च कश्चन।
शारदाप्यत्र मध्यस्था यया निष्पक्षपाततः॥

जेतान्य एव निर्णीतो यो जितेनाभिनन्दितः।
भक्तैः श्रीगुरुदेवाय फलादिकमुपाहृतम्॥

---

1 आदिशब्देन चेष्टा ग्राह्या।

वितरन्ती यथेच्छं सा जनेभ्यस्तेन वारिता।
सामर्षा पि तत पश्चादनुनीता प्रसादिता॥

स्वप्रेषितेन बालेन रामलालेन बन्धुना।
उक्त्वा चैवं रामकृष्णो हृदयं प्रत्यबोधयत्॥
"भवान्मां परिहासार्थमवजानासि यद्यपि।
तथापीमां महासाध्वीं मावमस्था कदाचन॥"

"सुखमस्ति हला किं ते भत्रनि"नेति वादिनम्।
सखीजनं प्रत्युवाच गौरी मिथ्यावदुं यथा॥

"आशाम्बरो निराशो मे प्राणेशोऽचिन्त्यवैभव.।
महामहिमसंपन्नश्चेश्वरो योगिना"मिति॥

श्वश्रूमाश्वासयत् पुत्रीसतानाभाव दुःखिताम्।
"मातर्मातरिति प्रेमभक्तितत्परमानसाः॥

आह्वयन्तोनुयास्यन्ति बहवः शिष्यबालकाः।
निर्विरामं तव सुतां शारदा" मिति स ब्रुवन्॥

"रोचते चेत्तद्भवता तुभ्यं सासारिक सुखम्।
नो चे द्ददातु भवती साह्यं मे तत्त्वसाधने॥"

इत्युक्ता शारदोवाच पति पतिपरायणा।
"रोचते यद्धि भवते मह्यं तदपि रोचते॥"

बभूव परमप्रीतो रामकृष्णो निशम्य तत्।
न केवलं नाचकर्ष पतिं संसारजीवने॥

साहाय्यमपि सा चक्रे तस्य लक्ष्यार्थसाधने।
"यदीन्द्रिय सुखे वाञ्छा पुरस्तात्तदुपस्थितम्॥"

इत्युक्त्वात्मगतं पत्नीं कदापि स्प्रष्टुमुद्यत।
ततो नष्टबहि प्रज्ञो यथा वज्रप्रहारत॥

झटित्येव ममज्जायं समाधौ चिरवर्तिनि।
दीर्घकालात्पुन. संज्ञा जाताऽस्य तदनन्तरम्॥

संवाहयत्या चरणौ पृष्ट. "काहं तवे" त्ययम्।
रामकृष्ण· शारदया पतितत्परया पतिः॥

"या च देवालये देवी माता या वाद्यमन्दिरे।
सैव सवाहयत्यद्य ममाघ्री"ति समादधौ॥

तस्यै नमस्करोति स्म वृत्ते सवाहने तत ।
"अहो भाग्य मम प्राप्ता पत्नी परमपावनी॥

नो चेत्पतेय ससारवार्धा" विति जहर्ष च।
"न प्राहरत सुमेनापि न मा परुषमुक्तवान्॥

हण्डे त्व याहि चायाहीत्येव पतिभिरीरितम्।
सबोधन वा सावज्ञ प्रायो दारेषु यद्भवेत्॥"

इत्यादरेण महता पति च प्रशशस सा।

षोडशीपूजा

सस्थाप्य देवतास्थाने पूजयामास तामसौ॥

यथाशास्त्र यथाकल्प यथारुचि यथोचितम्।
फलस्य कर्मणा दात्रीं कालिका भवतारिणीम्॥

पूर्वकर्म फलान्ताय साधका यामुपासते।
आसीत्तस्य शुभेच्छा ता सेवितु लोकमातरम्॥

द्विसप्तति तमे वर्षे नवद्वयशताधिके।
ईशपुत्रशके मासे "जूनाख्ये" पञ्चमेदिने॥

अमावास्या क्षपाया च समये नववादने।
पूजासभारमासाद्य शारदां देवतासने॥

स्थापयित्वाऽपूजयत्तामासनावाहनादिभि ।
उपचारै रशेषैश्च स्तुवन्नेवं समाहित ॥

"वन्देह भवतीं बाला कौमारीं शक्त्ययधीश्वरीम्।
कालिके कृपयामह्यं सिद्धिद्वारमपावृणु॥

सर्वसिद्धि प्रदे देवि मातस्त्रिपुरसुन्दरि।
नित्ये षोडशिके देवि श्रीकण्ठार्धशरीरिणि॥

वराभयदहस्ताब्जे सृष्टिस्थित्यन्त कारिणि।"
एवसमाधिनिष्ठोऽभूद् गुरु स्तुत्वा परात्पराम्॥

शारदाप्यभवद् ध्यान लग्न चित्तेन्द्रियक्रिया।
आत्मार्पणं ततश्चक्रे स देव्या श्चरणाब्जयो. ॥

आप्लाविता वभूताता वानन्दामृतवारिधौ।
इयं हि षोडशीपूजा तान्त्रिकप्रक्रियोत्तमा॥

साधनानां शान्तिपाठो रामकृष्णस्य मंगल·।
नान्दी जगद्गुरुत्वस्य तस्य चासीन्महात्मनः॥

आध्यात्मिकानुभूतीनां शारदायास्तु सा पुनः।
विकासहेतु रभवन्मधुः सुमनसामिव॥

कदाप्यागच्छता कालीमन्दिरात् स्खलदंघ्रिणा।
मातृश्रीर्गुरुणा पृष्टा "कथं पश्यसि मामि"ति॥

"पीत स्त्वयासवो नूनं नेदं साधारणं मधु।
परंतु कालिकाध्यानसुधैवेति"समादधौ॥

दाराणामनुरञ्जनेऽतिशयिनौ श्रीरामकृष्णावुभा -
वत्यन्तादर गौरवप्रणय संमानेन सर्वाञ्जनान्।
पत्नीमेव तु शारदां भगवतीभावेन योऽपूजय -
त्तं देवं शरणं भजेमहि वयं श्रीरामकृष्णाह्वयम्॥

श्रीकृष्णो बहुवल्लभः समभवद्रासप्रवीणः पुरा
श्रीरामो जनकात्मजापतिरभूद्यश्चैक पत्नीव्रतः।
निष्कामश्च सशारदो विहरते यो मानसे निर्मिले
तं देव् शरणं भजेमहि वयं श्रीरामकृष्णाह्वयम्॥

अन्विष्यन् जनकात्मजां स्वयमगाद्रामावतारे च यो
रुक्मिण्या हरणं चकार च पुरा कृष्णावतारे पुनः।
प्राप्ता सप्रति शारदैव खलु यं श्रीदक्षिणेशस्थितं
तं देवं शरणं भजेमहि वयं श्रीराम कृष्णाह्वयम्॥

परिणीयाप्यनुभूतभावजसुखाः पूर्वेऽगमन् पूज्यता -
मवतारा रघुनायकादय इति प्रायस्तदप्राकृतम्।[1]
परिणीतोऽपि कलत्रनिःस्पृहऽमना यो नः प्रमाणं परं
प्रकृतं तं शरणं भजामि सततं श्रीरामकृष्णाह्वयम्॥

---

1. *असाधारणमस्वाभाविकम्। अप्रकृतमेव अप्राकृतमप्रस्तुतमितिच। मत्तेभविक्रीडितंवृत्तम्।*

तृतीयोभागः ।
अवतारलक्ष्यनिर्वाहः

III अवतारलक्ष्यनिर्वाहः

1. साधनाया विशेषाः समाप्तिश्च

केय ते साधनापेक्षा विदुषः शुद्धजन्मन ।
इति पृष्टो गिरीशेन रामकृष्णस्तमब्रवीत् ॥

गिरिजापि तपस्तेपे लब्धुं पशुपतिं पतिम् ।
राधायन्त्रोपासकोऽभूत् कृष्णश्च भगवान् स्वयम् ॥

जपध्यानै श्चिराभ्यस्तै रेव कामो मया जितः ।
निगृहीतं मनश्चापि चलं दुर्निग्रह भृशम् ॥

तथापि मन्यमानोऽह मात्मानं विजितेन्द्रियम् ।
पञ्चवटयां कदाप्यासं प्रसभं बलिना तदा ॥

गृहीतः कामवेगेन पिशाचेनेव कातरः ।
आत्मनोऽन्त करोमीति व्यलपं बहुधातुरः ॥

प्रार्थय कालिकां देवीं मुखं भूमौ च घट्टयन् ।
जितोमया काम इति ना भवन्मे कदाचन ॥

ततः प्रभृत्यहंकारः प्रसन्ने मनसि स्थिते ।
उदेति मे यदाहन्ता तदाऽस्वस्थो भवाम्यहम् ॥

यदा यदा प्रबुद्धः स्यात् कामश्चेतस्यहं तदा ।
कुर्वे प्रदक्षिणं काल्या उच्चैस्तन्नाम चोच्चरन् ॥

अहंकारश्च कामश्च परमात्मप्रसादतः ।
मुञ्चतः साधकानस्मान् नान्यथैव कथंचन ॥ [1]

कामश्चाप्यनुवर्तेत साक्षात्कारादनन्तरम् ।
शरीरेन्द्रियसंघातो ध्रियते यावदात्मनः ॥

किन्तु कार्यक्षमो नैव भविता दग्धरज्जुवत् ।
स्त्रीवेषभाषाभूषादि धारणेन च नश्यति ॥

अहन्ता स्वस्य भगवत्सखीभावानुचिन्तनात् ।
अस्थिरक्तादिसंमिश्रं शरीरमिदमास्थिरम् ॥

---

1 *भगवद्गीता 2-56 विषया विनिवर्तन्ते.*

इतिदेहेन्द्रियादीना हेयताभावनादपि ।[1]
निन्दामि स्वयमात्मनमहंकार परीक्षितुम् ॥

[2] स्वर्णभाण्डतुलाभार सूचिकेवोत्थिता न वा ।
गलितो वाथवानेति चावघाते तुषो यथा ॥

अविद्यासक्षयादेव ब्रह्मज्ञान भवेदत ।
उत्प्रेक्षे व्याघ्रमात्मान मविद्याहरिणादिनम् ॥

साक्षात्कारावसाना स्यु साधकानामुपासना ।
आरब्धायां कालिकाया पूजायामभवत् स्फुटम् ॥

सर्व चिन्मयमित्येव साक्षात्कारवतश्चमे ।
देवालयस्य कुडचेषु पूजापात्रेषु सर्वत ॥

अवाकिर प्रसूनानि भेदबुद्धेरभानत ।
एतदन्ताऽभवत्पूजा श्रीकाल्या न तत परम् ॥

रमण्या नाम वेश्याया रूप धृत्वा च लीलया ।
आत्मान दर्शयामास कालिका मे कदाचन ॥
देव. पापेषु चास्तीति बोधयन्ती सुनिश्चतम् ।
अन्यदापि मयाचैवं मणिनालकृते शिवे ॥
विश्व शिवमय दृष्टमेतदन्ता शिवार्चना ।
लतान्तिकं मयिगते लतान्तार्थ कदाचन ॥

विश्वरूप भगवतो मयादार्शि सुमार्चितम् ।
सुम कदापि नोपात्त पूजार्थ तदनन्तरम् ॥

तथा सर्वात्मिता जाग्रद्दशायामप्यभून्मम ।
कस्य चिद्गच्छत. पादपीडित वीक्ष्य शाद्वलम् ॥

अन्वभूवमह स्वाङ्गे शाद्वलप्रभवा व्यथाम् ।
पूजार्थ बिल्वपत्राणि कदाचिच्छिन्वताऽत्मना ॥
दलमेक त्वचासार्थ मवलून विलोक्य च ।
तरोर्बाधा तथाजाता नितरां व्यथितोऽभवम् ॥

"चर्मखण्ड द्विधाभिन्नमपानोद्गारधूपितम् ।
ये रमन्ति नमस्तेभ्य साहस किमतोऽधिकम् ॥" - ब्रह्मसिद्धिव्याख्या भावशुद्धि (p 24, Madras, 1963)

नाराचीस्यादेषणिका-अमर ।

जात [1] जम्भफलस्यापि खण्डन दु शक मम ।
यत्तदा जन्तुवधवद् दु सहा व्यदधाद् व्यथाम् ॥

कदाप्यह वीक्षमाण [2] प्रकृते गमणीयकम् ।
गङ्गतटे चरन्नास तदा कचन ताडितम् ॥

पृष्ठे रुषा नाविकेन [3] तरण्या कलहे सति ।
दृष्ट्वापि तत्प्रहारार्तो विललापाह मुच्चकै ॥

पृष्ठ मे हृदयोऽपश्यत् तत्प्रहारेण रोहितम् ।
बुद्धादिषु वक्तव्यम् ।
मन्येह सर्वभूतेषु साम्येन समवस्थितम् ॥

बुद्ध जगन्नाथमेव जगन्नाथपुरीगतम् ।
[4] वेदज्ञानेन यस्यास्ति न विरोधो न चाक्षमा ॥

पुर्यामस्या लोकयात्रा श्रीचैतन्यमहाप्रभु ।
विरराम ततोऽहं तां गदाधरगयामिव ॥

लक्ष्यसाधनत पूर्व न हि सद्रष्टुमुत्सहे ।
मम तस्य विभूतित्वाद् देहसपातशङ्कया ॥

तथैव जैनधर्मेऽपि महानस्ति ममादर ।
[5] शिख्खाभिधानां धर्मे च मूर्तयो जनकस्य ये ॥

शैव वैष्णव शाक्तेय शाखाना वैदिके मते ।
बौद्ध जौनादि धर्माणां दृश्यते चैक लक्ष्यता ॥

अस्मिन्नेव च काले मे विश्वास सुदृढोऽभवत् ।
स्वस्यावतारताया च रामकृष्णोभयात्मन ॥

ध्रुवे सर्वात्मभावे च प्रधाने जीविताशये ।
सर्वमतसामरस्ये भवबन्धविमोचने ॥ 1601

सौहार्दशान्तिसपन्न सहजीवन साधने ।
अशेषजनतायाश्च लोकेऽस्मिन् द्वेषपूरिते ॥

---

1 *Lemon* 2 *Nature* 3 *प्रवहणे ।*

4 *भागवतम् I - 3 तत कलौ सप्रवृत्ते समोहायसुरद्विषाम् ।*
बुद्धोनाम्ना जिनसुत कीकटेषु भविष्यति ॥
कीकटेषु मगध-गया प्रान्तेषु इति व्याख्याना । श्री ग बोधा (तेलुगु) p 347 बुध्दो न नास्तिक 5 *Sikhs*

वेदान्तमतानि

विशिष्टाद्वैतमद्वैत द्वैत चेति मतत्रयम्।
अधिकारे तारतम्यसापेक्ष मोक्षगामिनाम् ॥

समाधिगम्यमद्वैत मवाङ्मानसगोचर ।
शब्दस्पर्शादि रहित ब्रह्म तेजोमय शिवम ॥

मनोवाचा विधेय स्याद्विशिष्टाद्वैत गोचर ।
नारायणो हि भगवान् कल्याणसुगुणाकर ॥

जन्माद्यस्य प्रपञ्चस्य लीलया यस्य सभवेत्।
भक्तिगम्यो रसमय परमात्मा परात्पर ॥

यस्य रूप नाम धाम सर्व चिन्मयमेवहि।
कर्मिभि साधकै सेव्यो भगवान् द्वैतगोचर. ॥

भृत्यवद् धनिना वासेष्वाचरेत् कर्म मानव ।
ईश्वरार्पित चित्तस्य ममतासगवर्जितम् ॥

कुर्वतो विहितं कर्म तत स्वयं सत्ववृद्धित ।
नश्येदापन्नसत्त्वाया आसन्ने प्रसवे यथा ॥

सत्व रजस्तमो वापि न चैकान्त भवेद्भुवि।
जन्तो र्जातिस्य सर्वस्य भवेयुस्त्रिगुणा इमे ॥ [1]

मोक्षप्रासाद मारोढु ज्ञान भक्तिश्च कर्म च।
सर्वस्य साधकस्यात सोपान त्रितय खलु ॥

वृथैव वादा· शास्त्रेषु परस्परविनिन्दका ।
द्वैताद्वैतविशिष्टाद्वैताश्रिता ये भवन्ति हि ॥ [2]

यत सापेक्षमन्योन्य पूरक च मतत्रयम्।
अनुष्ठानैकताम्पर्य नाधिक्षेपप्रयोजनम् ॥

सर्वेषामपि योग्यता

सकृदुच्चरित येन भगवन्नाम साधुना।
भगवल्लग्नचित्तेन स आयाति मदन्तिकम् ॥

भगवद्गीता 18-40 न तदस्ति पृथिव्या वा।

अवधूत गीता, I-36 अद्वैत केचिदिच्छन्ति द्वैत मिच्छन्ति चापरे। सम तत्व न विन्दन्ति द्वैताद्वैत विवर्जितम् ॥ Supra pp 93, 119, Infra p 146

य श्चोपयाति मा साधुर्मया वा बोधित मतम्।
नहि तस्य पुनर्जन्म विद्यते सुकृतात्मन ॥

भवितव्यसूचनम्

भूत्वा कश्चिन्महाराज पश्चाद्वर्षशतद्वयात्।
पुन. प्रादुर्भविष्यामि प्रदेशे पश्चिमोत्तरे ॥

चिरकाल निरीक्ष्य तै र्न विमुक्तास्तदापि ये।
शीघ्रेण वाथ दीर्घेण कालेन परमात्मन ॥

अवश्य भावि भक्ताना सर्वेषा तत्त्वदर्शनम्।
इत्युवाच गुरु. शिष्यान् विशेषानीदृशान् बहून् ॥

यदैव कालिकाघट्टे रजनीर्गमयाम्यहम्।
केवल पायस चाद्धि शेष वान्न परार्पितम् ॥

आगता मे विजानीहि तदैव चरमा दशाम्।
इति पत्नीमुवाचाय यथोक्त तद्बभूव च ॥

2 जनन्यादि वियोगः।

रामेश्व-रस्य

त्रिसप्ततितमे वर्षे नवद्वयशताधिके।
रामेश्वरो दिव यातो रामकृष्णस्य सोदर ॥

भक्तिमास्त्यागनिरतो गुणवान् धर्मिक सुधी ।
[1] तेन पूर्व ज्ञातवता भ्रातुरागामिनीं मृतिम् ॥

वृद्धाया प्रार्थिता देवी कालिका मातुरात्मन ।
पुत्रनाशभव दु खमपनेतु सुदु सहम् ॥

किंतु मात्रे मृति भ्रातु र्गुरुदेवो यदावदत्।
"माशुच· पुत्र सर्वेषा मवश्य भाविनी मृति·" ॥

इति मात्रैव तनयो धीरयाश्वासितस्तया।
नीत्वा नाथस्य निकटे शारदा मासविशतिम् ॥

कामारिपुष्कर गत्वा चाययौ दक्षिणेश्वरम्।
चतुः सप्ततिके वर्षे नवद्वयशताधिके ॥

असौकर्यकर वीक्ष्य निवास वाद्यमन्दिरे।
विश्वनाथसहायेन श्रीशम्भुचरणेन च ॥

---

1 *रामकृष्णेन।*

गुरुदेवाय निर्माय दत्तासी नूतना कुटी।
चकार शारदा देवी यत्र पाकादिसविधाम् ॥

प्रत्यह परमोहसो मातर गृहिणीमपि।
अवेक्षते स्म प्रणयादपि सगविवर्जित ॥

मातावसानसमये बभूव दिवसत्रयम्।
अपेतसज्ञा नीता च गङ्गाकूल, मथात्मज ॥

रामकृष्णोऽर्पयामास पदयो कुसुमाञ्जलिम्।
तत. सा शान्तमनसा जगाम परम पदम् ॥

षट्सप्तति तमे वर्षे नवद्वय शताधिके।
ततश्च रामलालेन कारिताश्चोत्तरक्रिया ॥

यतमान स्वय कर्तु बभूव स्तभितागुलि ।
स्वतो विमुक्तसगत्वाद रामकृष्णो जगद्गुरु. ॥

स्य खड्ग कोशादिवाकृष्यमाण विस्पष्टमैक्षत।
गुरुदेव सूक्ष्मदेह म्रियमाणेऽपि चाक्षये॥

बाले रामकुमारस्य चाग्रजस्य तनूभवे।
य एकपूत्रो भ्रातुश्च सर्वेषामभवत्प्रिय ॥

विशिष्य रामकृष्णस्य सुगुणैर्विनयादिभि.।
दैवाराधन वेलासु ध्यानमग्नोऽभवन्मुहु ॥

सनिपातज्वरार्तो यश्चाचिकित्स्योऽन्तिमेक्षणे।
गङ्गे नारायणो रामे त्युच्चरन्तमनूच्चरन् ॥

पितृव्यं परमहस प्राणास्तत्याज दुस्त्यजान्।
निष्क्रामन्त तथाजीव देहाद् दृष्ट्वा ननर्त च॥

प्रहृष्ट श्रीरामकृष्ण. प्रस्फुट ज्ञानचक्षषा।
पश्चात्तताप दु खार्तो नैजाद् बान्धव्यबन्धनात्॥

"ईदृशी यदि मेऽवस्था बन्धुनाशाद्विरागिण.।
कथमन्ये शक्नुवन्ति सोढु शोक जना" इति॥

"वाससा पि न मे कार्य किमेतैर्बान्धवै पुन·।"
इति प्रकृतिमापेदे भावयन् बन्धवर्जित ॥

शभुचरणस्य तीव्रेण व्याधिना ग्रस्त श्रीशम्भुचरणोऽपि च।
"न मे मृत्युभय कि चिदि"त्युक्त्वा विजहौ तनुम्॥

अय महात्मा मथुरानाथा त्पश्चाद्यथोचितम्।
नियुक्तो जगदम्बाया "रसद्दार" पदाभिधे॥

देवालयाधिकारेऽभूद्विश्वनाथस्तत परम।
यश्च नेपालसस्थान सैन्योद्योगपदाकित॥

उपाध्यायोपाह्वयश्च रामकृष्णमुपेयिवान्।
सप्राप्य किमपि स्वप्ने महापुरुषदर्शनम्॥

स एवायमितिज्ञात्वा परमार्थोपलब्धये।
यस्मिश्च रामकृष्णोऽपि मित्रभावमदर्शयत॥

पञ्चसप्ततिके वर्षे रक्तग्रहणिपीडिता।
जयपूर्वा रामवाटीं प्रययौ शारदा पुन॥

प्राणापायस्थिति तस्या श्रुत्वा खिन्न पतिर्भृशम्।
हृदय चावद "ज्जन्म वृथा तस्या भवेद्यदि॥

परमार्थगसप्राप्य स्यान्नृजन्मेव निष्फलम्।"
पत्नीस्वास्थ्यकृते भक्त्या प्रार्थयामास चाम्बिकाम्॥

शारदापि तथा स्वस्मिन् ग्रामे तादृग्दशा गता।
प्रायोपवेशे दृढधी सिषेवे सिंहवाहिनीम्॥

देवीं भगवतीमम्बा भक्तत्राणपरायणाम्।
तत सा स्वास्थ्यमापेदे भगवत्या प्रसादत॥

"एकीकृत्य मनोवाच चेश्वर प्रार्थ्यते यदि।
अवश्य पूर्यते तस्य साधकस्य मनोरथ॥"

इति शिष्यान् रामकृष्णो बोधयामास वत्सलः।
अस्य दृष्टान्तभूत हि भाषितस्य स्वजीवितम्॥

3 ब्राह्मसमाज।

शिष्टपण्डितसंसर्गादनन्तरमवाप स।
अधुनातनसाधूनामाग्लविद्याविपश्चिताम्॥

संग ब्राह्मसमाजस्य स्थापकाना महात्मनाम्।
देवेन्द्रनाथठाकूर महर्षि ध्यानतत्परम्॥

रवीन्द्रनाथस्य कवे र्जनक जनकोपमम ।
सेन केशवचन्द्राख्य वक्तार प्राज्ञमुत्तमम् ॥

मजुम्दारोपाह्वयच प्रतापचन्द्रसञ्ज्ञितम् ।
गोस्वामि विजयकृष्ण शिवनाथ च शास्त्रिणम ॥

त्रैलोक्यनाथसंन्याल चिरजीव्यपराभिधम् ।
गत्वा ददर्श कृतिनो रामकृष्णो महाशयान् ॥

येऽपि विज्ञाततत्वाश्च भगवद्भक्त तल्लजा ।
ख्याति श्रीरामकृष्णस्य विस्तार गमिता च यै ॥

प्रीतिश्च शक्ति पूजाया विश्वासो विग्रहार्चने ।
रामकृष्णस्य सागत्यात्तेषु चोत्पदितोऽभवत् ॥

देवेन्द्रनाथ

शुश्रावानुभव चासौ ध्याननिष्ठस्य योगिन ।
स्वय देवेन्द्रनाथस्य "चेतनो दीपसमित ॥

दीपस्तंभोपमो लोक सहस्राधिकमल्लक ।[1]
जीवदीपा प्रकाशन्ते यत्रचे" त्येवमादिकग ॥

रामकृष्णस्य जातासु विविधास्वनुभूतिषु ।
तादृशोऽनुभवोप्यासीत् पञ्चवटचा कदाचन ॥

केशवचन्द्रसेन

पञ्चसप्ततिके वर्षे नवद्वयशताधिके ।
रामकृष्णो ययौ द्रष्टु केशवाख्य महाशयम् ॥

दृष्ट्वा केशव चन्द्रोऽपि रामकृष्णेन साधिताम् ।
समाधिनिष्ठां परमामवापानल्पविस्मयम् ॥

विशिष्य लब्धसज्ञेन भगवन्नाम्नि कीर्तिते ।
नितरा मुक्तसगस्य रामकृष्णगुरोरपि ॥

स्निह्यति स्म मनोत्यन्त दृष्टमात्रेऽपि केशवे ।
"भगवज्ज्ञान सपन्नो भवानिति मया श्रुतम् ॥

तस्मात्प्राज्ञ वरिष्ठ त्वा दिदृक्षुरहमागत ।
जले स्थलेऽपि मण्डूक स्रस्तवालश्चरेद्यथा ॥

---

1. मल्लक [illegible] (bowl-shaped container for lamp-wick)

लोके च भगवदध्याने नष्टाज्ञानस्तथा नर ।
वालो भवति चाज्ञान" मित्यय प्रशसस तम् ॥

योगस्य भोगससर्ग प्रायश खण्डयन्नपि ।
गङ्गाया पावनेतीरे मुहुस्तद्वचनामृतम् ॥

केशवोऽपि समास्वाद्य न सतृप्तोऽभवद्गुरो ।
अनुष्ठातु श्रुतिप्रोक्त साधन च प्रचक्रमे ॥

उवाच गुरुदेव च "कियन्त कालमीदृशम् ।
करोष्यज्ञातवास त्वमवाप्तव्यं यशस्त्वया ॥"

पत्रे प्रकटयामास माहात्म्य चास्य नेकधा ।
स तु त प्रत्युवाचेति "कि ब्रवीषि वृथा वच ॥

आत्मान पादरजसा समेषा कलये समम् ।
प्रशसितो भवाम्यद्य श्वो भविष्यामि निन्दित ॥

**ससेव्यो भगवान् भक्तै र्मातृवत् परमाप्तवत् ।
नित्यमात्मीयताबुद्ध्या चानुभाव्यस्तथात्मनि ॥**

[1] ऐश्वर्यवर्णनेनास्य धनिकस्येव कि भवेत् ।
साकारोऽपि निराकार स एव भवतीश्वर ॥

रूपो वापि मन वापि नोरमेवभवेद्यथा ।
[2] गजरूप यथैवान्ध स्वरूप परमात्मन ॥

न कश्चिदपि विज्ञातु मज्ञ शक्नोति कृत्स्नश ।
यथा चित्रगत वस्तु वास्तव स्मारयेज्जनान् ॥

तथा भगवतश्चापि रूप चित्रगत निजम् ।
त्र्यशीति तम वर्षे च नवद्वयशताधिके ॥

ददर्श श्रीरामकृष्ण. केशव व्याधिपीडितम् ।
"सत्लपेयमह केन न भवेद्यदि केशव ॥"

इत्यपि प्रार्थिता काली तेन व्याकुलचेतसा ।
तथापि न चिरादेव तनु तत्याज केशव ॥

---

1 बृ उ 4-3-14 आराममस्य पश्यन्ति ।
2 छान्दो 5-18-1 शाकरभाष्यम् - हस्तिदर्शनइव जात्यन्धा ।

यच्छोकान्न जहौ तल्प गुरुदेवा दिनत्रयम् ।

प्रतापचन्द्र मजुदार.

एव हि भगवत्तत्त्वसुधा मास्वाद्य मोदित ॥

प्रतापचन्द्राख्यबुध [1] पत्रिकास्त्रप्यवर्णयत् ।
"भवत्यय रामकृष्ण शैव शाक्तश्च वैष्णव ॥

तथापि न भवेदेव शैव शाक्तोऽपि वैष्णव ।
प्राप्तवान् सर्व धर्माणा गम्य चा तीतमेव च ॥

चिदानन्दस्वरूप सत् परम ब्रह्म निष्कलम् ।
सर्वेऽवतारा यच्छक्तेर्लीलारूपा न सशय ॥

इत्यय बोधयोद् भक्तान् सर्वधर्मरहस्यवित् ।
यावज्जीव बोधसुधा विन्दामस्तत्प्रसादिताम् ॥"

विजयकृष्णागोस्वमी

निरकारैकतात्पर्य साकारे भगवत्यपि ।
भक्तो विजयकृष्णोऽभू द्रामकृष्णसमागमात् ॥

दूरे क्रोशशतेभ्येऽपि प्रदेशे वा स्थितस्य च ।
दर्शन गुरुदेवस्य प्राप्तं तेन महात्मना ॥

गोस्वामिनि स्थूलकाये नामसकीर्तनेषु च ।
नृत्यत्यट्टोपरि मुहु "भ्रंश्येद् भवनमेवहि ॥"

इतीव परमोहंस स्नेहात् परिजहास तम् ।
[2] चैतन्यदेवानुचराद्वैतगोस्वामिवशजम् ॥

शिवनाथ·

विस्मित शिवनाथोऽभूद् दृष्ट्वाऽनितरसाधितम् ।
समाधिमपि वैराग्य कान्तार्थविषय गुरो ॥

"समाधि रेवमप्यासी च्चैतन्यादिमहात्मनग्म ।
करोपरि परीक्षार्थ निक्षिप्ते द्रव्यनाणवे ॥

तत्स्पर्शदयमुद्विग्न समाधौ मग्नधीरभूत ।
अपनीते ततस्तस्मिन्नापेदे प्रकृति पुन ॥

The Theistic Quarterly Review
The Gospel of Sri Ramakrishna I p 163

कितु कान्तार्थ वैराग्य मतिवेल निरर्थकम ।
समाधिप्रावहन्मोह नाडीदौर्बल्यलक्षणम ॥

इति ब्रुवन स गुरुणा सोपहास पबोधित ।
"सत्वर गम्यता नो चेत्कान्ता क्रुद्धा भवेत्तव ॥

प्रायो जीवन्ति ये केचि तत्त्वनिष्ठाविवर्जिता ।
मिश्रीकृत्याभय लक्ष्यमैहिक पारमार्थिकम ॥

ते कथ ज्ञातुमर्हन्ति समाधि तत्त्वतो यत ।
ज्ञान रात्यमनत स्यात स कथ मोहयो" दिति ॥

तथापि तत्वजिज्ञासा सत्यान्वेषणनिश्चयम ।
वीक्ष्य तस्मिन रामकृष्णो वात्सल्य समदर्शयत ॥

परिष्वङ्गप्रदानेन राम पवनजे यथा ।

त्रैलोक्यनाथ सन्याल (चिरञ्जीवि शर्मा)

प्रियोभूद्रामकृष्णस्य चिरञ्जीव्यपराभिध ॥
त्रैलोक्यनाथसन्यालो गीतकारश्च गायक ।
कीर्तनानि यदीयानि वङ्गेषु प्रथितानि हि ॥

येन साक च सवादे रामकृष्णो जगाद च ।
"आदावर्थश्च कामश्च सपाद्य पुनरेव हि ॥ 1701

यापनीयस्तत काल पश्चिमो दैवचिन्तने ।"
इति कश्चन मन्येत विवेकी स कथभवेत् ॥

विज्ञेयो भगवानादौ ससार स्यात्ततो यदि ।
न नरो लिप्यते तेन पङ्केन [1] यमकीटवत् ॥

4. प्रसिद्धा पुरुषा

अश्विनीकुमार दत्त

एकाशीतितमेवर्षे नवद्वयशताधिके ।
दत्तोऽश्विनीकुमारश्च देशभक्तो महाशय ॥

पृष्टवान् श्रीरामकृष्ण भगवत्प्राप्तिसाधनम् ।
"कलञ्ज इति ह्याक्रोशे न जायेत मदोयथा ॥

---

1 కుమ్మరపురుగు *Mudfish cf The Gospel II p 957*

तथैवानुभव मुक्त्वा भगवान ज्ञायते कथम् ।
भगवच्चिन्तन कार्यं नृणा ससारिणा सताम् ।।

कार्यान्तरव्यापृताना मपि तद्गत चेतसाम ।
आकर्षति सदैवास्मान् भगवाननुकम्पया ।।
अयस्कान्तशिला लोह यथैव मलदूषितम् ।
मालिन्य मपनेतव्य मस्माभिर्यतमानसै ।।"

इति न श्रीरामकृष्ण सूपपन्न मुपादिशत् ।
अश्विनीकुमार श्चापि रामकृष्णमवर्णयत ।।

"अपश्य पञ्चषान वारान् रामकृष्णमह पुन ।
आवयो रचिरादेव जात विस्रम्भभाषणम् ।।

चिर परिचितेनेव ममास्य च महात्मना ।
असस्तुतानामपि यो भावमार्द्रं हृदि व्यधात् ।।

केवल सनिधानेन वेदव्यासमहर्षिवत् ।
[1] एनरा दहन धाम यस्य भातीक्षणक्षमम ।।

मन्दस्मितमुखाभोज करुणावर्षिवीक्षणम् ।
तत्सकाशाद्विनिर्गत्य विस्मितोऽहमचिन्तयम् ।।

तदेव सस्मरस्तस्य सस्मिताननपङ्कजम् ।
"आस सभाषमाणोहं कीदृशेन महात्मना ।।
साधारणो विशिष्टेन पुरुषेणे"ति चादरात् ।

राजा यतीन्द्रमोहन ठाकूर

यतीन्द्रमोहनो राजा रामकृष्ण ददर्श च ।।

"उत्तरोत्तर युक्त्यासीदेव संभाषण तयो ।
करणीय मनुष्यस्य भगवच्चिन्तन खलु ।।"

इत्युक्तेगुरुदेवेन यतीन्द्र पुनरब्रवीत् ।
"ससारिणा मादृशा किं विद्यते भवमोचनम् ।।

धर्मजोऽसत्यवचनाद्दर्श नरक नृप ।"
श्रुत्वा श्री रामकृष्णोऽपि कोपितश्चा ब्रवीदिदम् ।।

---

1. *किरातार्जुनीयम् - II, III*

"कथ त्वया विस्मृतास्ते क्षमाधेर्यादयो गुणा ।
युधिष्ठिरस्य स्मरसि मृषावाक्य तु केवलम ।। "

कृष्णदासपाल

कृष्णदासपाल इति पात्रिकेयोऽपि (Journalist) कश्चन।
दर्शनार्थं समागत्य रामकृष्णमथा ब्रवीत् ।।

वैराग्यगुणमुद्दिश्य "चाय देशस्तथाविधै ।
निरर्थकैर्हि नियमे रधोगमनमञ्चति ।।

'युष्माभि कार्य निरतै भव्यि' मित्येवमादिक ।
उत्तेजकस्तूपदेशो युवकानामपेक्ष्यते ।। "

तत श्रीगुरुदेवोऽपि श्रुत्वा तत्कुपितोऽवदत् ।
"मन्दबुद्धि रिवाभासि चात्मान मन्यसे बुधम् ।।

यद्वेदादीनि शास्त्राणि भाषन्ते मोक्षसाधनम ।
किते निरर्थक तत् स्यात् किमन्यत् सत् प्रयोजनम् ।।

भवेन्मुख्यतर चास्माद्येनोपक्रियते जगत् ।
इष्टापूर्तादिक कर्म लोकस्योपकृतिर्यदि ।।

निर्मूलन तु दु खस्य कर्तु निरवशेषत. ।
केन शक्येत मुक्त्वैक दयालु परमेश्वरम् ।।

वर्षासु त्वादृशो नद्या जात कर्कटको लघु ।
अपारस्यास्य जगत श्चोपकर्ता कथंभवे ।।

भूयेत निरहकारै र्लोकसेवापरायाणै ।"

ईश्वरचन्द्रविद्यासागर.

एकाशीतितमे वर्षे नवद्वयशतधिके ।।

द्रष्टुमीश्वरचन्द्र च रामकृष्ण स्वयययौ ।
विद्यापूर्व सागराख्य सघसेवापरायणम् ।।

सवादश्च तयोरासीद् वाक्चमत्कृतिबन्धुरम् ।
श्रीरामकृष्ण अद्याह सागर प्राप्तो न कुल्या नापि वाग्निीम् ।।

ई च यद्येव गृह्यता किचित् क्षार सलवण जलम् ।
श्रीरा मैवम्, क्षीरसमुद्रस्त्व विद्याना पयसा निधि ।।

शुकदेवादिवत् सत्वगुणाशरजसा युत ।
सात्विकानि करोषि त्व कार्याणि जनताकृते ।।

राजसेष्वपि कार्येषु न दोषो विद्यते तव।
सत्वाश्रयत्वाद्रजसस्तादृशस्य विशेषत ॥

निष्कामेन क्रियन्ते चेत्तानि कार्याण्यपि त्वया।
भवेद् भगवत प्राप्ति रनेनैव पथा ध्रुवम ॥

यश पुण्यादिकामेन क्रियते यदि किञ्चन।
निष्काम तत् कथकार कार्य भवितुमर्हति ॥

व्यर्थ वैदुष्यमगुण दयावैराग्यवर्जितम्।
रसहीनमनास्वाद्य शुष्कापक्व फल यथा ॥

पाण्डित्ये विहरे द्विद्वान् यथा कङ्को विहायसे।
तस्य दृष्टिस्तु निर्जीवविषयेष्वेव सन्ततम ॥

त्याग. प्रोक्तो हि गीताया तेषा भगवता स्वयम्।
निस्सगेनैव मनसा ससेव्यो भगवान्नरै ॥

दृश्यते सर्व मुच्छिष्ट मुत्कृष्टश्चैक ईश्वर ।
मगल मगलाना च स्वच्छं परमपावनम् ॥

दिष्ट्या त्व वर्धसे साधो दिव्यत्व त्वयि हेमवत्।
न जानाति भवन सूक्ष्ममलावरणसवृतम ॥

क्षीयंते सर्वकर्मणि भगवच्चिन्तनात्तव।
यदैव तद्भवेज्ज्ञात महार्घनिधिसमितम ॥

विद्यासागर श्रुत्वेतन्मत्रलमुग्ध इवाभवत्।
अवदच्चाद्य मे किचिन्नूतन श्रुतमित्यपि ॥

शशधरतर्कचूडामणि

चतुरशीतिके वर्षे नवद्वयशताधिके।
दृष्टु शशधर तर्कचूडामणिगगाद्गुरु ॥

धर्मप्रचारनिरत .र्वधर्मार्थकोविद ।
समस्तशास्त्र निष्णात सर्वशास्त्रार्थ तत्त्ववित् ॥

तस्य प्रवचनाना च विषय ज्ञातुमुत्सुक ।
शास्त्रेषु शिक्षक ज्ञात्वा गुरुदेवस्तमब्रवीत् ॥

"कलौ हि नारदनोक्ता भक्तिरेव गरीयसी।
न शास्त्रविहित कर्म जनेभ्यो रोचतेऽधुना ॥

सुदुर्ग्रह ज्वरार्तेभ्यो दशमूलकषायवत् ।
कर्मकाण्डे प्रधानाशा बोधनीयास्ततस्त्वया ॥

साधारणमनुष्याणा गायत्रीजप इष्यते ।
[1] सध्योपास्तिर्हि गायत्र्या लीयते सापि चोकृतौ ॥

ओकारोऽपि समाधौ च घण्टानादतरङ्गवत् ।
न साक्षात्कारत पूर्वं कर्म नशयेत् कथ चन ॥

तस्माद्भक्तिरनुष्ठेया भगवत्प्राप्तिसाधने ।
यथा फले समुत्पन्ने विशीर्येत सुम स्वयम् ॥

भक्तिभावे समुत्पन्ने तथाकर्म विनश्यति ।
ईश्वरादेशतो धर्मप्रचार. क्रियते यदि ॥

श्रोतारो यान्ति वक्तार प्रदीप शलभा यथा ।
शास्त्राणि विविधानर्थान् बोधयन्ति हि कृत्स्नश ॥

साक्षात्कार विना लब्धास्तेसर्वे निष्फला खलु ।
निष्पीडितेऽपि पञ्चाङ्गे कथ वृष्टिर्भवेदिति ॥

नत कान्यपि गीतानि जगौ भगवतो गुरु ।"
गुरुदेव यदा दृष्टु पण्डित स्वयमाययौ ॥

तस्माद्भीतो जगामायं बहिर्वासात पुन पुन ।
तयो सवादमुद्दिश्य रामकृष्णोऽब्रवीदिति ॥

"उदसर्पन्मस्तकं मे कापि शक्तिस्तटिन्निभा ।
पण्डितस्य मुखं धैर्या दपश्य गतभीस्तदा ॥

लुप्ताया बाह्यसज्ञाया मादो प्रवचनस्य मे ।
पुञ्जिता इव केनापि धान्यानामिव राशय ॥

यथा यथा प्रयुज्यन्ते तथोपस्थापिता गिर ।
गलदबाष्पो मया दृष्टो लब्धसज्ञेन पण्डित ॥

साधारण मनुष्यत्व दिव्यत्वेनाभिशोभितम ।
जीविते श्रीरामकृष्णस्य यथा श्रीगमकृष्णयो ॥

---

1 पाशुपतब्रह्मोपनिषत् 1 - 18 उपनिषदब्रह्मेन्द्रव्याख्या -
'नोदकैर्जायते सध्या न मंत्रोच्चारणेन तु ।
सधो जीवात्मनोरैक्य सा सध्यासद्भिरुच्यते ॥"

गुरुदेव पुनर्द्रष्टु माययौ पण्डितो यदा।
तदा त वोधयामास भगवत्प्राप्तिसाधनम्॥

परितापभर सर्वं साधानाना विलक्षणम्।
भक्तिश्च परितापश्च विधाने फलदे यत॥"

बकिमचन्द्र चट्टोपाध्याय

कदापि परमो हसो गृहे भक्तस्य कस्यचित्।
ददर्श बकिम चन्द्र चट्टोपाध्याय वशजम्॥

सुप्रसिद्ध कथाकार (Novelist) नवीने वगवाङ्मये।
एव पप्रच्छ "चाख्याहि वक्रिमाय कथ तव॥"

सोऽवदत् "श्वेतवर्णाना पादरक्षाहते"रिति।
"मम नायमभिप्रायो वक्रतास्ति त्रिभंगिन॥[1]

राधिकाप्रणयात् कृष्णदेवस्यापि परात्मन।
अस्तु तद् ब्रूहि तावन्मे यत्कर्तव्य जनैरिह॥"

श्रुत्वैतद्गुरुदेवोक्त मुत्तर प्राह बकिम।
"निद्राहारौ मैथुन च प्रधानमिहजीविते॥"

गुरुस्तस्मिन् वदत्येव "मतिभाषीव भासि मे।
यदेव भुक्त प्रायेण स उद्गारो मुखे भवेत्॥

सर्वप्रधानं भगवत्पदध्यान नृणामिह।
विवेकवैराग्यवता भाव्य हि भुवि धीमता॥

निन्दन्ति भगवद्भक्तमुन्मत्त इति चेतरे।
भगवद्भावनाहीन पाण्डित्य व्यर्थमेव हि॥

न कोप· कृपया कार्य· श्रुत्वेद" मिति चाब्रवीत्।
"न भवाम्येव भगवन् प्रियैकश्रवणोत्सुक॥"

वदन्नेव बकिमोऽपि शुश्राव च ननन्द च।
गीत श्रीरामकृष्णेन गीतं श्रुतिमनोहरम्॥

यद्वाणी दुरितासुरान्तकधनुष्टङ्कार लीलायते
श्रेयोगोपवधूसमागम विधौ वशीनिनादायते।

The Gospel I p 502, II p 1012

हुंकारै रूपदेशनैरपि विवेकानन्दबोधावह
त हस परम भजामि शरण श्रीरामकृष्णाभिधम् ॥

5. नगर सकीर्तनम् ।

अथ प्रचलितं दृष्ट्वा पुरसकीर्तनोत्सवम् ।
रामकृष्णोऽन्तिम वार ययौ कामारिपुष्करम् ॥

तथा परिसरग्रामान् जगाम च तत पुन ।
तत्प्रस्थानात् पूर्वमेव दिव्यदर्शनमाप स ॥

यस्मिन् ददर्श गौराग नवद्वीपैकभूषणम् ।
अद्वैतनित्यानन्दाभ्या युत चैतन्य देशिकम् ॥

भक्तानां परिवारेण महता परिवेष्टितम् ।
पञ्चवटचा समारभ्य चालयद्वारपार्श्वत ॥

उपयान्त वृक्षषण्ड ततो यान्तमदृश्यताम् ।
तत स्वग्राममागत्य चान्यान् जनपदानपि ॥

कीर्तनानन्दानुभवा नचिरात्समवाप स ।
स्वग्रामे हृदयस्यापि सिहोराख्ये समागत ॥

गौरागभक्तैरनघै रनेकैरपि संघश ।
जनै सप्ताहपर्यन्तमन्यैश्च परिवेष्टित ॥

मृदङ्गादीनि वाद्यानि वादयद्भि समन्तत ।
वदद्भि "श्चागत. कोऽपि ज्ञानी भक्तो महाशय ॥

म्रियमाणो जायमान सप्तकृत्वो दिने दिने ।
विशंश्च प्रविशंश्चैव समाधीनां परपराम् ॥ "

सुदूरमपनीतोऽपि हृदयेन मुहुर्मुहु ।
नृत्यद्भिर्वादयद्भिश्च रामकृष्णोन्वगामि तै ॥

"जपमालोर्ध्वपुण्ड्रोवा नास्ति किं तस्य कारणम् ।
ज्ञानिनो नियमाः स्रस्ता जीर्णवृन्तदलोपमा ॥ "

इत्यन्योन्यं भाषमाणै स्तन्माहात्म्यवशीकृतैः ।
उपमानमिदं पश्चाच्छिष्येभ्योऽबोधयद गुरु ॥

नृत्य च रामकृष्णस्य कीर्तना समये कृतम् ।
एवहि शारदानन्दो वर्णयामास सुन्दरम् ॥

"सगीतके सप्रवृत्ते मूर्छनादिभिरन्विते ।
मध्ये भक्तसमूहस्य ननर्त चरणक्रमै ॥

ललितै सुकुमारैश्च रामकृष्णो महानट ।
अनुद्धतमसभ्रान्त सस्मिताननपङ्कजम् ॥
ब्रह्मानन्दरसास्वादभावावेशमनोहरम् ।"

काञ्चनादिवैमुख्यम्

स्वस्मिन् शरीरलावण्ये सर्वनेत्रमनोहरे ॥[1]
गुरो स्तीव्रा जुगुप्सासी च्छरीरादिष्वनास्थया ।
काली च प्रार्थता "रूपमुपसंह्रियता"मिति ॥

लक्ष्मीनारयणाख्येन धनिना दित्सिते धने ।
ताडितो लगुडेनेव निपत्य धरणीतले ॥

नि स्पृहो विगतप्रज्ञो रामकृष्णो यतीश्वर ।
प्राप्तसज्ञोऽभवत्पश्चात्पुन कृच्छ्रेण जीवित ॥

एकदानीय गोवत्स बद्धा स्तम्भे कुतूहलात् ।
"गृहीत्वेम स्वक ग्राम हेलकर्मणि योजये ॥"

इति ब्रुवन्त हृदय श्रुत्वा व्यथितमानस ।
अहो विलासो मायाया" इति भावनया क्षणात् ॥

रामकृष्ण पपातोर्व्यां नष्टसंज्ञ पुनस्तत ।
लब्धा संज्ञा चिरादेव बभूव स्वस्थमानस ॥

6. शिष्यवर्याः ।

बोधामृत स्वय ज्ञाना ज्जीणदिव भवेद्गुरो ।
अन्नादिव पयो मातु रजीर्ण वान्तमेव तत् ॥

अधुनातनसाधूना योगो भोगेनमिश्रित ।
इति ज्ञात्वा रामकृष्णो देव्या काल्या प्रसादत ॥

II-4 तान्त्रिकसाधना Supra p 81

अध्यात्मविषय ज्ञान यथावद्भोगवर्जितम् ।
स्वीयावतारलीलायालक्ष्यभूत यत्न तत् ॥

प्रख्यापयितुकामोय तात्त्विक च सनातनम् ।
नैष्ठिकाना साधकानामन्वेषणपरोऽभवत् ॥

"कदा प्रियतमा शिष्या आगच्छेयुर्ममे"ति च ।
तादृशानामागमार्थं चिन्ताक्रान्तो बभूव स ॥

कालातरे समाजग्मु रनेके तस्य सनिधिम् ।
आध्यात्मिकसुता· काल्या जगन्मातु प्रसादजा ॥

येऽवतीर्णा हि धर्मस्य स्थापनाय शुचिव्रता ।
शिष्या भक्ताश्चसुधियो विनीता विमलाशया ॥ 1801

नरेन्द्रो य प्रसिद्धोऽभूद् विवेकानन्द नामत ।
राखाल चन्द्र घोषश्च ब्रह्मानन्द इति श्रुत ॥

बाबुराम इति ख्यात· प्रेमानन्दश्च योऽभवत् ।
घोष स्वामी ततो नित्यनिरञ्जन इतीरित ॥

योगीन्द्रनाथरायश्च योगानन्द इति श्रुत ।
एते श्रीगुरुदेवस्य चातरगिकपञ्चकम् ॥

सपूर्णचन्द्रघोषाख्याश्चैते हीश्वरकोटिगा ।
अन्येपि चोत्तमा शिष्या रामकृष्णस्य चाभवन् ॥

सुबोधचन्द्रघोषश्च क्षीरोदश्चापि बालकौ ।
शशिभूषशरच्चन्द्रौ चक्रवर्तिपदौ तथा ॥

श्रीरामकृष्णानन्दाख्य शारदानन्दशब्दितौ ।
तथैव नित्यगोपालो बालभक्तो बभूव च ॥
यस्मिन् परमहसत्व लक्षित गुरुणैव हि ।
गृहस्था रामचन्द्राद्या माननीया महाशया ॥

आसश्चमहिला शिष्या मृडानी श्यामसुन्दरी ।
योगीन्द्रमोहिनी चैव गोलापा मातृशब्दिता ॥

अन्याश्चगुणसपन्ना समान्या धन्यजीवना ।
या श्रीपरमहंसस्य सेवाभाग्य प्रपेदिरे ॥

वात्सल्यमापु पितृनिर्विशेष शिष्या गुरोस्तादृगलब्धपूर्वम् ।
आप्यायिता येन न सस्मरेयु कदापि मातापितरौ स्वकीयौ ॥[1]

सन्ति तेषा च केषा चित् स्मरणीया मन प्रिया ।
[2] सनिवेशाश्चरित्रेषु परमाश्चर्यहितव ॥

वेकानन्द. (नरेन्द्रनाथ.)

कालीघट्टपुरे सिम्ला प्रदेशे श्रीमताकुले ।
त्रिषष्टतमवर्षेच नवद्वयशताधिके ॥

पुष्ये बहुलसप्तम्या दुन्दुभौ सोमवासरे ।
उदितो भुवनेश्वर्या दत्तवशाब्धिचन्द्रमा ॥

संपन्नस्य वदान्यस्य वृत्त्या च न्यायवादिन ।
पुत्रो नरेन्द्रनाथाख्यो विश्वनाथस्य चौरस ॥

दुर्गाचरणनाम्नश्च पौत्रो धर्मानुवर्तिन. ।
य. स्वीचकार सन्यास नि संगो युवकोऽपिसन् ॥

स्वजीवनविधाने च नरेन्द्रोनुससार यम् ।
वीरेश्वर प्रसादेन स्वपित्रो पुण्यसंपदा ॥

जात माजन्मनो माता शिवभक्ति परायणा ।
इतिहास कथाभिश्च पयोभिश्चाभ्यवर्धयत् ॥

सहानन्दविवेकाभ्या विवेकानन्दशब्दितम् ।
[3] मल्लस्वामी योधसाधु धर्मसग्रामलालस ॥

ईश्वरप्रेरितो वक्ता हैन्दवीयप्रभञ्जन ।
देशभक्ताग्रगण्यश्च वेदान्तज्ञशिरोमणि ॥

इति प्रशंसित सर्वै प्राच्यपाश्चात्यसत्तमै ।
यः पश्चाद्विश्रुति लेभे सर्वेऽस्मिन् जगतीतले ॥

धीशक्ति र्देहशक्तिश्च सम्यग्यस्मिन् समन्विते ।
विद्यासु कुशलप्रज्ञ सस्कृताग्लमयीषु य ॥

विद्वानपि विनीतश्च बलवानप्यनुद्धत. ।
दयालुर्विमलस्वान्तो गभीरमधुराकृति ॥

न काव्यालकारसूत्रम् 5-1-17 स्तनादीना द्वित्वाविष्टाजाति प्रायेण ।
वेशस्तु भावाना मनोज्ञ काव्यमित्युक्तपूर्वमेव ।
'itant Monk, and so on

प्रेममयस्त्यागमय प्राच्य पाश्चात्यसधिकृत् ।
निद्राणो भारतीयस्मा येनचोज्जीवित पुन ॥

ध्यानविग्रहपूजाद्या यस्यासन् बालकेलय ।
योऽश्रान्त तप्यमानोऽभूद्भगवद्भक्ति कारणात् ॥

तस्यापि जीवित भावि दृश्यमान मभूद् द्विधा ।
एक भोगैश्च सपन्न मन्यत्तापससमतम् ॥

अन्ततश्चान्तिमस्यैव दृश्यस्य विजयोऽभवत् ।
सभ्यो ब्राह्मसमाजस्यापृच्छद्[1] देवेन्द्रमेकदा ॥

"भगवन्त महार्षे त्व दृष्टवान् वा न वे"ति स ।
"लोचने वत्स ते भात सुन्दरे योगिनो यथा ॥"

इति तेनायमुक्तश्च निवृत्तोऽकथितोत्तरः ।
सुरेन्द्रनाथमित्रस्य गृहे भक्तस्य चैकदा ॥

उपस्थिते रामकृष्णे जगौ सकीर्तनामयम् ।
श्रुत्वा परमहंसस्तद् गीत समोहितोऽभवत् ॥

दक्षिणेश्वरमागच्छेत्याजुहाव गुरुश्च तम् ।
दत्तोऽपि रामचन्द्राख्यो बान्धवस्तमचोदयत् ॥

दर्शने रामकृष्णस्य दक्षिणेश्वरवासिन ।
ततः कतिपयैर्मित्रैर्ययौ तद्दर्शनोत्सुक ॥

स नरेन्द्रे दृष्टमात्रे हर्षोन्मत्तइवाभवत् ।
गीत गानं नरेन्द्रेण श्रुत्वाऽलम्ब्य करेण तम् ॥

प्रदेश विजन नीत्वा वक्तुमेव प्रचक्रमे ।
आनन्दबाष्पधाराभि राप्लुताननपङ्कज ॥

"कियान् विलम्बो दृष्टु मा मिह वत्स कृतस्त्वया ।
सदा निरीक्षमाणोऽहमनय दिवसान् बहून् ॥

श्राव श्राव लौकिकाना भाषणान्युद्विजे भृशम् ।
सुखयामि मनः कर्णौ तवाद्यवचनैरहम् ॥

ममानुभूती रुद्दिश्य चालपामि त्वया सह ।"
बद्धाञ्जलिपुटो भूत्वा पुनरेवमुवाच स ॥

---

1 *देवेन्द्रनाथठाकूर ।*

"जानामित्वामृषिश्रेष्ठं नर नारायण भुवि।
लोकशोकापनयनायावतीर्ण सनातनम्॥

आगन्तव्य त्वया वत्स द्रष्टुं मा पुनरेव च।"
इत्यनुज्ञाप्य खाद्यानि भोजयित्वा स्वहस्तत॥

ततस्तथेतिवचनमादाय विससर्ज तम्।
तत पूर्व तयोरासीत् सवादो हृदयगम्॥

प्रश्न: यश्चरित्रप्रसिद्धोऽस्ति जगतीवलयेऽखिले।
नृ "अपि साक्षात्कृतो ब्रह्मन् भगवान् भवताऽनघ॥"

देव वीक्षे स्पष्टतर वत्स त्वत्तोऽन्यस्मादपीश्वरम्।
[1] न केवल मयादृष्टो दर्शयिष्यामि तेऽपि तम्॥

अभिप्रायो भ्रम प्रायो न दृश्यो भगवानिति।
सर्वैश्च दृश्यते देव. परितापभरोऽस्ति चेत्॥

भगवद्दर्शनार्थं के विलपन्तीह मानवा।
पुत्रार्थं वाधनार्थं वा विलपन्ति निरन्तरम्॥

उन्मत्तोऽह मतो लोके भगवत्प्राप्तिकारणात्।
उन्मत्त इह को नास्ति विषयैर्मोह कारणैः॥"

श्रीरामकृष्णस्य नरेन्द्रनाथो प्यवेक्ष्य तत्प्रेम निशम्य वाच।
विचेष्टित तस्य तथैव चित्र दृष्ट्वा पर विस्मयमाजगाम॥

ततो गत्वा नरेन्द्रोऽपि स्वगृहं गुरुसनिधे.।
प्रवृत्ति तस्य दुर्बोधा स्मृत्वा चैवमचिंतयत्॥

"उन्मत्तो वाप्यनुन्मत्तो महात्माऽय भवेद ध्रुवम्।
स कीदृशो वा भवतु प्रेमपाशेन मां पुन॥

बबन्धाशक्यमोक्षेण दृढेन गुरुणा गुरु।
असाधारण वैराग्य संपन्न. संयमिप्रभुः॥

गुणेनानेनचैकेन जगत्पूज्यो भवत्ययम्।
वैराग्यस्य च हार्दस्य महाद्भुतसमन्वय॥"

---

[1] भारते अनुशासनपर्वणि Vol VI 14-70

42 वासुदेव उवाच- अपितावन्ममाप्येव दद्यात्सभगवान् शिव।
दर्शन मुनिशार्दूल प्रसाद चापि शकर॥
उपमन्युरुवाच - द्रक्ष्यसे पुण्डरीकाक्ष महादेव न सशय।
अचिरेणैव कालेन यथा दृष्टो मया नघ॥

अत्रान्तर रामकृष्ण परितप्तोऽभवद्भृशम्।
पुनर्द्रष्टु नरेन्द्र त प्रियशिष्य गुरु प्रिय ॥

निष्पीडित क्लिन्नवस्त्रमिव तस्य मनोऽभवत्।
[1] एव षण्मासपर्यन्त व्यथाभूत्तस्य तादृशी॥

निषण्णो विजनेदेशे विललाप सदु खित ।
एकमासानन्तर च नरेन्द्र पुनराययौ॥

संनिधि रामकृष्णस्य वसतो दक्षिणेश्वरे।
त दृष्ट्वा परमप्रीत स्वपर्यंके निवेश्य च॥

रामकृष्णो दक्षिणाङ्घ्रि निदधौ तस्य वक्षसि।
ततो नरेन्द्रो बाह्यार्थ स्मृति सत्यज्य सत्वरम्॥

[2] जगच्चराचर शून्ये लीयमान तदैक्षत।
"गृहे मे स्वजना सति किंकरोति भवान्मयि॥"

इति चोवाच संभ्रात स्तत्कृतेन भयार्दित.।
"अधुनैतावदेवालं काले विन्दसि यत्परम्॥"

इत्युक्त्वा रामकृष्णस्त जगादैका कथामपि।
"कश्चित्पिशाच सवृत्तो मरणानन्तर नर ॥

अन्यं सहचर कचिदन्विष्यन विचचार च।
ज्ञात्वा कचिन्मृतं तत्र गच्छति स्म समुत्सुक ॥

विगतासुरय दिष्टया पिशाचो वा भवत्विति।
बभूव प्रेततामुक्त सोपि पुण्येन यो मृत ॥

पिशाचोऽय निराशोऽभूद् भृश सहृदलाभत ।
तादृशीयं ममावस्था निष्पन्ना वत्स साप्रतम्॥

भवादृशेन सुहृदा सांगत्य वाञ्छतो मम।
चिराद् भवानुपनत कित्वेव भाषसे खलु॥

गृहे मे स्वजना सति कि करोषि मयीति च।"
एव गुरु. क्षणार्धेन शिष्यानुन्नतभूमिकाः॥

---

1 *नरेन्द्रसमागामात् पूर्वमप्येवमासीदिति तथोक्तम्।*
कदा प्रियतमा शिष्या आगच्छेयुरिति पूर्वमेवोक्तम्।

2 *भगवद्गीता XI*

आसीत्प्रापयितु दक्षो महामहिमशेवधि ।
"नैवाद्यवशमेष्यामि तस्ये" ति कृतनिश्चय ॥

रामकृष्णान्तिक प्राप नरेन्द्र पुनरेव च।
यदुमल्लिकस्य वने विहरन् गुरुणा सह ॥

तत्स्पृष्टो विजहो राज्ञामन्यथाभूतनिश्चय ।
पुनश्चाप्तबहि प्रज्ञो नरेन्द्रो भृशविस्मित ॥

तं कराब्जेनामृशन्त वक्षोऽपश्यद्गुरु तत ।
आत्मीयानि रहस्यानि तदान्तर्मुखचेतस. ॥

रामकृष्णो नरेन्द्रस्य विज्ञायैवमुदाहरत्।
श्रीरामकृष्ण "अतीतजन्मवृत्तान्त प्रमाण चायुषोऽधुना ॥

पूर्वमेवमया ज्ञानं केवल तु दृढीकृतम्।
परतु विषया सर्वे निगूढास्ते विशेषत. ॥

जह्यात्स्वरूपं ज्ञात्वाऽय शरीर योगमार्गत ।
साधारणो जनो नाय ध्यानसिद्धो महाऋषि. ॥

दृश्य नरेन्द्रविषये मयादर्शि महाद्भुतम्।
काशीक्षेत्राद्दिव्यतेज. कालीघट्टमुपागतम् ॥

दृष्ट्वाऽहं परमप्रीत· सफल प्रार्थनोऽ भवम्।
प्रियो मे बालक शीघ्रमागच्छेदिति निश्चित· ॥

अपि चाह समाधिस्थो दृष्टवान् पुनरेकदा।
आत्मानगुत्पतन्त हि तेजोमार्गेण गामिनम् ॥

अतीत्य चन्द्रतारार्कमण्डलानि निरामयम्।
स्थूलसूक्ष्मजगद्भिन्नं देवलोकाच्च यत्परम् ॥

प्रकाशरूपावरणाद्भिन्न लोक मनुत्तमम्।
सप्तर्षयस्तत्र दृष्टा प्रदेशस्तत्र कश्चन ॥

जग्राह च शिशोरूप मृषे कस्यचिदन्तिके।
स गत्वा तमुवाचेद शिशुर्मधुरया गिरा ॥

यास्यामि मध्यम लोक मागन्तव्य त्वयापि च।
अनुजज्ञौ महर्षिस्तं मौनेनामलया दृशा ॥

ततस्तेजोश एकोऽस्य विनिर्गत्य शरीरत ।
समाधिस्थेन च मया विशन् दृष्टोऽविनीतलम् ॥

महर्षिश्च सएवाय नरेन्द्र समजायत ।
अश स एक एवाल कर्तुं भुविमहोद्यमान् ॥

तेजस्तस्य समग्रं तु लोकोऽय साढुमक्षम ।"
नरेन्द्रस्य रामकृष्ण पादस्पर्शादनन्तरम ॥

जातादनुभवात्पश्चा ज्जीवित परिवर्तितम् ।
"उन्मत्तो न भवत्येष स्थिरधी रात्मवित्तम ॥"

इति धी रस्य सजाता नि सदेहा गुरु प्रति ।
परतु रामकृष्ण स परीक्ष्यैव गृहीतवान् ॥ [1]

प्रज्ञया निकषेणेव काञ्चन गुणदोषवित ।
नरेन्द्रस्त्वर्थवैमुख्य देशिकस्य परीक्षितुम् ॥

न्यक्षिपन्नाणक कचित्तल्पस्याधो ह्यलक्षितम् ।
अजानन्नुपविष्टोऽस्मिन् नाणकस्पर्शतस्तदा ॥ [2]

उत्पपात गुरुस्तल्पात्संदष्ट इव भोगिना ।
न केवल चित्तमात्र शरीर चेन्द्रियाण्यपि ॥

शिक्षितानि तथा तेन वैराग्य विषयेषु तत ।
[3] केशवाद्विजयाद्वापि विशिष्टो हि भवानिति ॥

प्रशसितो हि गुरुणा नरेन्द्र प्रत्युवाच तम् ।
"यदीदृश प्रेमभर स्तवास्मिन् मयि बालके ॥

सपत्स्यसे त्वमपरस्तपस्वी भरतो जड ।"
श्रुत्वा तद् व्याकुलो भूत्वा गत्वा काल्यै न्यवेदयत् ॥

तया चाश्वासितो लेभे प्रकृति मुग्धमानस ।
"किमिच्छसि ग्रहीतु मे विविधा सिद्धिसंपद ॥"

इति प्रलोभितस्तेन नरेन्द्र प्रत्युवाच तम् ।
"किता उपकरिष्यन्ति परमार्थोपलब्धये ॥

---

1 *गुरुत्वेन स्वीचकार।*
2 *रा जी p 314*
3 *केशवचन्द्र सेन, विजयकृष्णगोस्वामीच।*

नो चेत्ता नैव वाञ्छामि कदाप्यल्पप्रयोजना ।
यत [1] सुन्दर न तत् साधु यत् साधु तदसुन्दरम् ॥

सौन्दर्यमपि साधुत्व द्वयमेकत्र दुर्लभम् ।"
गुरु परमसतुष्ट शिष्यस्य वचसाभवत् ॥

नाभाषते स्म शिष्य स दिवसान् सुबहूनपि ।
आयात्येव तथाप्येष नरेन्द्रो गुरुसनिधिम् ॥

तत "किमर्थमायासि नत्वमाभाष्यसे मया ।"
इत्युक्तोगुरुणा धीरो "नागच्छाम्यभिभाषितुम् ॥

कितु प्रेम्णा दिदृक्षुस्त्वा" मित्यय त समादधौ ।
विद्यार्थिन कलाशाला गतस्योपाधिलब्धये ॥ [2]

नरेन्द्रस्यैकविशेब्दे वियोग समभूत्पितु ।
अनूह्यो विश्वनाथाख्याद हृद्रोग व्यथिताद् हठात् ॥

तदारभ्यनरेद्रश्च ऋणभारनिपीडित ।
कुटुम्बभार मवहद् दारिद्र्येणापि कर्शित ॥

जीविकार्थं कृता यत्नाश्चासन् सर्वेऽपि निष्फला ।
अनुभूतानिमान् क्लेशन् गुरवे स न्येदयत् ॥

"न जातु लौकिकी सपत्तव भक्तस्य भाविनी ।
इत्येवोवाच सा देवी कालिका भवतारिणी ॥

त्वदर्थं प्रार्थिता वत्स त्वयापि प्रार्थ्यता पुन ।"
इत्युक्तो गुरुदेवेन स गत्वा कालिकान्तिकम् ॥

नरेन्द्र प्रार्थयामास ज्ञान वैराग्यमेव च ।
न त्वैहिके भोगभाग्ये न वैश्वर्य विनश्वरम् ॥ 1901

"किमपेक्ष्य फल काली वद मे प्रार्थता त्वया ।"
इति पृष्ट स गुरुणा लज्जयावनतोऽवदत् ॥

"भगवस्तवलीलेय यन्नार्थो [3] याचितो मया ।"
ततो गुरु· प्रिय शिष्यं सानुकाम्पोऽब्रवीदिदम् ॥

---

1 *आपाततो मनस आकर्षकम् ।*

2 *B A Degree*

3 *वित्तादि*

"इत पर न ते क्लेशो गृहनिर्वहणं भवेत।
किमह न करिष्यामि नरेन्द्र तव कारणात्॥

भिक्षामपि चरिष्यामि प्रियात् प्रियतरोऽसि मे।"
"शिष्यस्त नास्तिको जात सप्रती"ति जनश्रुतिम॥

निराचकार ता तस्मिन दृढप्रत्ययवान्गुरु।
"दु स्थिति नेऽपनेष्यामि यदि मा स्वीकरिष्यसि॥"

इत्युक्तोपि नरेन्द्रोय स्त्रिया धनिकया कया।
"मतिमेता विहायाल्पा भजस्व परमेश्वरम॥"

इति ता हितवाक्येन बोधयामास सयमी।
ऋजुकस्य दरिद्रस्य दर्बलस्यात्रभूतले॥

जीविका दुर्भरमिति तस्याभू द्विदित तदा।
सदद्वैतात्मनिरतो गुरुस्तोतापुरिर्यथा॥

शिक्षित कालिकाभक्ति, नरेन्द्रोपि तथैव च।
गुरुणा शिक्षितश्चासी ऽद्वैतानुभव प्रति॥

जीवब्रह्मैक्य सिद्धान्ते विश्वासो यस्य नाभवत्।
युक्तिज्ञस्य नरेन्द्रस्य भेददृष्टचनुरोधिन॥

"घटो ब्रह्म पटो ब्रह्म कथ भवितुमर्हति।"
इति प्रगल्भं वदतो निशम्य च गुरुर्वच॥

वत्स त्व कि ब्रवीषीति वदन् पस्पर्श त तदा।
ततोऽगमन्नरेन्द्रोपि काचिदद्वैतभूमिकाम॥

यत्र स्थितो ददर्शैव सर्व ब्रह्ममय जगत्।
स्वाप्निक ब्रह्मणो भिन्न यत्किंचिद् दृष्टिगोचरम्॥

सत्यस्य सत्ये ह्यद्वैतं ततोऽस्य प्रत्ययोऽभवत।
परीक्ष्य च तथायोन्य परितुष्टौ बभूवतु॥

समानशीलसपन्नौ गुरुशिष्यौ सचेतसौ।
तत्त्वत कालिकारूपौ विभक्तौ देहमात्रत॥

विभिन्नौ काष्ठमात्रेण गङ्गा भागाविव स्थिता।
भिषग्वर महेन्द्र च नरेन्द्रस्य प्रशासिनम॥

उवाच परमो हस "स्तत्कृते सभवाम्यहम्।
अद्वैत गोस्वामिकृते श्रीचैतन्यविभुर्यथा॥

चत्वारि वाथवा त्रीणि दिनानि ध्यानतत्पर ।
बुभूषुर्गुरुदेवेन नरेन्द्र प्रतिबोधित ॥

अयि मुग्ध विजानीहि ततोऽप्यस्ति महात्तरा।
अनुभूतिर्यत्र सर्वं भाति ब्रह्ममय जगत्॥

गीयमानेषु गीतेषु या त्वया चापि कीर्त्यते।"
तत कदाचिदात्मान मज्जन्त दिव्यतेजसि॥

अपारे हसवद्व्योम्नि चरन्त मीनवज्जले।
निर्विकल्पसमाधिस्थो गलितद्वैतभावन॥

दृष्ट्वा नरेन्द्रो देहस्य ममासीत्किमिति ब्रुवन्।
अपरेण सतीर्थ्येन न्यवेदि गुरवे भयात्॥

"किमप्यासी न्नरेन्द्रस्य जानातु भगवा"निति।
श्रुत्वा तत् परमो हसो "भवत्वेष तथैव हि॥

निरबध्नात्तदर्थं मा नरेन्द्र" इति चाभ्यधात्।
नरेन्द्रमपि चोवाच "सर्वं ते दर्शित खलु॥

कृपया कालिकादेव्या किन्तु तत्पिहित भवेत्।
तालिका (Key) बद्धपेटीव करे स्यात् तालिका तु मे॥

यदा समाप्यते कार्यं यत्कृते त्वमिहागत।
तदा ते वशमायान्ति सपदो यास्त्वयार्जिता॥"

शक्तिपात

महासमाधित पूर्वं दिवसत्रितयाद गुरु।
किचिद्वस्तूपहारार्थं हस्तदेय मिव प्रियम्॥

नरेन्द्रमुपवेश्याग्रे शक्तिपात [1] चकार च।
यतो दृष्टा नरेन्द्रेण विसज्ञेन तटिन्निभा॥

शक्तिपात (कुण्डलिनीमहायोग) 5th Edn Rishikesh, 1987, लेखक विष्णुतीर्थ
I-2 शक्तिर्ह्यात्मिन श्रुते I-3 चितिर्वा I-6 सैवकुण्डलिनी
I-7 तत्पात शिष्येषु I-8 तत शक्त्युद्बोधनम्।

सूक्ष्मा शक्तितरङ्गालिर्विशन्ती स्वा तनु [1] गुरो ॥
[2] गुरुश्च लब्धसञ्ज्ञेन साश्रुनेत्रो वदन्निति ॥

"दत्त ते मम सर्वस्व संवृत्तोहमकिंचन ।
त्वया कर्म महत् कार्य मनया शक्तिसपदा ॥

इतश्च निर्गमो लोका त्पश्चादेव भवेत्तव ।"
यथारामो हनुमता यथा कृष्णो नरेण च ॥

रामकृष्णो नरेन्द्रेण निमित्तेन गुरूत्तम ।
अधर्म निग्रह चक्रे पुनर्धर्मस्य सग्रहम् ॥

एकदागत्य, तिष्ठन्त वीक्ष्य शिष्य ससशयम् ।
गुरुर्विश्वासदाढर्चाय व्याधिना बाधितोऽ पि सन् ॥

"रामोऽपि च यएवासीत्कृष्णश्चापि य एवहि ।
स एवाद्य शरीरेऽस्मिन् रामकृष्णो न सशय· ॥

यथावदेव न पुन· केवलाद्वैतदृष्टित ।"
इति प्रत्याययत् प्रीत्या विवेकानन्दमुत्सुकम् ॥

त्रिनवति तमे वर्षे नवद्वयशताधिके ।
जगामामरिका देश विवेकानन्द योगिराट ॥

षिकागो नगरे तत्र विश्वधर्मसभागणे । [3]
सर्वान्समोहयामास निजप्रवचनेन स ॥

सारं समस्त धर्मणा सामरस्यपरिष्कृतम् ।
सनातन भारतीय धर्ममुद्दिश्य बोधयन् ॥

अन्येष्वपि च देशेषु वेदान्तार्थानुदीरयन् ।
अधुनातनबुद्धीना सुबोधान् सुलभानपि ॥

प्रसादशान्तिसुखदाननुष्ठान प्रमाणितान् ।
यदर्थं स्थापिता सन्ति रामकृष्णमठा अपि ॥

पक्वदोषेषु सुव्यक्ता पतितेत्युपचयति - शक्तिरहस्यम् ।
II-2 ब्रह्मनिष्ठो वेधक शक्तिपातक्षमश्च गुरु । II-11 दीक्षात्रिविधा
II-12 दर्शनाद भाषणात् स्पर्शाच्च II-13 मानस्यपीति केचित् ।
II-31 वर्णाना न नियम ।

1 *गुरोर्गुरुदेवादिति पञ्चमी ।*

2 *गुरुश्चद्दृष्ट इत्यन्वय लिगविपरिणामेन ।*

3 *Parliament of Religions*

तथैव श्रीरामकृष्ण सेवा सघाश्च (Missions) विश्रुता ।
विद्यालयाश्च बालाना बालिकानामनेकश ॥

त्रेतायाकिल वानरश्च हनुमान् यो द्वापरे वा नरो
यस्येवाजनि सोधुना प्रियतमो वत्सो नरेन्द्र कलौ।

श्रुत्यन्तार्थरहस्यबोधकवच पीयूषदानोचितो
देवं त शरण भजामि सतत श्रीरामकृष्णाकृतिम् ॥

रामो यश्चबभूव नन्दतनयश्चास पुरा तत्त्वत
सोह सप्रति रामकृष्णतनुभाइ नाद्वैतदृष्टचैव हि।
इत्याश्वासमदान्मुमूर्षुरपि योऽन्तेवासिने शङ्किने
देवं त शरण गतोऽस्मि सतत श्रीरामकृष्णात्मकम् ॥

ब्रह्मास्त्र प्रयुयोज य किल नरेन्द्राकारमस्या भुवो
ग्रासायोद्यत नास्तिकोद्यम महारक्षो विनाशावहम्।

धर्मस्थापनमेव यस्य चरित लीलावताराकृते -
स्तं देव शरण भजामि सतत श्रीरामकृष्णाभिधम् ॥

सिद्धिश्चापि चकास्ति काचन समाधेर्निर्विकल्पात् परा
ब्रह्मैवेदमनन्तविश्वमिति सर्वात्मानुभूतिप्रदा।
इत्युक्त्वोपदिदेश वृत्सलतया शिष्याय यस्ता गुरू-
स्त हस परम भजामि शरण श्रीरामकृष्णभिधम् ॥

ब्रह्मानन्द (राखाल)

राखाल चन्द्रघोषाख्यो ब्रह्मानन्दश्च योऽभवत्।
समीप रामकृष्णस्य नरेन्द्रात्पूर्वमाययौ॥

उभौ नरेन्द्रराखालौ ज्ञातपूर्वौ परस्परम्।
उदात्तशीलसपन्नौ सखायौ सहपाठिनौ॥

मूलस्तम्भौ रामकृष्णसस्थासौधस्य भाविन ।
शरच्चन्द्रनिभाकीर्ति र्ययोर्लोके विराजते॥

''सहाय बालक देहि कचिन्मे शुद्धवर्तनम्।''
इति सप्रार्थयन्नासीद्रामकृष्णो महेश्वरीम॥

दत्तोहि रामकृष्णाय कस्मिश्चिद्दिव्यदर्शने।
शिशु प्रार्थितया काल्या ''पुत्रोऽय ते भव''त्विति॥

ततोऽग विह्वल-प्राह "कथ मे पुत्र"इत्यपि ।
"तवासौ मानस पुत्रो न ग्री कार्या कथ चन ।।"

इत्यप्याश्वसितो दव्या स्वस्थचित्तोऽभवद्गुरु ।
अयमेवहि राखाल शिशु काल्या प्रसादित ।।

गृहस्थो जातपुत्रोपि गखालो गुर्वनुग्रहात् ।
त्यक्तससारबन्ध सन् समाध्यनुभवानगात् ।।

उवाच पितर पश्चाद् गुरुदेवे दिव गते ।
आगत स्वगृह नेतु "मत्रैवाह परं सुखी ।।

विस्मरन्तु भवन्तो मा मह वो विस्मरामि च ।"
यतो ह्यपुत्रस्यगतिर्नास्तीति सुतमिच्छति ।।

[1] गेहिके कश्चिदासक्तस्तथान्य पारलौकिके ।
न सुता भ्युदयाकांक्षी लोक स्वार्थपरायण ।।

स्वप्रारब्ध वशादेवदेहिना जीविकाऽथवा ।
परमप्रीति पात्र च गुरुदेवस्य सेऽभवत् ।।

आरोपितो निजस्कन्ध संप्रीत्या येन बालक ।
खेलति स्म सविस्रभ जनकेनेव पुत्रक ।।

अनुरूपोऽनुरूपस्य गुरो शिष्य उदारधी ।
विग्रहाराधन जात बालक्रीडास्य शैशवे ।।

विवाह बालशिष्याणा स गुरुर्नानुमन्यते ।
अथ ते परिणीताश्चेत् ब्रह्मचर्यमुपादिशत् ।।

प्रायेण तेषा भगवत्साक्षात्कारस्य साधनम् ।
साधनासमये भक्तो वनितासगति त्यजेत् ।।

द्वादशाब्दमित काल ब्रह्मचर्य चरेद्यदि ।
गृहिण स्साधकस्यापि मेधानाडी प्रबोधिता ।।

भवेदपूर्वधिषणा दायिनी धैर्यरेतस ।
परमात्मस्वरूपस्य या नून दर्पणायते ।।

राखालस्य कदावापि दृष्ट्वास्य मलिन गुरु ।
असत्यवचन ज्ञात्वा तद्धेतुमिति सोऽवदत् ।।

---

1 *The Gospel I p 192*

"नासत्य वचन किंचिद् वक्तव्य ते कदाचन।
जानीहि सत्यनिष्ठैव तपा मुख्य भवेदिह ॥

मया पूजाविधानेषु कुसुमाञ्जलिना सह।
वेदशास्त्र पुराणानि पण्डितेभ्य श्रुतानि च ॥

शोच चापि तथा ऽशोच ज्ञानाज्ञाने शुभाशुभे।
पदारविन्दयो काल्या सर्वमव समर्पितम् ॥

वाञ्छता केवला भक्ति न च वक्तुमपारयम्।
सत्यासत्येपि ते देवि ददामि न ममेत्यहम् ॥

सत्यनिष्ठाविधेयानि बभूबु करणानि मे।
यच्च किंचिद् वचो दत्वा प्रमादाद्विस्मरामि चेत् ॥

तदा मनश्च कायश्च न स्तश्छन्दानुवर्तिनौ।"
चारित्रवर्धिनी ज्ञानयश पुण्यप्रदायिनी ॥

कर्कशा सत्यनिष्ठास्य हरिश्चन्द्रादिजीवितम।
स्मारयेदनुसर्तव्या सर्वैरपि च मानवे ॥

बाबुराम (प्रेमानन्द)

तपोध्याननिमग्नोऽभूद् बाबुरामाभिधो बुध।
प्रेमानन्द इति ख्यात पश्चात् सन्यासकारणात् ॥

आष्टमाद्वत्सरादेव योध्यात्मानुभवोत्सुक।
य चान्याश्च निजान् शिष्यान् [1] केनचित्प्रेरितान् गुरु ॥

सिद्धीना प्राप्तिविषये बोधयामास वत्सल।
"भवद्भ्य एव दीयेत सिद्धिसपन्मयार्जिता ॥

नैव कार्यो विचारोत्र मा च भूद्भेदभावना।
याचकत्व तु संत्याज्य युष्माभि"रिति सादरम् ॥

नित्यनिरञ्जन (निरञ्जनानन्द)

भवसि त्व कदा वत्स दैवान्वेषणतत्पर।
एव निरञ्जन वीक्ष्य गुरुश्चिन्तापरोऽभवत् ॥

धीरोद्धत स्वभावेन दृढकायो निरञ्जन।
नेतव्य प्रशम कचिदिति बुध्द्या गुरुस्तत ॥

---

1 *प्रतापचन्द्रहज्रा इत्यनेन।*

एकदा श्रीरामकृष्णो नदीं प्रवहणे तरन्।
आत्मान निन्दतोऽन्याश्च "वाहिन्या पातयामि व ॥"

तर्जयन्तमिति क्रोधाद् गुरुनिन्दाऽसह पुन ।
"कोपो हि सर्वथात्याज्यस्त्वादृशेन सताऽनघ ॥"

इति प्रबोधयामास शिष्यस्य हितकाङ्क्षया।
निरञ्जनानन्दनामा शिष्योऽय प्रथितोऽभवत् ॥

योगानन्द (योगीन्द्रनाथ राय)

स्थित्वा तदा तदैकान्ते वीक्षमाणो विहायसम्।
आत्मान मन्यते रूप कस्याप्युडुगणेषु य ॥

योगीन्द्र स मृदुस्वान्तस्तस्मिन् धार्ष्ट्यमपेक्षितम्।
इतिमत्वावदत्त च देशिक "कचिदागतम् ॥

कीटकं प्रहरस्वे"ति सोऽकरोन्न गुरोर्वच ।
सेहेऽन्यदा गुरोर्निन्दा क्रियमाणा परैस्तथा ॥

"क्षान्ता त्वया गुरोर्निन्दा मारितो नापि कीटक ।
गुरुवागननुष्ठाने शिरसश्छेदनं स्मृतम् ॥"

इति त बोधयामास शिष्य गुरुशिरोमणि ।
शरावमसमीचीन योगीन्द्रक्रीतमेकदा ॥

गुरुदेवोवदद् दृष्ट्वा "वस्तु ग्राह्य परीक्ष्य हि।
वणिक्करोति वाणिज्यं न चाध्यात्मिकसाधनाम् ॥

ततो योगीन्द्रनाथोऽय परिणीतोह्यनिच्छया।
द्रष्टुंनैच्छद् गुरु व्रीडाविलक्षहृदयश्चिरम् ॥

तज्ज्ञात्वा शिष्यमाहूय गुरुरेवमसान्त्वयत।
बहवोऽपि विवाहास्त्वा न विकुर्यु कथचन ॥

दारानप्यानयस्वेह कापि हानिर्न ते भवेत्।
अनुग्रहान्ममैतस्य शक्नोषि द्रष्टुमीश्वरम् ॥

सदारो वाप्यदारो वा नात्र कार्या विचारणा।"
गुरुवाक्येन योगीन्द्रो बभूव च्छिन्नसशय ॥

कदा चनापवरके चादृष्ट्वा शयित गुरुम्।
भार्यान्तिक गतो वेति योगीन्द्र सशय ययौ ॥

वाद्यमन्दिरमुद्दिश्य, गत्वा पञ्चवटीदिश ।
आगच्छन्त च त वीक्ष्य लज्जयाऽवनतोऽभवत् ॥

परीक्षितस्तु शिष्येण सप्रीतश्चाभवद्गुरु ।
अय योगीन्द्रनाथोहि योगानन्दोऽभवत्तत ॥

नित्यगोपाल.

तथैव नित्यगोपालो बालभक्तो बभूव च ।
यस्मिन् परमहसत्व गुरुणैव हि लक्षितम् ॥

अक्षयकुमारसेन

सेनोऽक्षय कुमारश्च कृतवान् वगभाषया ।
श्रीराम कृष्ण चरितं प्रसिद्ध काव्यमुज्ज्वलम् ॥

प्राप्तमन्त्रोपदेश सन् गुरुदेवान्महोदय ।

कालीप्रसाद

कालीप्रसादचन्द्रश्च बडिशेनाददज्झषान् ॥

"न भवेज्जीवहिसेय नित्यत्वादखिलात्मनाम् ।"
इतिब्रुवश्च "सप्राप्ते भगवद्दर्शने नर ॥

न हिस्यादिति युक्तचैव गुरुणा वारितोऽभवत् ।"

बलराम

"रसद्दार" पदं प्राप बलरामवसुर्गही ॥

हन्या वा मशकान् नेति सशयेन कदाचन
गत्वाऽथ बलरामोऽय गुरुं मत्कुणघातिनम् ॥

प्रसमीक्ष्यास्तसन्देह स्वगृह पुनराययौ ।
जहौ पापभय चात्र तेन दृष्टेन कर्मणा ॥ 2001

गृहस्था.

रामचन्द्र.

गुरुरूचे रामचन्द्र "गृहस्थाश्रम एव हि ।
दुर्गवद्रक्षति नर कामाद्यरि समूहत ॥

त्रिपाद यदि चित्त ते भगवत्यर्पित तत ।
ससारबन्ध निर्मोक्षयोग्यता संभवेद् ध्रुवम् ॥"

महेन्द्रनाथ

महेन्द्रनाथगुप्त च गुरुरेव मुपादिशत् ।
"रिक्तहस्तेन मा द्रष्टु नागन्तव्य कदापि ते ॥

आनयस्वापहार तु फल वा पुष्पमेव वा ।
उभो सनिहितावावा पुत्रकल्पो भवान्मम ॥"

"न विवाद करोमी"ति तस्माद वादपियाद गुरु ।
जग्राह वचन शिष्या न्महेन्द्राख्यान्महाशयात ॥

नागमहाशय

दुर्गाचिरणनाग च गृहस्थमिदमब्रवीत् ।
गुरुदेवो "न ते कार्य साधुसदर्शनिन तु ॥

आयान्ति साधवो द्रष्टु त्वामेव जनकोपमम् ।"
गुरुणाचोरसि स्पृष्टे नागेऽस्मिन दक्षिणाघ्रिणा ॥

बभूवदर्शन तस्य दिव्यमानन्दनिर्भग्म् ।
गुरुदेवे रामकृष्णे रोहिणी (Cancer) व्याधिपीडिते ॥

नागोऽयमेकदागत्य चादित्सु व्याधिमात्मनि ।
"व्रण तऽपनयामी"ति सहसा तमुपासरत ॥

"क्षम त्वा तत्र नेच्छी"ति गुरुणा रा [illegible] वारित ।

गिरीशचन्द

गिरीशचन्द्र घोषश्च प्रतिभावान्नटोत्तम ॥

[illegible] व्यसनी किंतु गुरुपात [illegible] ।
"[illegible] ॥

[illegible] 'नेऽशक्नोमि वाच दात' [illegible]मति ब्रुवन ।
"[illegible] पश्यछेति" गुरूक्तित ॥

"नधे"त्युक्त्वाऽभवत साधुर्दत्तभारा मुदा गुरा ।
गि[illegible]नाभिनीतानि रामकृष्णो [illegible] ॥

प[illegible] [illegible]कथा नाटकानि कुतूहलो ।
गिरी[illegible] च शकामीद गुरुस्तो त्वा पुमानिति ॥

अ[illegible] [illegible]स्या दभिव्यक्त तदा गुरो ।
कथ [illegible] [illegible] वत्स ब्रूहिति गुरुणा दित ॥

"वाल्मीकिव्यासमुख्या य नाल वर्णयितु विभुम ।
क्षम कि तमह स्तोतु" मित्येव गिरिशोवदत ॥

काषायाबरसभार तस्मैगुरुरकल्पयत् ।
तदानुपस्थितायापि यतिदीक्षा विधानवित् ॥

सन्यासदानसमये शिष्याणा योग्यतावताम ।
सुरेन्द्र
अपरश्च रसद्दार काल्या देव्या नियोजित ॥

सुरेन्द्रोपि तथा मद्य व्यसनी परिवर्तित ।
वदता गुरुदेवेन "न मद्य त्यज्यते यदि ॥

तर्हि काल्यै निवेद्यात स्तत्प्रसाद पिबे" ति च ।
महिला
स्त्रियमन्यतमामेव मन्यन्ते स्म तमङ्गना ॥

न चक्रु परमेहसे तस्मिन् पुरुषताधियम् ।
दर्शनार्थ गुरोस्तस्य दूरतोपि समाययु ॥

अत पुरङ्गनाश्चापि विहाय नियमान् स्वकान् ।
भक्ष्योपहारानादाय द्रष्टुकामा स्तमादरात् ॥

ब्रह्मानन्दनरेन्द्रमुख्यविबुधानन्तेवसद्योगिनो
भेग्व्यादि गुरून महामहिमसपन्नान समीक्ष्यैव च ।
ज्ञातु शनयमनन्तमद्भुततम कि चिद्यदीय मह-
स्त देव शरण गतोऽस्मि सतत श्रीरामकृष्णात्मकम् ॥

7. यथधिकारमुपदेशवैचित्री ।

योगीन्द्रमाहिती देव्ये [1] मन्त्र दत्वाऽवदद्गुरु ।
विचित्रा सिद्धयस्तस्या भवेयुरिति सादरम् ॥

शारदाया सनिहिता साऽभवत [2] सुन्दरीयथा ।
"गोरीमा" स्थापयामास शारदाबालिकाश्रमम् ॥

यत्ते प्रियतम तत्र दैवधी क्रियता मिति ।
उपादिशद्गुरु पीत्या मणिलालमल्लिकात्मजाम ॥

दिव्यानुभवमागोद सापि तस्योपदेशत ।
वयोवृद्धाऽयोग्मणी कृष्णोपासनतत्परा ॥

---

[1] योगीन्-मा ।
[2] गोलाप-मा (गोलामसुन्दरी)

त्रिशद्वर्ष मित कालमुनुष्ठानपरायणा।
चतुरशीति तमाब्दे नवद्वयशताधिके।।

रामकृष्णान्तिक प्राप्ता तेनाऽकृष्टाभवत्तत ।
तयाऽनीतेषु खाद्येषु प्रीति गुरुरदर्शयत् ।।

कदाचन जप कृत्वा चेष्टदैवाय तत् फलम्।
उद्युक्तया तयादातु पार्श्वे गुरुरदृश्यत ।।

बालकृष्णाकृतिधरो नवनीताभिलाषुक ।
स्मारयेद्रामकृष्णस्य रामलाल कथामिदम् ।।

नरेन्द्र वा घोरमणी देवीं वाप्यनुमोदते।
आहारविषये कोपि नियमो नैतयोरिति ।।

सुबोध चन्द्रस्य हरिप्रसन्नस्येव बालयो ।
दीक्षा ददाति केषाचि ज्जिह्वाग्रे लेखनाद्गुरु ।।

वीक्षणाद्वाथसस्पर्शात् कुण्डलिन्या प्रबोधनात्।
तथामन्त्रोपदेशाद्वा शिष्याणामानुरूप्यत ।।

ददावाध्यात्मिकी शक्ति विज्ञानानन्दयोगिने।
मल्लक्रीडाविनोदे च येन कुड्ये निपातित ।।

ध्यानेनाधिगतास्तेन स्वभावा शिष्यचेतसाम्।
"किदृशी ते मद्विषये भावनास्ति वदेति च ।।

पृच्छयापि विजानाति तत्प्रवृत्तीर्विशेषत ।
तमिष्टदैवतं कश्चिदवतार च कश्चन ।।

ब्रूयाद्गुरु रामकृष्ण यथामति यथारुचि।
अगाधोऽप्याभिगम्योऽसौ शिष्याणामभवत्प्रिय ।।

प्रायेण जल्पन् खेलश्च हसन परिहसन् गुरु ।
[1] एव स्वभावानुगुण तेन बोधो विधीयते ।।

नियमाविधुर किन्तु प्रेमातिशयबन्धुर।"

बोधप्रकार

'परिताप. कामजय कापटचपरिवर्जनम् ।।

1 वक्ष्यमाणप्रकारेण।

साधारण हि सर्वेषा साक्षात्कारस्य साधनम् ।'
"पृष्ठत सेवयेदर्क जठरेण हुताशनम् ॥

स्वामिन सर्वभावेन परलोकममायया ।"
"अपि चेत्सुदुराचारो भजते मामनन्यभाक् ॥

साधुरेव स मन्तव्य सम्यग्व्यवसितो हि स ।"
इति चाप्तोक्तमार्गेण सर्वेषामास्ति योग्यता ॥

पापिनामथ वेश्याना भगवत्प्राप्ति कांक्षया ।
परितापभर स्याच्चेद् भगवत्कीर्तने रुचि ॥

[1] तृष्णा चेद्धिकारितास्ति यदि नो तृष्णा तत साकुत
काम सत्स्वपि योग्यता परिकरेष्वन्येषु वर्णादिषु ।
मिथ्याहकृति गर्न्भानजनकै र्जन्मावभगाक्षमै
कि वर्णाभिजनाश्रमै र्न परमार्थोपायता तेषु चेत् ॥

भासते मायया बद्ध आत्मैव खलु जीववत् ।
स एव मायया मुक्त पुनश्च भवतीश्वर ॥

विज्ञेयो भगवान् प्राज्ञैरन्ये च विषयास्तत ।
ससारिणा न प्रशस्ता तथाप्यद्वैतसाधना ॥

क्लेशोऽधिकतरस्तेषामद्वैतासक्तचेतसाम् ।
गरीयसी भक्तिरेव नृणा सकीर्तनात्मिका ॥

विश्वमानवसेवैव क्रियते शिवसेवया ।
मनसा कर्मणा वाचा सतताभ्यस्तया बुधै ॥

न द्रुह्येदात्मविषये [2] स्वभावानुगुण चरेत् ।
तथैव सिद्धिमाप्नोति मोक्षमार्गेऽपि साधक ॥"

परिताप । तीव्रसवेगाना मासन्न योगसूत्रम् 1 – 21
One should be sincere to one's thoughts
श्रीरामकृष्णबोधामृतम् (तेलुगु) p 156, 171

उपमा रामकृष्णस्य [1]

श्रीरामकृष्णस्य सहृदयत्वम्

यत्प्रयोजनमुद्दिश्य सादृश्यमुपपद्यते।
साक्षात्तदनुभूयैव रामकृष्णोऽभिवर्णयेत् ॥

मोदेन मेलयन् बोधमौषध मधुना यथा।
चमत्कार च जनयन कवीनामपि विस्मयम् ॥

कदापि जन्तुशालाया (Zoo) सिहमालोक्य कौतुकात्।
समाधिमारुरोहाय स्मारित सिहवाहिनीम् ॥

"कारण" मद्य-पर्याय श्रुत्वा विश्वस्य मातरम्।
स सस्मार झटित्येव कालिका सृष्टिकारणम् ॥

एकदाय पुरावस्तु शालाया (Museum) मस्थिपञ्जरम्।
अवलोक्य शिलीभूतमवदज्जातविस्मय ॥

"हन्तससर्ग महिमा नरस्य भवतीदृश।
साधुसगे भवेत्साधु रसाधुर्दुर्जनाश्रयात् ॥

यथायमस्थिनिचय शिलीभूतो धराश्रयात्।
अविभाज्यो भवेत्सङ्गोयथैक्यं क्षीरनीरयो ॥

गत्वा छायाचित्रशाला (Studio) रसायन [2] परिष्कृतम्।
छायाचित्रपट वीक्ष्य तत शिष्यानबोधयत् ॥"

जिज्ञासूनां पर तत्व तितीर्षूणां भवाम्बुधिम्।
चित्त चेद् भगवद्भक्तिरसायन परिष्कृतम् ॥

स्थिरा प्रकटिता तत्र भवेद् भगवदाकृति।
आध्यात्मिका प्रबोधाश्च भवेयुर्मुद्रिता इति ॥

एवमादीनाधुनिकान् दृष्टान्तान् रुचिरान् गुरु।
प्रसिद्धान् दर्शयिद्वेद्य विशदीकरणाय च ॥

उपमानानि

आणि — दैवचिन्ता यथा साधौ न तथा लौकिके नरे।
मृत्तिकान्तर्विशत्याणि र्यथैव न तथाश्मनि ॥

---

1 श्रीरामकृष्णबोधामृतम् चिरन्तनानन्दकृतम् (तेलुगु) मद्रास - 1966

2 Silver Nitrate

अन्नम्	यदाकदापि विन्दन्ति भगवन्तमुपासका । क्षिप्र वाथ विलम्बेन यथैवान्न बुभक्षिता ॥
अपूप	पक्वेऽपूपे न तैले स्यात् पच्यमान इव स्वन । प्रवक्तृणामपि तथा पक्वापक्वधिया वच ॥
अम्ल	अजीर्णरोगी दृष्ट्वाम्लमपथ्यमपि काक्षति। तथैव विषयासक्त ममता न विमुञ्चति॥
अयस्कान्त	अयस्कान्ताश्मनोर्मध्ये लोहवन्मानस द्वयो । मध्येऽबलाभगवतो राकृष्ट स्याद् बलीयसा ॥ [1] अयस्कान्ताचलाकृष्टा यथा नौका विशीर्यति। चित्ते भगवदाकृष्टे ह्यहकारादयस्तथा॥ आकर्षेदीश्वरो बाष्पैर्धौत मायामल मन । अयो यथा कान्तशिला धौतमृन्मलमम्बुभि. ॥
अयोवलयशय्या (Spring bed)	लौकिकानां परवश मन प्रवचनावधि। अयोवलयशय्याया स्थितिस्थापकतोपमम्॥
अय. पावकौ	भवेदयोऽग्निसयोगादग्निवर्ण समुज्ज्वलम्। अपनीते पुनस्तस्मात्तस्मिन् मलिनवर्णता॥ लौकिकानां मनश्चापि सत्सङ्गविवश तथा। साधुसंगेऽपयाते तु पुनर्भवति लौकिकम्॥ लौकिकानां पारवश्य क्षणिकं भगवद्गतम्। तप्तलोहे निपतितो वारिबिन्दुलवो यथा॥
आम्रातकम्	केवलं च त्वचा बीजमाम्रातकफले यथा। सार कश्चन नास्त्येव तथा संसारजीवने॥
आर्द्रेन्धनम्	आर्द्रेन्धने यथा वह्निर्निक्षिप्तो न समिध्यते। तथान्तरङ्गे भगवद् भक्ति विषयपङ्किले॥
आवर्त	भगवन्त समाप्नोति भक्त आपद्गतोऽपि सन्। कदाप्यावर्त रुद्धापि प्रवहेदेव वाहिनी॥
इन्द्रजाल	इन्द्रजालो जगन्मिथ्या भगवानैन्द्रजालिक । क्रीडन्नास्ते नरो भूत्वा सत्य नारायण. परम्॥
उत्पलम्	उत्पलाना सुमनसा गलितेषु पुटेष्वपि। यथाचिह्नानि दृश्यन्ते ज्ञानिनोहकृतिस्तथा॥

---

[1] *कान्तापेक्षया भगवानेव बलीयान्।*

उन्नतदेश	निम्नदश यथा तिष्ठेदुदक न तथोन्नते । यथा विनीते भगवान्न तथा गर्वित नर ॥
उपधानम्	नानाविधा हि दृश्यन्ते चोपधान निचालिका । एकरूप तु कार्पास परमात्मा तथात्मसु ॥
उष्ट्र	उष्ट्र कण्टकित गुल्म क्षतास्योपि न मुञ्चति । वञ्चितोपि तथा शश्वन्नर ससारजीवनम् ॥
ऊध असृक्	ऊधस्येव यथाक्षीर प्रतिमाया तथेश्वर । व्यापी सर्वेषुलोकेषु प्राणिगात्रेष्वसृग्यथा ॥
औषधम्	गात्रे कि चिन्मुखे किञ्चिदौषध सेव्यते यथा । श्रोतव्य श्रुतितश्चित्ते ध्यातव्यश्च तथेश्वर ॥
औष्ण्यम्	घटस्थतण्डुलादीनि पच्यन्ते पावके सति । देहस्थानीन्द्रियादीनि प्रवर्तन्ते सतीश्वरे ॥ अहताज्वालयालीढे जीवे तापो विवर्धते । घट स्पर्शसहस्तावद्यावज्जवलति नानल ॥
कण्टक	कण्टकस्य यथोद्धार कण्टकेनैव साध्यते । अज्ञानस्य तथोद्धारो [7] ज्ञानेनैव न चान्यथा ॥
कतक	सलिल पङ्ककलुष कतकेन प्रसाद्यते । वैराग्येण विवेकेन कषाय कलुष मन ॥
कपि	जहाति स्वान् कपि प्राणान् यथा लुब्धकपादयो । काममोह परीतात्मा तरुणीपादयोस्तथा ॥
कर्पूर	कर्पूरे ज्वालयालीडे न किचिदवशिष्यते । तथा दृश्य प्रपञ्चोऽपि समाधौ नैव दृश्यते ॥
कर्षक	क्षेत्रे कृष्टे फलाभावे विरमेत् कर्षको यथा । तथा सकृदपि ध्याते परेशे साधको नव ॥
कल्पतरु	अभीष्टफलदोऽस्माक भगवान् कल्पपादप । ऐहिक वामुष्मिक वा यो यदिच्छति तस्य तत् ॥
काक	मन्यते लौकिक प्रायेणात्मान पण्डित जन । विषयानुपभुञ्जान उच्छिष्टानिव काकवत् ॥

---

7 *अज्ञानेनेत्यपि । स्वधनभूतज्ञानस्यापि अज्ञानकोटि पतितत्वमेवांगीकृतमद्वैतवेदान्ते । तर्हि उपमानस्मन्वयोऽपि सुतरा श्लिष्यति ॥*

काञ्चन-मृत्तिका कुण्डलेषु यथास्वर्ण मृत्तिका कलशादिषु ।
शर्करा शर्करेव च खाद्येषु भिन्नैष्वेकरस पर ॥

कालीघट्टपुग्म् कालीघट्टपुर गन्तु वदन्ति विविधान् पथ ।
आप्तोदितेन गन्तव्य पथैव भगवानपि ॥

काष्ठम् अविद्या विद्यते मध्ये जीवात्मपरमात्मनो ।
विभजन्त्यविभाज्यौ तौ सलिलोपरि काष्ठवत् ॥

कीटपतङ्गौ बद्ध स्यात्कीटवज्जीवो निजैर्विषयतन्तुभि ।
ज्ञानवैराग्यपक्षाभ्या विमुक्तश्च पतङ्गति ॥

कूपखननम् न वर कूपखननं बहुत्र सलिलार्थिना ।
मतमेकमनुष्ठेय साधकेन मुमुक्षुणा ॥

कृमिनील्यलय बद्ध-मध्यम-मक्ता स्यु· कृमि नील्यलिसनिभा ।
मुक्ताश्च भगवत्पादसरोजमधुपायिन ॥

ससारे मध्यमा· सति मक्षिकावद् गतागता· ।
बद्धा जाता मृतास्तत्र कृमिसघा मले यथा ॥

मज्जेद्ब्रह्मणि सारङ्ग पानके मक्षिका यथा ।
ब्रह्मानन्दे मृतो न स्यादमृतत्व हि विन्दिति ॥

कैवर्तलुब्धकबका· चक्षुस्सता भवेदीशे लुब्धकस्य यथा मृगे ।
कैवर्तस्य यथा मत्स्ये बकस्याप्यामिषे यथा ॥ 2101

क्षीरम् चित्तस्य पापबाहुल्ये शुद्धिश्चापि सुदुष्करा ।
क्षीरस्य नीरबाहुल्ये घनीभाव· सुदुष्कर· ॥

खण्डशर्करा न करोत्यामय जातु मधुरा खण्डशर्करा ।
नाहकारस्तथा पक्वो विकुर्याद् भक्तमानसम् ॥

यथानुभववेद्यैव मधुरा खण्डशर्करा ।
तथैव भगवान् वेद्यो न पुन शास्त्रमात्रत ॥

आस्वादिते खण्डखण्डे गुडो नैव हि रोचते ।
भोगस्तथेन्द्रियार्थाना मनुभूते परात्मनि ॥

खड्ग· स्वर्णभूते यथा खड्गे सयोगात् स्पर्शविधिन ।
तथा ज्ञानमये चित्ते न कर्मक्षमता भवेत् ॥

गगनम् पुण्यपापैर्देहबुद्धि धूमससक्तकुडचवत् ।
लिप्यतेऽसग आत्मा तु न तथा गगनोपम· ॥

गज	साधूना सगमात् पश्चात त्यजेत् पामरसगतिम् । नोचेत पकिल एव स्यात् स्नातपासुलहस्तिवत् ॥
	यथामत्यगजज्ञान भवेज्जतुमयाद् गजात् । विग्रहाराधनादेव प्राप्यते परमेश्वर ॥
गज -अकुश	विवेकाकुशमादाय दमयेच्चित्तहस्तिनम् । विपयारण्यसचार वृत्तिजाल [1] घटोद्भटम् ॥
गज -अन्धा	अन्धा स्तम्भादिसदृश मन्यन्ते करिण यथा । अतत्त्वज्ञास्तथा तत्त्व मतथा परमात्मन ॥
गृध्र	उच्चैरुत्पततो दृष्टि र्नीचैर्मृतकलेबरे । गृध्रस्येवेन्द्रियार्थेषु केवल शास्त्रवेदिन ॥
	किंतु हसनिभो भक्तो भक्तिक्षीर सदा पिबेत् । बिषयाम्बु परित्यज्य विवेकी गुणदोषवित् ॥
	विलोक्य सामिष गृध्रमनुधावन्ति हीतरे । निरामिषो विमुच्येत तथा निर्विषय पुमान् ॥
गोसङ्घ.	निष्कासयति गोसघ प्रविष्टमितरमृगम् । प्रविष्टे गवि तत्रैव स्निह्येद् भक्तोऽपि तादृश ॥
घटच्छिद्रम्	छिद्रे घटस्य सूक्ष्मेऽपि यथानीर तथात्मन । लौल्ये नश्येद्देवभक्ति [2] पन्नीरमिव भस्मनि ॥
घट-मृत्तिके	प्रागेव मृत्तिका पाकाद् घटादावुपयुज्यते । ज्ञानात्प्रागेव जीवोऽपि पुनर्जन्म प्रपद्यते ॥
घटिकार (Clock)	मिथोयथा समिलतो घटिकारस्थसूचिके । जीवात्म परमात्मानौ सपृक्तौ भवतस्तथा ॥
घास	बहुक्षीरा भवेद्धेनुर्यस्या घासोऽपि पुष्कल । शुद्धा च भक्ति रमिता साक्षात्कारप्रदा तथा ॥
चालनी-शूर्पौ	धान्य तु चालनी हित्वा तुष गृह्णाति निष्फलम् । अधमाना स्वभावस्तु स्यादेवमिति बोधिनी ॥

---

1 घटा गजसमूह ।

2 साहित्यरत्नाकरे - रसतरङ्गे पन्नीरशब्दप्रयोगो द्रष्टव्य -
कर्पूररेणु सिकताकमनीयगर्भ पन्नीरशीतलशिलातलपुष्पतल्पे ।
केली मुशीरदल कल्पितकायमाने धारागृहे रघुपतिर्विदधे निदाघे ॥

शूर्प कडङ्कर नित्वा धान्य गृह्णाति सारवत।
उत्तमाना स्वभावोऽपि स्यादेवमिति बोधयन्॥

चोर — चोरोऽयमिति विज्ञातो यथा धावति मुष्कर ।
अतर्हिता भवेन्माया तथा ज्ञाता विवेकिना॥

जलनामानि — सलिलस्य यथैकस्य नाम भाषासु भिद्यते।
मतेष्वपि तथाभिन्नेष्वभिन्नस्य परात्मन ॥

जीवच्छव — जीवच्छवसमानो यो लोके कामादि वर्जित ।
स महात्मा धन्यधन्य स एव पुरुषोत्तम ॥

ज्वर — पिपासति जल भूरि तापज्वरनिपीडित ।
अनन्तमीश्वर भक्तोप्यल्पज्ञोनुबुभूषति॥
सनिपातज्वरार्ताय मृष्टान्न नैव रोचते।
इन्द्रियार्थज्वरार्ताय भक्तिर्भगवतस्तथा॥

झञ्झावात — झञ्झावाते प्रवृत्ते तु वृक्षभेदो न दृश्यते।
सप्राप्ते ब्रह्मणो ज्ञाने जातिभेदो न विद्यते॥

तण्डुलोदकम् — मद्यमत्तो मद जह्यात्तण्डुलोदकसेवनात्।
तथैव विषयैर्मत्तो विनीत साधुसगमात्॥

तालिका (Key) — विवेकवैराग्यमयी विनियोज्या हि तालिका।
आत्महर्म्य प्रवेशार्थं परा विश्रान्तिमिच्छता॥

तान्त्रिक — आसादयति सभारान् शवस्योपरि तान्त्रिक ।
ससारेऽपि तथा तिष्ठन् सिद्धिकामश्च साधक ॥

तीर्थम् — सत्यनेकानि तीर्थानि कृतानि सलिलाशये।
यथा जल प्रापयितु तथा तत्त्व मतान्यपि॥

तुला — विद्याविद्ये मनुष्येषु तुलायामिव सभृते।
मोक्षोऽथ वा बन्ध इति भाराद्भवति निर्णय ॥

तूलराशि — महान्त पापसघात भगवन्नाम निर्दहेत्।
तूलराशिमिवादभ्र विस्फुलिङ्गलवो यथा॥

तैलम् — भस्त्रिकाणा यथा तैलस्यावशेषस्तथा नृणाम्।
कालुष्य वासनालेशात् साक्षात्कारावरोधकम्॥

	स्नेहश्चिरमवस्थानाद् दुर्गन्धि सलिले भवेत्। इन्द्रियार्थेष्वपि तथाव्यापृतस्य तपस्विन ॥
	अपेक्ष्यते यथा तैल प्रदीपाना प्रकाशने। नारायणस्तथा सर्व प्राणिनामपि जीवने ॥
त्रपु-पारदौ	यथैवाभिन्नतामेति मिलित त्रपु पारदे। विजहाति तथा भेद जीवात्मा परमात्मनि ॥
दर्पण	मुखादे र्मलिनादर्शे प्रतिबिम्बो न दृश्यते। तथा भगवतश्चापि चित्ते विषयरूषिते ॥
दहन.	**दहनो दाहशक्तिश्च यथान्योन्य न भिद्यते। एव ब्रह्म च माया च पृथङ् नास्ति विवेकिनाम् ॥**
दारुपञ्जरम् (Scaffolding)	यथा सौधादि निर्माणे दारुपञ्जरकल्पना। साक्षात्कारे भगवतो विग्रहाराधन तथा ॥
दिक-सूची	दिशेद् दिक्सूचिका यन्त्र सर्वदैवोत्तरा दिशम्। मनस्तथैव भक्तस्य भगवत्प्रवण भवेत् ॥
दीपच्छाया	गुरोरत्यन्तसामीप्ये ज्ञायते महिमा नहि। प्रदीपस्य यथैव स्यादधस्तान्निबिड तम ॥
दुर्गम्	गृहिणोऽपि यतन्ते ये भगवत्प्राप्तये जना । अरीन् जयन्ति कामादीन् दर्गरक्षितयोधवत् ॥
दूरदर्शिनी (सूर्यकान्त)	
(दुर्भिणीति भाषायाम्)	सूर्यकान्ताश्मसक्रान्ता दहन्ति रविरश्मय । तथा मनश्च ससार, संक्रान्त दैवचिन्तया ॥
धनिकसेवक	सज्जनै कर्मिभि सेव्यो भगवान् द्वैतगोचर । भृत्यवद्धनिना वासेश्वाचरेत् कर्म साधक ॥
धूम	धूमेन रूषिते गेहे जागरूको यथा वसेत्। विषयैर्दूषिते धीमान् ससारेऽपि तथा नर ॥
धूमयानम् (Rly train)	यन्त्र हि धूमयानस्य वहते बहुशाकटम्। तारयन्ति तथानेकान् जनान् भागवतोत्तमा ॥
नक्षत्राणि	भगवद्दर्शन न स्या दज्ञानावृत आत्मनि। आतपावृत आकाशे यथा नक्षत्रदर्शनम् ॥
नट	प्रारब्धस्यावसाने हि नरस्त्यजति जीवितम्। जहात्यभिनयस्याते नटो वेष धृत यथा ॥

	केचिदर्कोद्गतात्पूर्वमुन्नीतनवनीतवत । बाल्यात् प्रव्रजिता सन्त प्रशस्ता यतितः स्तजा ॥
	केचिदर्कोदयात्पश्चादुन्नीतनवनीतवत । प्रव्रजन्त्यप्रशस्तास्ते ये प्रोढवयसि स्थिता ॥
	तक्रादपि पृथककुर्यान्नवनीत समुद्धृतम । साधुसागत्यरुचिर तथात्मान खलाश्रयात ॥
निकष	साध्वसाध्वो परीक्षार्थ हिसा निन्दा च कल्पते । भदज्ञानाय निकषो यथा स्वर्णारकूटयो ॥
निघातिका (Anvil)	नजातु घातै र्लोहस्य विक्रियेत निघातिका । साधकोपि तथा क्लेशै स्थितप्रज्ञ परात्मनि ॥
निर्मोक.	निर्मोकाद दृश्यते भिन्न पन्नगो न स एव स । शरीराददृश्यते भिन्नो जीवात्मा न तदेव स ॥
नीरम्	नीरं भवति सर्वत्र पानयोग्य तु तत् क्वचित् । स्थलानि सन्ति सर्वत्र ससेव्यानि तु कानिचित् ॥
	तृणशैवालसछन्न कूपस्थ सलिल यथा । भगवान्माययाच्छन्नो व्यापकोऽपि न दृश्यते ॥
नौकापट.	वात्येव खल्वविश्रान्तमीश्वरानुग्रहानिल । मनोनौकपटस्यैव प्रसारण मपेक्षितम् ॥
न्यायवादी	न्यायवादिनमालोक्य न्यायास्थान यथास्मरेत् । स्मर्यति भगवानेव भक्ताना दर्शनादपि ॥
न्यास·	केवल वादकुशलो यो वक्तानुभवोज्झित । स्वहस्तात् परवित्तस्य व्ययमेव करोति स ॥
पक्षी	ध्वस्ते कुलाये विहगा विहरन्ति विहायसे । तथोपाधिविनाशेन जीवाश्च परमात्मनि ॥
पट	शास्त्रेभ्यो भगवत्प्राप्ति र्न भविष्यति तात्विकी । काशीचित्र पट दृष्ट्वा काशीदर्शनलाभवत् ॥
पट्टिका (List)	किनु कार्य पट्टिकया क्रीतेषु क्रेयवस्तुषु । उपलब्धे परे तत्त्वे ग्रन्थैर्नास्ति प्रयोजनम् ॥
पतिव्रता	पति पतिव्रता याति यथा जन्मान्तेरष्वपि । भक्त्यैवाव्यभिचारिण्या भगवन्त तथा सुधी. ॥

पनसफलम्	कोण तैलयुक्तेन भजेत पनरा यथा। असक्तो भक्तियुक्तेन ससार चेतसा तथा॥
पात्रम्	सतत चित्तकलश शोधयेद् ध्यानवारिभि । सिद्धयो मलवद्धेया आत्मानुभवमिच्छता॥
पादरक्षा	साधक पादरक्षावद्रक्षेच्चित्त वशेस्थितम्। वैराग्येण विवेकेन युक्ताहारविहारत ॥
पामा	तृप्तिर्नास्त्येव भक्ताना भगवन्नामकीर्तनात। विघर्षणादपि यथा पामव्यापृतचर्मणाम्॥
पाषाणरहितक्षेत्रम	पाषाणरहितेक्षेत्र यथा बीज प्ररोहति। भगवान् रमते चित्ते तथा निष्कपटेऽनघे॥
पिच्छिलपत्रम्	यथा पिच्छिलपत्रेषु लेखन दुष्कर भवेत्। तथा सविषये चित्ते भगवद्भावभावना॥
पिधानम्	वैराग्येण विवेकेन पिनद्धमनसा बुध । गम्य प्राप्नोति तुरग पिनद्धनयनो यथा॥
पिपीलिका	शर्करामेव गृह्णाति सिकतास्था पिपीलिका। सज्जनोऽपि भजेदीश सारवन्तमसारत॥ यथा पिपीलिकान्याये फलप्राप्ति सुनिश्चिता। यतेत साधकस्तद्वन्न मर्कट भुजङ्गवत्॥
पिप्पल	प्ररोहेत् पिप्पलश्छिन्न पुनरेव महीरुह । तथाछिन्नोप्यहंकारो ज्ञानिन्यपि पुन पुन ॥
पुत्तलिका	समुद्रस्येव गाम्भीर्य मूर्तिर्लवणकल्पिता। ब्रह्मणो नैव जानाति जीवश्चैतन्यकल्पित ॥ केचिद् ब्रह्मणि सलीना पृथक् तिष्ठन्ति केचन। शिला-लवण-काष्ठाना यथा पुत्तलिका जले॥
पुरम्	प्राक् प्राप्तविश्रमस्थानो दिदृक्षुर्विहरेत् पुरे। विज्ञायादौ पर तत्वं बुधो वर्तेत जीवने॥ साधको ब्रह्मणस्तत्त्व मज्ञातमपि विन्दति। जिज्ञासया सततया गम्यं पुर मिवाध्वग ॥
पुलाक	अर्थस्य यस्य कस्यापि लोके सम्यक् परीक्षणात्। स्थालीपुलाकन्यायेन मिथ्यात्वमवसीयते॥

पुष्करिण्य	यथाध्वगाना मार्गेषु पुष्करिण्यो मनोहरा ।
पुण्यक्षेत्राण्यपि नृणामुपकुर्युस्तथैव हि ॥

पूगफलम	शुष्क रस यथापूग त्वचो लटलटायते ।
कामे नष्टे तनोरात्मा तथा भिन्नोऽनुभूयते ॥

प्रसिद्ध-पुरुष	प्रसिद्ध गुरुष केश्चित केवल श्रूयते जनै ।
दृश्यते भाष्यते केश्चिद भगवानपि तादृश ॥

फणी	पन्नगाध्युषिते गेहे जागरूको यथा नर ।
वसेत्तथैव ससारे कामादि रिपुसकुले ॥

मार्दव न तु सर्वत्र मृदुश्च परिभूयते ।
कुर्यात्फणीव फूत्कारमत्यये समुपस्थिते ॥

न तु हिसैव कर्तव्या रक्षतात्मानमात्मना ।
प्रगल्भेनाप्रधृष्येण साधुनापि महात्मना ॥

मायया ब्रह्मणश्चापि सबन्ध सभवेदियान् ।
सर्पतस्तिद्यतो यद्वद्भुजगस्य विलोक्यते ॥

न हन्त्याशीविष यद्वन्निजदष्ट्रागत विषम् ।
स्वाश्रय परमात्मान तथा माया न बाधते ॥

यथा बिल न निर्माति स्ववासाय बिलेशय ।
तथात्मनो निवासाय परिव्राजकजीवन ॥

क्षुद्रसर्पमुखे भेको मुच्यते नापि नाद्यते ।
न लभते नरा बोध देशिकाभासशिक्षिता ॥

महासर्पमुखे भेक शीघ्र प्राणैर्वियुज्यते ।
प्राप्नुवन्ति नरा बोध कुशलाचार्यशिक्षिता ॥

फलम पुष्पम	भक्तिभावे समुत्पन्ने तथाकर्म विनस्यति ।
यथाफले समुत्पन्ने विशीर्येत सुम स्वयम् ॥

तरूणामस्ति केषा चित् फल पूर्व तत सुमम् ।
बुधानामपि केषाचित ब्रह्म प्राक् ससृतिस्तत ॥

काकोच्छिष्ट रसाल च जरठो वशपादप ।
प्रोढनाल शुकगलश्चलचित्त च निष्फलम् ॥

क्रेतार क्रेयवस्तूना पूर्ण भार तुलाधृतम् ।
इच्छन्ति न ततो न्यून कथ चन तथैवहि ॥

समाय ब्रह्मणस्तत्त्व साक्षात्कारतुलाधृतम् ।
पूर्णभार सदा ग्राह्च स्ततो न्यून न रोचयेत् ॥

पूर्णता ब्रह्मणश्चापि शक्तेरेव समन्वयात् ।
यथा फलस्य पूर्णत्व त्वग्बीजरसयोगत ॥

फलस्य वृक्षपक्वस्य माधुर्य सहज भवेत् ।
पक्वीकृते पृथग्वृक्षात्तस्मिन् कृत्रिममेव तत् ॥
जात्यादि भेदसत्यागो मुक्ते प्राक् कृत्रिमो नृणाम् ।

यथा पक्वरसालस्य त्वचा हस्ते फल बहि ॥
तन्वीहस्ते तनु. साधो स्तथात्मा तु परात्मनि ।
वलात्काराभिपन्नस्य कामितस्य विरागिण ॥

बिम्बक (सरटविशेष) (ಓಂತಿಕ್ಯಾತಿ)

बिम्बकस्य यथा वर्णा विविधा सभवन्ति हि ।
तथा भगवतश्चापि रूपाणि स्युरनेकश ॥

बुद्बुद

दापितस्य स्वतन्त्रेण बुद्बुदस्येव वारिणा ।
[1] आधारधेयभावोऽस्ति जीवस्य परमात्मना ॥ 2201

भाषा

नूत्नभाषापरिचये तत्पदान्येव बालक ।
जल्पेद् यथा तथा भक्ते साधनारभसभ्रम ॥

भूत-सर्षपा

उच्चाटयन्ति भूतानि सर्षपैरभिमन्त्रितै ।
उच्चाटन कथ नु स्यात्पिशाचे सर्षपस्थिते ॥

उपास्यो भगवानेव विषयापेतवृत्तिभि ।
उपासन यतो न स्याद्विषयाविष्ट आत्मनि ॥

भृष्टव्रीहय

भृष्टेभ्यो न प्ररोहन्ति व्रीहिभ्यो नूतनाङ्कुरा. ।
तथा ज्ञानाग्नितप्ताना पुनर्जन्म न विद्यते ॥

भाजनपत्रम्

लघुना वायुवशग चरत भाजनपत्रवत् ।
निःस्पृहेण भाव्य साधकेन मुमुक्षुणा ॥

भक्त

भक्त [illegible] भीतो[illegible] त्रिहत् सलिलोपरि ।
[illegible] भक्तो [illegible]भीतस्तथेश्वरे ॥

---

1 परमात्मा[illegible] जीवस्योर [illegible] साधित सम-अगर । धनिने धन दाप्यतेऽस्मात् ।

मण्डूक	यथा कूपस्थमण्डूको नैव जानाति सागरम्। सहतेऽन्यमत नैव तथा स्वमतगर्वित.॥
मदिरा	भगवन्नामपीयूषविगलदबाह्य सस्मृति । उच्चनीच न जानाति मदिरापानमत्तवत्॥
मलयानिल.	यान्ति द्रुमाश्चन्दनता ससारा मलयानिले। ईश्वरानुग्रहे शुद्धा मुच्यन्ते कृतिनो जना ॥
माता	आलक्ष्य भोजने शक्ति जननी भोजयेत् सुतान्। यथाभिरुचि भक्ताना प्रतिमा परिकल्पिता॥
माता (Umpire)	क्रीडासु मातर स्पृष्ट्वा विजयी च विमुच्यते। यथा बालस्तथा भक्तो ज्ञात्वा देव विवेकवान्॥
मार्जनी	मन्दिर मार्जयेत् किंतु मलिना मार्जनी स्वयम्। अनुभूति विहीनस्य तथा प्रवचनान्यपि॥
मार्जालशिशु·	मार्जाली दंष्ट्रया हन्यान्मूषिक न निज शिशुम्। तथेश्वरो न बाधेत मायया भक्तमात्मन ॥
मीना	केचिज्जालगता मीना निर्यान्त्युत्पत्य जालत.। उत्साहिनस्तथा केचिन्मुक्ता· ससारिणोऽपि ये॥
मूषिका	न पश्यन्ति पर तत्त्व विषयाकृष्टमानसा·। यथा कोशगतं धान्य लाजाकृष्टा इवाखव ॥
मूषिकविलम्	सलिल मूषिकबिले यथा स्रवति भूरिश । तथा सविषये चित्ते पारमार्थिक भावना॥
मेघ·	अहकारावृते चित्ते परमात्मा न भासते। मेघच्छन्नो यथा सूर्य. पटच्छन्नो यथा नर.॥
मौक्तिकम्-तुष	मौक्तिकस्य यथा शुक्ति स्तुषो बीजस्य चाश्रय·। तथा स्वकर्मा चरण साक्षात्काराय कल्पते॥
यानपात्रम्	नरो वर्तेत संसारे जलस्योपरि पोतवत्। विपर्यये तु तत्रैव मग्नोभूत्वा विपद्यते॥
रज्जु	रज्ज्वा यथा न दग्धाया बन्धनक्षमता भवेत्। तथा ज्ञानिन्यहकारस्याकाराभास एव हि॥

गजहस्त — गजहस्त [illegible] विहाय [illegible] ।
तथैव [illegible] निर्माय ब्रह्म पश्यति ॥

गमन्थ — [illegible] गुड ।
[illegible] गवाम ॥

[illegible] — [illegible] पात्राद [illegible] ।
[illegible] यथा [illegible] गृहस्याहकृतिस्तथा ॥

लाजा — [illegible] लाजा [illegible] ।
तथैव [illegible] ॥

लिपि — यथा प्रथमत [illegible] लिपि ।
[illegible] मतम ॥

लाह — [illegible] ।
[illegible] कुठारादिक्रिया [illegible] ॥

वत्स-वृषा — [illegible] न तथा धूर्वहे वृषे ।
[illegible] प्राजे [illegible] प्राकृत यथा ॥

वधू — [illegible] यथा ।
[illegible] कर्माणि [illegible] ॥

वन-फलम — किंचित्प्रयोजन नास्ति फलाना गणने वने ।
[illegible] ॥

वर्णा — [illegible] वर्णा यथा [illegible] तथैव [illegible] ।
[illegible] जगतोऽपि [illegible] ॥

वस्त्रग — [illegible] यत्ने चित्तवृत्तय ।
[illegible]

वह्नि — [illegible]
[illegible] ॥

वस्त्र — [illegible] ।
[illegible]

[illegible] — [illegible]
[illegible]

विषाण

विषण्णा दृश्यते दूरादपि कालाहली महान्।
वादाः सर्वे प्रशाम्यन्ति विज्ञाते परमात्मनि ॥

विषलता

विषलतावदष्टस्य हरिद्रामूलिकौषधम्।
कान्ताकाञ्चनदष्टस्य वैराग्यं परमौषधम् ॥

व्याघ्र

अराशय वसत्येव भगवान् दुर्जनेष्वपि।
व्याघ्रादिष्विव नो तेषां कदापि स्थेयमग्रतः ॥

व्याघ्रमुखग
(अद्रौ [illegible])

वाणी भगवतः सेव या भक्तमुखनिर्गता।
अद्रावरिव्याघ्रमुखाद् वारिधारेव वृष्टितः ॥

शार्दूलमुखसम्छन्नाद् नालिका मोदगादिव।
प्रजा माता भवेन्मायासछन्नात् परमात्मनः ॥

[illegible]

अपयाते व्रणेपश्चात् त्वचापि च्यवते स्वयम्।
अज्ञानेऽन्तर्हिते चापि कर्माणि विगलन्ति हि ॥

श-प-सा

[illegible]ष्माण शपसास्तावत्सहन बोधयन्ति हि।
महैतान्यमत विद्वान् न स्यात स्वमतगर्वितः ॥

[illegible]

अनुभूति विहीनस्य केवलं वादकौशलम्।
मन्दिरे प्रतिमाहीन [illegible] खलु ॥

[illegible]

यावदेव न दृष्टाम्बा क्रीडति क्रीडाके शिशुः।
परमात्मनि दृष्टे च जीवस्य विषयेष्वलम् ॥

शिशुं धूलियुतं माता यथैव परिमार्जयेत्।
तथैव पापकर्माणि प्रपन्न भगवानपि ॥

शुक

लौकिकैर्दुस्त्यजं [illegible] रामनामस्तेरपि।
यथा बिडालवशगे शुके किचकिचायितम् ॥

शुभ्रवस्त्र

शुभ्रे वाससि मालिन्यं यत्किञ्चिदपि दृश्यते।
साधोस्तथैव चारित्रे दोषः स्वल्पोऽपि निन्द्यते ॥

[illegible]

प्राप्यते शृंखलाबद्धः शृंखलाग्रहण[illegible]।
[illegible]शाणयथा मनस्येव [illegible] ॥

[illegible]

यथा शैवलविस्तारा दृश्यते कूपवारिणि।
शास्त्रास्तथा कुधर्मेषु न तु धर्मे सनातने ॥

	यथा न दृश्यते कूपे शैवलाद्यावृत जलम्। तथा न दृश्यते स्वान्ते भगवान् माययावृते॥
श्वान	सकल्पान्नैव कामादीन् कलयेदसतो मुहु । यथा यथा लालितास्ते न त्यजन्ति श्ववत्तथा॥
सख्या	सत्यामेवैक सख्याया शून्य कलितमर्थवत्। तथा प्रपञ्चनानात्व सत्येव परमात्मनि॥
सतर्पणम्, मधुप नीरघट	प्रागेव ब्रह्मणो ज्ञानाद्वादो भवति वादिनाम्। अन्नसतर्पणस्यादौ भोक्तॄणा जल्पन यथा॥
	अलीनामिव झङ्कार. प्राक् पुष्परसपानत.। नीरेण पूरणात्पूर्व घटानामिव नि स्वन॥
सखी	प्रियसख्यै यथा कान्ता भर्तुर्भगवतस्तथा। भक्तायैव न चान्यस्मै भक्त स्वानुभव वदेत्॥
समुद्रः	अवगाह्यो मुहुर्वार्धिर्मणिर्यार्विन्न लभ्यते। अप्राप्तदर्शनेनैव मुपास्यो भगवानपि॥
सर्षपसंपुट.	सर्षपा निर्गलन्त्येव सरन्ध्रे सपुटे यथा। अनेक विषयव्यग्रे भगवच्चिन्तन तथा॥
सुमसंपत्	ईश्वरो व्याधिना प्रायो नयेत्साधकमुन्नतिम्। पत्रच्छेदेन वृक्षज्ञो लताना सुमसपद.॥
सूचिकासूत्रम्	एकाग्र प्रविशेत् सूत्र सुचिकाविवर यथा। भगवन्तं तथाचित्तमव्यग्र च समाहितम्॥
सूर्य.	यथा न दृश्यते सूर्यो नीरदावृतदृष्टिभि । ईश्वरोऽविद्यया च्छन्नै र्नास्माभिर्ज्ञायते तथा॥
सूर्यकान्तशिला	सूर्यकान्तं जले मग्न दाहशक्तिर्न मुञ्चति। भक्तिर्दुरितमध्यस्थ तथा भागवतोत्तमम्॥
सेतु.	सेतोरधो यथा नीर न कदाप्यवतिष्ठते। लौकिकाना तथा बोध श्रवणादपगच्छति॥
	सेतोरधो यथानीर चलद् भवति निर्मलम्। विमुक्तस्य तथा सपद्दानेनैवाभिशोभते॥

सोपानानि यथा सोध प्राप्तु नि श्रेणिकादय ।
साक्षात्कारे तथा सति विविधानि मतान्यपि ॥

स्तम्भक्रीडा — स्तम्भक्रीडासु बालाना मालम्ब स्तम्भ एव हि।
भवेत्ससारिणा मेवमालम्बो भगवानिपि ॥

स्त्री — गेहे तु कर्मभिर्बद्धा कान्ता प्रियतमोत्सुका।
यथातथैव ससारे बुध. स्यादीश्वरोत्सुक ॥

न रोचयेन्नृपे दृष्टे पति स्त्री किमु भिक्षुकम्।
राजसौधनिवासी च पर्णशालाज्जुगुप्सते ॥

नश्येद्विषयचापल्य तथा दृष्टे परात्मनि।
यत स्यान्महती तुष्टि र्ब्रह्मानन्द समृद्भवा ॥

स्वरा — सुलभोच्चारणा लोके स्वरा. सरिगमादयः।
गानतु न विनाभ्यास स्वधर्मोऽपि तथाविधः ॥

ब्रह्मानुभवसगीते भक्तिज्ञानादय स्वरा ।
अभ्यस्तेषु हि सर्वेषु गाने भवति पूर्णता ॥

हिमघनम् — भवेत्परिणत नीर नान्यद्धिमघन यथा।
दृश्य जगदिदं सर्व भगवानेव नान्यथा ॥

होमपक्षी — केचिदस्पृष्टभूलोका विहरन्ति मनस्विन.।
जातमात्रा मोक्षपथे गगने होमपक्षिवत् ॥

हेलाञ्च — [1]हेलाञ्चो पि यथा खण्डशर्करा च परात्मनि।
मनोरथस्तथैवान्य वाञ्छासाधारणो न हि ॥

गृहस्थाना तथान्येषा हितबोधो गुरोरयम्।
रम्योपमानविशदश्चमत्कार रसाश्रय ॥

[2] पञ्चारादुत्तर शताधिकसख्ययैव
रम्योपमानमधुराणि सुभाषितानि।
श्रीरामकृष्णपरमोत्तरहसगीता –
न्यानन्दयन्त्वनिशमेव रसज्ञलोकम् ॥

---

1 *मूलिकाप्रभेद । मूलिकान्तरेभ्यस्तस्यवैशिष्टयम्। खण्डशर्करायाश्च अन्यमधुरद्रव्येभ्य । तथैव भगवद्विषयक मनोरथस्य अन्येभ्य मनोरथत्वसाधारण्येऽपि वैशिष्ट्यमुपादेयता च ॥*

2 *गणनेयमुपमानानाम्।*

पञ्चाशीतितमे वर्षे नवद्व्यष्टशताधिके ।
निदाघे परमोहंस पानीयं हिमसंयुतम् (Ice-water) ॥

हिमकूर्चं (Ice-cream) पयस्यं च सिषेवे तापशान्तये ।
एकदा वैष्णवं तीर्थं पाणिहाटिपुराभिधम् ॥

स्वशिष्येभ्यो दर्शयितुं स ययौ कीर्तनोत्सवम् ।
रामकृष्णे समाधिस्थे कश्चित् संकीर्तनान्तरे ॥

प्रसादं [1] प्राक्षिपत्तस्य मुखे कपटवैष्णवः ।
तेनापवित्रस्पर्शेन प्राकम्पत गुरोर्वपुः ॥

लब्धसंज्ञो रामकृष्णः प्रक्षाल्यवदनं ततः ।
स्वयमास्वादितं प्रादात् प्रसादं भक्तसंहते ॥

ततः प्रभृति कण्ठेऽस्य बाधा काचिदजायत ।
[2] रोहिण्याख्यो व्रणः (Cancer) इति वैद्यकैर्या विनिश्चिता ॥

सौकर्यार्थं चिकित्साया कालीघट्टं ययौ गुरुः ।
चकार वसतिं चात्र बलरामवसोर्गृहे ॥

आगतः परमो हंस इति ज्ञात्वाऽथ सज्जनाः ।
दिदृक्षवो रामकृष्णं भक्त्या परमया गुरुम् ॥

येषामनुग्रहायैव व्याधिग्रस्तो नु सोऽभवत् ।
नाध्यात्मिकानुलापेभ्यो विरराम कदाचन ॥

पौनःपुन्येन युक्तेभ्यः समाध्यनुभवैः शुभैः ।
मल्लिकावल्लिकाकुञ्जे पत्रान्तरसुमोपमैः ॥

धन्यात्मना प्रेक्षकाणां जनानां विस्मयाकरैः ।
बलरामगृहात्पश्चाज्जगाम श्यामपुष्करम् ॥

प्रदेशमन्यं तत्रैव कालीघट्टपुरे गुरुः ।
महेन्द्रलाल सर्कारश्चिकित्सां तस्य चाकरोत् ॥

---

1 *भगवदर्पितं नैवेद्यम् ।*
2 *1885 A D*

न धनापेक्षया किन्तु गुरुसेवाचिकीर्षया ।
शारदाऽभनि चक्रेऽस्य सपर्यां पत्युरात्मन ॥

सहमाना बहून् क्लेशान् पतिसेवा परायणा ।
लक्ष्मीदेवी शारदाया सहाया तत्र कर्मणि ॥
बभूव रामकृष्णस्य सुता भ्रातु कनीयस ।
रा रामकृष्णानन्दोऽभूत् सन्यासाश्रमभूषणम ॥
शशिभूष चक्रवर्ती विवेकानन्दयोगिराट ।
कालीप्रसाद चन्द्रश्च नक्त पर्यचरन् गुरुम ॥

अग्रगण्यात सर्वेभ्य सेवाया शशिभूषण ।
गुरुभक्त: पाकादि क्रियासु श्रद्धयान्वित ॥

[illegible] शिष्याणामुपचार चकार च ।
[illegible] तत [illegible] च "मातास्माक शशी"त्यपि ॥

[illegible] पश्चात स्थापिते विश्वमङ्गले ।
[illegible] भारमूह निर्वहणक्षम ॥

सुरेन्द्रश्च महेन्द्रश्च बलरामादयोऽपि च ।
वासान्नादि व्यये वित्त गुर्वर्थ गृहिणो ददु ॥

विविधाश्चक्रुरुत्प्रेक्षास्तद्व्याधिविषया जना ।
श्रीकाल्या कोऽपि सकल्प इति केचन चापरे ॥

गुरुदेवस्य लीलेति देहधर्म इतीतरे ।
आधुनिकैश्च शास्त्रीयैर्विविधैर्वैद्यसाधनै ॥

भिषग्वर[1] महेन्द्राख्यो रामकृष्णस्य नाऽशकत् ।
[illegible] समाधीनामपि हेतु परीक्षितुम ॥

इन्द्रियाणि सर्वाणि निश्चेष्टान्यभवन् परम ।
[illegible] विगतस्पन्द निर्निमेषे विलोचने ॥

यतमानोऽपि न ज्ञातु वैद्यो वैद्यान्तरै सह ।
[illegible] वर्धमानस्य व्याधेस्तस्य निवारणम् ॥

---

1 महेन्द्रलाल सर्कार ।

यात यत्र निष्फलता वीक्ष्य वैद्यकृत तदा।
तात्कालिकंप्युपशमं विदधे शारदा मतिम ॥ 2301

प्रायोपवेशने गाढा तारकेश्वरमन्दिरे।
घटादीना तदा भङ्गादिव जातो महान ध्वनि ॥

त श्रुत्वा सा विरक्ताभूद् बान्धव्येषु मृषात्वधी ।
पञ्चाशीति तमे वर्षे नवद्वयशताधिके ॥

काशीपुर प्रदेश च कालीघट्टपुरे तत ।
उद्यानशोभित निन्यु शिष्या पर्युत्सुका गुरुम् ॥

कतिभ्यश्चन मासेभ्य पश्चाद्यत्रास्य जीवितम् ।
स्रोतोवत्सागरे गन्ता विलय परमात्मनि ॥

"अविमृश्य प्रवचन सर्वेभ्योऽनेन दीयते ।
मुग्धात्मनेति मत्वा मा कालिका सदया रयात् ॥

इतश्च नेतुकामे"ति गुरुदेवोऽवदत् स्वयम् ।
महेन्द्र चावदद्वैद्य तदङ्गन्यस्तमस्तक ॥

परिशुद्धातरङ्गस्त्व यत स्पर्श सहे तव ।
"भक्तेनापि सता बाधा किमर्थ मनुभूयते" ॥

इति हीरानन्दनाम्ना पत्रसपादकेन च । (Journalist)
गुरुदेवो ब्रवीत्पृष्ट "श्चान्येषां पाप कारणात् ॥

देहे बाधा भवत्येव स्वतो भक्तस्य नास्ति सा।
सतत भगवत्पाद चिन्तनासक्तचेतस ॥"

"त्वादृशा सिद्धपुरुषा सकल्पादेव केवलम् ।
आरोग्य प्राप्नुवन्ती"ति श्रुत्वा शशधराद्वच ॥

प्रत्युत्तर गुरु प्रादा "दविवेकीव भाषसे ।
ईश्वरार्पितचित्त सन् कथ तुच्छे कलेबरे ॥

दृष्टि प्रसारयिष्यामि जीवनार्थ" मिति स्फुटम् ।
[1] समयेऽस्मिन समभवन भक्ताना मनुभूतय ॥

---

1 Jan 1886 A D

हसन्ति केचिद्विलपन्ति केचि ज्जल्पन्ति केचित्प्रणमन्ति चान्ये।
ध्यायन्ति केचिद्गुरुपाद धूलि वहन्ति केचिच्छिरसा विनम्रा ॥

भ्रातृजो रामलालोऽस्मिन् दृष्टवानिष्टदैवतम्।
वैकुण्ठनाथ सन्यालो रामकृष्णमय जगत ॥

स्वभावश्चापि शिष्याणा गुरुणावगतोऽधुना।
ये ब्रान्तरङ्गिका भक्ता ये सुखपृच्छका इति ॥

"दुर्भग व्रणबाधा मे न च शक्नोमि खादितुम्।"
इति कालीं प्रार्थयति रामकृष्णोऽपि सा च तम् ॥

"खादत किं न तृप्तिस्ते नानाप्राणिमुखै" रिति।
देवी चकार वचसा व्रीडित च निरुत्तरम ॥

गुरुस्तदा जनस्पर्श तापतप्त कलेबरम्।
सुखयामास गङ्गाम्बुसेकात् परम पावनात् ॥

शिष्या भिक्षाटन कृत्वा चानिन्युस्तण्डुलादिकम।
तेन पक्व गृहत्वान्न शुचि रुच्य जहर्ष स ॥

सन्यास ग्राहयामास बालशिष्यान् यथाविधि।
काषाय वस्त्ररुद्राक्ष मालाभिक्षा प्रदाय च ॥

"दुःखिदीन दरिद्रार्त नारायण परायण।
जगद्धिते स्वमोक्षार्थे सन्यासी यत्नवान् भवेत ॥

एभ्यो विशिष्टाविद्यान्ते नहि सन्यासिनो भुवि।"
प्रशशंसेति तान् शिष्यान् गुरुदेवो महात्मन ॥

९. महिम प्रदर्शनम्।

कदापि परमो हसो निवसन् श्यामपुष्करे।
अपश्यदात्मनो देह सूक्ष्म स्थूलाद्विनिर्गतम् ॥

तस्य पृष्ठे शरीरस्य दृष्टा हि बहवो व्रणा।
तान् दृष्ट्वा विस्मित भीत कालिका तमसान्त्वयत् ॥

"त्वत्स्पर्शनुगृहीताना मघमुद्रा इमा" इति।
शिष्या अपि तदारभ्य त प्रणामविधिष्वपि ॥

स्प्रष्टुं नैवोत्सहन्ते स्म व्याधावप्यनिवारिते।
कदापि भिषज दृष्ट्वा शिष्यैः कैश्चित् सहाध्वनि ॥

आयाति परम [illegible] क्षुत्तीव्रा समजायत ।
शिष्यार्कीत गुरु खादनमास्वादगान्वक [illegible] ॥

पृताकान दीपदीद्[illegible] पुरा दामादगे तथा ।
सतृप्तास्तन ते सर्व नभूलुर्विस्मयान्विता ॥

कदाचिद् बहुपर्याप्त भक्तमेकोत्पादन गुरु ।
समीपवर्तिनी शिष्यामेव पप्रच्छ काञ्चन ॥

"क पश्यसीह खादन्त मामन्य वाऽथ कञ्चन ।"
"त्वदन्यमेव भास्कार पश्यामी"ति तयोदितम ॥

श्रुत्वा सम्यक् त्वया दृष्ट मित्युवाच स ता मुदा ।
पुरापि मथुरानाथा गुरुदेवे कदाचन ॥

ददर्शैतस्ततोयाति पृष्ठे चाग्रे शिव शिवाम ।
एव प्रायाण्यनेकानि दृश्यानि मथुरस्य स ॥

वात्सल्याद् दर्शयामास भक्तिदार्ढ्यकराणि च ।
नवगात्रात्सवे दया [illegible] गृहे कृते ॥

[illegible] [illegible] दर्पणम् ।
हृदयो [illegible] [illegible]कान्तोविगतपार्श्वत ॥

॥ [illegible] नय

[illegible] तिमि[illegible] ।
निर्वाणस्यावशिष्टानि दिनानि नव [illegible] ॥

अथ योगीन्द्रमाहूय गुरु शिष्य कदाचन ।
उवाच तात[illegible]पठचता क्रमशस्तिथि ॥

प्राप्ते श्रावणनाम्नि पठन [illegible]मानत ।
अलमित्याज्ञापयत्त [illegible]स्मदा तनुभ ॥

[illegible] [illegible] ।
[illegible]मानत ॥

[illegible] [illegible] ।
[illegible] [illegible]पक्ष ॥

---

1 [illegible] ... lived with ... [illegible]

सायाह्न वासरे तस्मिन् गुरुदेवस्य चान्तिम ।
व्यजनै वीजयन्ति स्म शोकसविग्नचेतस ॥

तावन्ति श्वाससहितै शिष्यास्तत्तल्पपार्श्वगा ।
अभूद्गुरु समाधिस्थस्तदा कालेन्तरान्तरा ॥

पश्चादेव बहो कालात्पायस (काञ्जिका) क्षुधितोऽपिबत् ।
गुरुदेवस्तत किं चिदानीत परिचारके ॥

[1] उक्तपूर्वं यथानेन शिष्यै सत्लपता स्वयम् ।
प्रार्थितश्च नरेन्द्रेण विश्राम्यतु भवानिति ॥

नाम काल्याख्रिरुच्चार्य सविष्ट शयनेऽभवत ।
ततो निशीथे सप्राप्ते समये चंकवादने ॥

रोमाञ्चिताङ्गो नासाग्रदृष्टिर्मन्दस्मितानन ।
शाश्वत परमोहसो विवेश परम पदम ॥

रामकृष्णतरङ्गो ऽयमुत्थितो ब्रह्मसागरात ।
बभूव लीनस्तत्रैव विधाय विमल जगत् ॥

कल्या [illegible] वितिमिर भक्तारविन्दश्रिय
फुल्ल॥, [illegible] भक्तोचलुप्तद्युतिम ।
[illegible] मरीचिनिकर व्याप्त च लोकेऽनम
[illegible] समस्तजगतीमित्रोऽधुनास्त गत ॥

11. महाप्रस्थानम् ।

काशीपुर[illegible]गृह वाभवद दु खसवृतम ।
[illegible] मातृश्री शारदा भशविह्वला ॥

[illegible] विपदार्ता "मातर्म भवतारिणि ।
[illegible] इति ॥

[illegible]
[illegible]

[illegible]
[illegible]

राधारानि [illegible] समाप्तिरूप इत्यत्र । Supra p. [illegible]

गुरो शिष्यसमेतस्य च्छायाचित्रमकारि व ।
कापाय पुष्पमालाभिर्भूषितस्य विशेषत ॥

नीयमानश्च तत्कायो वराहनगरस्थले ।
श्मशानमनुयातस्तै गुरुशोकाविलात्मभि ॥

त्रैलोक्यनाथसन्याल प्रमुखैर्भक्तशेखरै ।
गायद्भिर्मुक्तकण्ठेन बाष्परुद्धगलैर्मुहु ॥

श्रीमत्परमहसस्य स्तोत्र भगवतो गुरो ।
इत्येवं श्रीराम-कृष्ण साम्योत्कर्षोपपादि च ॥

श्रीपरमहसस्तुति

श्रीरामोऽजनि पूर्वरूपमितरत् कृष्णो बभूवोत्तर
रूप, सन्धिरय स्वय, ह्यवतर [1] सधानमेवोचितम् ।

एव यत्र च सहिताधिकरणे षष्ठेऽवतारात्मके
त देव शरणं भजेमहि वय श्रीरामकृष्णाह्वयम् ॥

पूर्व रूपमिद मनश्च, परम ब्रह्मोत्तर भासते
रूप, सन्धिरनन्त सौख्यमपि, सधान समाधिस्थिति ।

यन्निष्ठाञ्चति सहिता श्रुतिवशादन्यापि मोक्षान्वया
त हसं परम भजामि शरण श्रीरामकृष्णाभिधम् ॥

रामोधर्ममयी बबन्ध पदवीं द्वीपान्तरव्यापिनी
कृष्ण सुस्थिरशान्ति दौत्यमकरोत् सप्रार्थित पार्थिवे ।

द्वाभ्या साधितमेक एव कृतवान् य शान्तिधर्मोद्यम
त देव शरण भजेमहि वय श्रीरामकृष्णाह्वयम् ॥

सालान् सप्त बिभेद चैकविशिखेनैवार्कवश्य पुरा
पश्चादर्जुन वृक्षयुग्ममपि यो दामोदर शैशवे ।

ऊर्ध्वाधोगति मूलशाख-[2]भवतुङ्गाश्वत्थ मद्याच्छिन -
त देव शरण भजेमहि वय श्रीरामकृष्णाह्वयम् ॥

---

1 *स्वय श्रीरामकृष्ण एव सधि । अवतर तद्रूपेणावतरण सधानम् ।*
तैत्तिरीयोपनिषत् 1.3 4 महासहिता । Supra p 103

2 *ससार ।*

सूर्याचन्द्रमसौ विलोचनयुग यस्यावतारद्वयी -
वशारम्भनिदानमेवभवतो विश्वस्थितिस्थापकौ।
वैराजस्य गदाधरस्य महित तस्यावतार नव
देव तशरण भजामि सतत श्रीरामकृष्णाकृतिम् ।।

श्रीरामेण सता मयेन्द्र तनयो व्यापादितश्छझना
कृष्णेनापि युधिष्ठिरोऽनघमति सत्य परित्याजित ।
मत्वेत्थ नयविप्लव परिहरन् यो नूत्नरूपोऽभव -
त्तदेव शरण भजेमहि वय श्रीरामकृष्णाहयम् ।।

श्रीरामेण सताऽबला प्रमथिता पूर्व मया ताटका
कृष्णेनापि च निर्दयेन निहता स्तन्यप्रदा पूतना।
मत्वैव महिलावध परिहरन् यो नूत्नरूपोऽभव -
त्त देव शरण भजेमहि वय श्रीरामकृष्णाहयम् ।।

उत्कर्षे स्फुट एव जाग्रति तथा रामाच्च कृष्णादपि
श्रीरामत्वविनिश्चयेऽस्य जनुष श्रीकृष्णतानिर्णये।
का शङ्कातिशयोक्तिरुन्मिषति विभ्रान्तिश्च यस्याकृते -
स्त देव शरण गतोऽस्मि सतत श्रीरामकृष्णात्मकम् ।।

श्रीरामादपि कृष्णतोऽस्य विपुले वैशिष्टय एवस्थिते
पाठीनप्रवरश्च कच्छपपति कोलाधिनाथश्च ये।
ते तिर्यक्-प्रभवा नृसिह विभुरप्यर्धेऽभवन्मानव
कुब्जो वामन एव भार्गवपति क्रोधी मृदुर्गौतम ।। [1]

पाठीनस्य च कच्छपस्य च वराहाख्यस्य यासीत्तनु -
श्चैव मे नरसिह वामनभृगुश्रेष्ठादिका न प्रिया।
मत्वेव विकलाकृति परिहरन् य पूर्णरूपोऽभव -
त्तदेव शरण भजेमहि वय श्रीरामकृष्णाहयम् ।।

एतावत्तव रामकृष्णमयता मुद्दिश्य पौराणिकी -
मालम्ब्योक्तिगति यथामति मया किञ्चिद्वचो वर्णितम्।
कोविद्याद्यमृते रहस्य मखिल स्वस्यावताराश्रय
त्वादेव शरण गतोऽस्मि सतत श्रीरामकृष्णात्मकम् ।।

---

1. *गौतमो बुद्ध ।*

कति कति न विमुक्ता व्याप्यधागस्तवाग्रे
कति कति न कथा रागाविता दुःखपूर्णा ।
कतिकति शपथा न व्याहृता विस्मृताश्च
ममहि परमहम, व्याकुलोऽस्य क्षमार्हः ॥

परिव्राजको य कलत्रान्वित सन् पिता चानपत्योऽपि शिष्यार्भकाणाम् ।
असगोऽपि दीनेषु कारुण्यपूर्णो भजे त नव रामकृष्णावतारम् ॥

न सालप्रभेत्ता न सर्पावमर्दी निवारा विनारण्यमध्याऽब्धिदुर्गे ।
स्वरक्षाश्रितान् यो दयालु र्विपन्नान् भजे त नव रामकृष्णावतारम् ॥

वहत न चाप न वेणु करे वा न कोटीरमप्युत्तमाङ्गे न पिञ्छम् ।
वसन्त न साकतपुर्या न घोषे भजेत नव रामकृष्णावतारम् ॥

अतीर्त्वा पयोधीनहत्वा परान्यान्यहत्वा परान्वात्मबन्धून सदा य ।
चकारैव सुस्था स्वधर्म व्यवस्था भजे त नव रामकृष्णावतारम् ॥

गतो वानरा नो नर च मनाय नरेन्द्रानुगो योगिना सार्वभौम ।
न कर्ता कियावान न च प्रेरको वा भजेत नव रामकृष्णावतारम् ॥

जगद्रूपमाभात्यतीत च तस्मा "दिद सर्वमात्मे"ति "नेती" ति मानात् ।
प्रसिद्ध च तत्त्व यदद्वैतरूप भजेत नव रामकृष्णावतारम् ॥

श्रीकालीचरणारविन्दयुगली भृङ्गायमाना मुदा
नानाधर्म विचार सागरसुधा धारायमाणा सदा ।
कान्ताकाञ्चनसगलेशरहिता शारदा स्नेहिता
कान्ता काञ्चन भूमिका परमहसैश्वर्य रेखा भजे ॥

प्राज्ञैस्त्यक्तसुखै र्विसोढ विविधक्लेशै पृथगयत्फल
काली- शङ्कर-राम-कृष्णभजनात प्राप्य नद्क्लेशत ।
सर्व स्याद्यदुपासनादुपनत चित्ते ममाप्यस्तु सा
कापि स्फूर्ति रशेषदेवतमय्य रामकृष्णात्मिका ॥

चेतावृत्ति रुदतु कापि मम शङ्कातङ्क निर्हारिणी
सच्चित्सौख्य विधायिना परमहसीया चिरस्थायिनी ।
ध्वान्तौघान्तक शारदेन्दुविगलज्योत्स्नाभिरामाऽनघा
भव्या सद्गुरुरामकृष्णविषया शान्तिप्रसादावहा ॥

कैवल्य प्रद ' धर्म मेघपटला सेव्या सुधीचातके -
ग्ये चिद्गगनाश्रया शुभतटित् प्रत्यग्रकान्तिर्मम।
कारुण्यामृतवर्षिणी परमहसाख्या मन केकिनो
हर्षोल्लासवहा हृतार्तिनिवहा काप्यस्तु कादम्बिनी ॥

नित्यानित्यविवेककौशलवति प्रज्ञाप्रतिष्ठावति
प्राज्ये ध्यानसमाधिधारणलसद्-धीव्योम्नि कस्मिन्नपि।
हृद्येभूमनि गमकृष्ण पदसवेद्ये शिवे धामनि
स्वान्त मे सतत प्रमोदविवश सगम्यविश्राम्यतु ॥

अकर्तव्यज्ञस्य प्रकटतरसन्मार्गघटक
पडूर्मिभ्रान्तस्याभयदमसहायैक सचिवम्।
पद प्राज्ञैर्ध्यात भवजलधिपार जिगमिषो -
र्ममारित्र भूयाद् गुरुपरमहसीयमनघम् ॥

विषयारण्यचरोन्तरङ्गहरिणोऽहकारशृगो मनो -
रथसघातमरीचिकानुसरणश्रातोऽस्तखेदोऽस्तु मे।
सुगुणस्तोम निबन्धदुर्घट विनिर्मोक्षावकाशेऽनिश
सुकृतग्रन्थियुते गदाधर पदानाये दृढ सयत ॥

ज्ञानश्रीमहिते तमोविरहिते सौजन्य चन्द्रोदये
शान्ताभीलविकारविभ्रमविपज्झञ्झानिलोज्जृम्भणे।
चित्त मे करुणातरङ्गतरले नौकायतां सतत
वीतावृत्तिभये गदाधरमये चैतन्यदुग्धार्णवे ॥

ब्रह्मानन्द सरोवरान्तरुदिते दीप्तात्मतेजो लस -
द्वर्णे बोधवचोमरन्दमधुरे कारुण्यगन्धोद्धुरे।
धीकोशे गुणकेसरे मम नवे भृगायता भावना
ससारातप तर्षहारिणि मुहु श्रीरामकृष्णाबुजे ॥

सौशील्यादि गुणोर्मिभूरि करुणा मन्दाकिनी सौभगा -
भोगे विष्णु पदाहयाञ्चित परब्रह्मोपमानायिते।
द्वन्द्वौघानुपरक्त सुस्थिरयश श्री पुष्पवद्भासुरे [2]
स्वच्छन्द मम रामकृष्णगगने हसायता मानसम् ॥

---

1. *धर्ममेघ समाधि विशेष ।*
2. *कीर्तिज्ञाने एव चन्द्रसूर्यौ।*

कल्याणकविधायिनि प्रशमिताशेषाघमघव्रजे
लोकव्रातशरण्यविष्णुपदरम्यालोकसंदर्शकि।
जाड्यान्माथिनि रामकृष्णमिहिर ज्योतिर्घने लीयता
ब्रह्मानन्दरसाभिवर्षिणि मनः प्रालेयलिन्दुर्भम ॥

पार्वतसारम्ये
[illegible] नाथनीय नाथरम्ये।
कस्मिन्नपि महति पद
[illegible] श्री परमहंसमगे ॥

विषय पुत्रानाविशेषे
विगतविविध वृत्तिर्भक्तिर्गाहविषे।
त्वयि ऽकलङ्कसाख्ये
कस्मिन्नपि रामकृष्णाख्ये ॥

ब्रह्मानन्दनरेन्द्रादि -
[illegible] सेवित [illegible]।
[illegible]
[illegible] सायामय नमः ॥

[illegible] -
[illegible]।
[illegible]
[illegible] ॥

उपसहार

इति स्तुवन्त आनीय रुद्रभूमि मनन्तरम।
स्वगुरो रग्निसाच्चक्रु शिष्यास्ते भक्तितत्परा ॥

चितामारोप्य ता मूर्ति पावकादपि पावनीम्।
ततो जगाम मातृश्रीर्विषाद सोढुमक्षमा॥

बृन्दावन सहान्याभि र्महिलाभिर्यतात्मभि ।
पत्युर्वियोग विस्मर्तु जपध्यानसमाधिभि ॥

दर्शयित्वा तदात्मानमुवाच परिसात्वयन्।
गरुदेवोपि तामेव "न कुत्रापि गतमया॥

अल ते परितापेन कर्म कार्य महत्त्वया।"
अथ शिष्यानुवाचेय "सगुरुर्नियुयोज गाम॥

मातृभाव भगवत प्रख्यापयितु मेव हि।
एव सप्रार्थितो देवो रामकृष्णो दयानिधि ॥

"कथ ते पुत्रका नाथ क्षुत्पिपासाभिपीडिता ।
निरावासा निरानन्दा श्चरिष्यन्ति धरातले॥

जीविका कल्प्यतामेषा त्वत्पदध्यादिना"मिति।
यस्या एव प्रार्थनाया फल पश्चादभून्महत्॥

रामकृष्णमठाकार साधूना सुखदाश्रयम्।
समाज-भगवत्सेवा तत्पर भुक्तिमुक्तिदम्॥

चिरन्तना नवीनाश्च धार्मिकाध्यात्मिकोद्यमा [illegible] ।
[illegible] परिणति प्राप्नास्तनोतु [illegible]।

[illegible] चतुर्विंशति पूर्णेय [illegible]
[illegible]क [illegible]त्री मन्त्राक्षर मङ्गल[illegible]॥

इति

श्री

परमेश्वरविभूते: श्रीरामकृष्णपरमहसस्य

करुणाकटाक्ष

लब्ध पति पेन

साहित्यदर्शनकलानिधिना

कविराजहसेन

आचार्य वेमूरि आञ्जनेयशर्मणा

निर्मित

श्रीपरमहस काव्यं

सपूर्णम्।

नयेन्मामङ्गुलिग्राह शिशु मातेव वत्सला।
परा परमहसीया चेतना पारमध्वन ॥

स्वत सिद्धा यत्नसाध्या द्विविधाचेतना परा।
मोक्षानन्दप्रदा नित्या भवबन्धविमोचनी॥

आविर्भवति केषा चित् स्वत सा परचेतना।
बहूनामेव साधूना यन्नसाध्या भवेदियम्॥

लभन्ते प्रसर तावत् साधनान्यत्र भूरिश।
समीचीनानि सर्वाणि क्रियमाणानि साधकै॥

परितापभर स्याच्चेत्सर्वेषामस्ति योग्यता।
तद्धि साधनसर्वस्व परमार्थप्रयोजनम॥

इति प्रोक्तेष्वेनेकेषु गुरुणा साधनेष्वपि।
यदेवाभिमत यस्य तत्तावत्तेन लभ्यते॥

बभूवुर्ज्ञनिन केचिदन्ये भक्ताश्च योगिन।
समाजसेवका केचित् कलाभिज्ञास्तथापरे॥

वाल्मीकिरास वाल्मीकि र्व्यासो व्यासश्च सर्ववित्।
श्रीराम-कृष्ण भजनात् सवृत्ता. कवयो वयम्॥

चतुर्विंशतिसाहस्र प्रोक्त रामायण तथा।
भारत शतसाहस्र विस्तृत कृष्णनेतृकम्॥

महाशैलो यथादर्शे शतषट्क चतुष्टये।
काव्येऽस्मिन् रामकृष्णस्य महिमा प्रतिबिम्बति॥

लब्ध मानुषजन्म दुर्लभतर तत्रापि वर्णोऽग्रिय-
स्तत्राप्युत्तमवैदिकान्वयभवा चास्तिक्यबुद्धि शुभा।
तत्राम्नायशिरोवच प्रवणता ब्रह्मानुभूतिप्रदा
धन्यात्माहमहो ममालमियदेवेत स्पृहा नाधिके॥

॥ ओं ततसत ॥

❀ ❀ ❀

1. श्री गायत्री परमहस ।

तनु शिवोद्वर्तनचूर्णलब्धा
प्राणप्रतिष्ठा गिरिशाच्च यस्य ।
ज्योतिर्जगन्मङ्गलमिद्धमाद्य
नमामि तद्विघ्नहर गजास्यम् ॥ 1

संसक्तमेदुरघनाघनकालिमान
मच्छाच्छकैरवसखोज्ज्वल शुक्लिमानम् ।
दृष्ट्वा परस्पर समीपसहाभिहार
धीर्मे चमत्कृतिनभोऽग्रविहारमेति ॥ 101

विततासितमेघ विभासितनु
तटिदाभसुवर्णलसद्वसनम् ।
मदसिन्धुरराजविलासगति
करुणा निलय कलये सततम् ॥ 201

तुर्याद्यवस्था स्फुरित प्रकाश
मृगाङ्कहास्य श्रुतिवाग्रहस्यम् ।
दन्तावलास्य कृतचारुलास्य
वन्दे गणेश हृतजन्मपाशम् ॥ 301

वेद्याकारोपि पुनर्निरञ्जनो भासि नीरूप ।
वद देव तत्त्वत कि भवसि ब्रह्माथवामाया ॥ 401

रचितबुधालिविनोद श्रुत्यन्तवचो विचारशुकसवादम् ।
अत्यन्तसुखोपेत सत्याश्रयकृष्णपारिजातमये ॥ 501

निरत कृपाभवानी तव कलयाम्यात्मजौ यस्याः ।
षण्मुखगजमुखसञ्ज्ञौ बोधामोदावभीष्टकरौ ॥ 601

या दैवापूर्वग्रह भूतप्रारब्धकैतवाच्चलति ।
करुणैव हि सा शक्तिस्तत्तद्व्यापारसतता सततम् ॥ 701

भर्गप्रियार्चनं बन्धौ निधाय हृदयाहये ।
ममज्जसर्वदैवासौ परमार्थस्य साधने ॥ 801

गतेकालेऽथ दोष स्व विदित्वा भैरवी तत ।
अवतारस्वरूप त विदधौ कुसुमार्चितम् ॥ 901

दैशिक प्राप्य ससिद्धि योगयोर्भक्तितन्त्रयो ।
[illegible]गेऽपि ता प्राप्तु निश्चितात्मा गदाधर ॥ 1001

विटपाश्वत्थवृक्षस्य मूल पत्र सुम फलम् ।
[illegible]विविक्त स्वप्नतुल्य पितृलोके कृतान्वित ॥ 1101

सद्धाम प्रकाशात्मा वामनीर्भामिनीरपि ।
[illegible] ब्रह्म च क ब्रह्म ख ब्रह्माभेदबुद्धिगम् ॥ 1201

धीव्योम्नि सस्फुरति वृत्तिघनैर्विहीने
[illegible] प्रभाविलसन विगतान्धकारम् ।
[illegible]नुसारि दृढभावनयानुभाव्य
[illegible]स्त्वविक्रिय उपेतु मन प्रशान्तिम् ॥ 1301

[illegible]न्यशनि वि[illegible]पाश्चर्य मीदृशैस्तत्त्वदर्शिभि ।
[illegible] प्रभुर्भगवद्भावभावित ॥ 1401

[illegible]वने द्विसप्ततिक नवद्वयशताधिके ।
[illegible]दा जनको[illegible] सप्राप्ता दक्षिणेश्वरम् ॥ 1501

[illegible] सर्वत्मभावे च प्रधाने जीविताशये ।
[illegible]नतरामरस्ये भवबन्धविमोचने ॥ 1601

[illegible] च पदादे रामकृष्णो जगाद च ।
[illegible] सपाद्य पुनरेव हि" ॥ 1701

[illegible] हि धर्मस्य स्थापनाय शुचिव्रता ।
[illegible] सुधियो विनोता विमलाशया ॥ 1801

[illegible] पार्थयामास ज्ञान वैराग्यमेव च ।
[illegible] नवेश्वर्य विनश्वरम् ॥ 1901

प्रसमोप्यास्तसदह स्वगृह पुनराययौ ।
[illegible] चात्र तेन दृष्टेन हेतुना ॥ 2001

[illegible] भवेदीशे लुब्धकस्य यथा मृगे ।
[illegible] यथामत्स्ये बकस्याप्यामिषे यथा ॥ 2101

दापितस्य स्वतन्त्रेण बुद्बुदस्येव वारिणा ।
आधाराधेयभावोऽस्ति जीवस्य परमात्मना ॥ 2201

यात यत्र निष्फलता वीक्ष्य वैद्यकृत तदा ।
तात्कालिकेप्युपशमे विदधे शारदा मतिम् ॥ 2301

2. श्रीरामकृष्णसुप्रभातम् ॥

श्रीदक्षिणेश्वरसरोवरराजहस
श्रीकालिकापदसरोरुहचञ्चरीक ।
श्रीशारदा हृदयवासि सरोजधामन्
श्रीराकृष्णभगवस्तव सुप्रभातम् ॥ 1

रागंविहाय विषयेषु भवाप्तिहेतु
राजावतसवनिताङ्घ्रियुगे तनोषि ।
रामोऽस्मि कृष्ण इतिच प्रकटीकरोषि
श्रीरामकृष्ण भगवस्तव सुप्रभातम् ॥ 2

मत्तोङ्घ्रिपकजगलन्मधुनैव काल्या
मध्ये समाधिगगनस्य विहारमेषि ।
मन्दस्मितद्युतिसुधामधुराननेन्दो
श्रीरामकृष्णभगवस्तव सुप्रभातम् ॥ 3

कृत्स्न विषादमपनीय ददासि सौख्य
कृच्छ्रस्थितस्य सुधिय शरणागतस्य ।
कृष्णात्परो ह्यवतरो भवदीय एव
श्रीरामकृष्ण भगवस्तव सुप्रभातम् ॥ 4

ष्णत्वान्तिम वरद तावकनामधेय
षड्वैरिवर्गनिधन श्रवणामृत च ।
णाकारगर्भशरगत्यवनैकदीक्ष
श्रीरामकृष्णभगवस्तव सुप्रभातम् ॥ 5

भक्तश्च भागवतवाग् भगवानभिन्ना
भेदो न कार्य इति यत्कथित त्वया तत् ।
भक्तश्च भागवतमात्मन एव रूप
श्रीरामकृष्णभगवस्तव सुप्रभातम् ॥ 6

गर्ह्य हितच मतमाद्रियसे पर स्व
गर्वोज्झितोऽसि परमार्थनिधिदधान ।
गादाधरीं वहसि मूर्ति मनिन्द्यकीर्ते
श्रीरामकृष्णभगवस्तव सुप्रभातम् ॥ 7

वै…गम्यमरलोरच एव वाणी
…कल्पलतिकव त्रिलोकनश्री ।
वैराग्य भूमि रमया समलाष्टहेमा
…गमकृष्णभगवस्तव सुप्रभातम् ॥ 9

स्तै…साधनविशेष कलाप्रवीण
…चार्यजोधपरितोषित साधुवृन्द ।
…स्थिति प्रवणतामहितान्तरङ्ग
…कृष्णभगवस्तव सुप्रभातम् ॥ 10

वे…विबुधा बहुधावदन्ति
… हि …गत प्रातिबिम्बतुल्यम् ।
…श्रुतेगता विशदीकरोषि
…कृष्ण …वस्तव सुप्रभातम् ॥ 11

…कवारुतरमच्छ…ताभिराम
…निपट्टप्रतिभाधरेण ।
…चर्मविराटपरुषावता…
…कृष्णभगवस्तव सुप्रभातम् ॥ 12

[illegible]
[illegible]
[illegible]
…भगवस्तव सुप्रभातम् ॥ 13

[illegible]
[illegible]
[illegible]
… सुप्र… ॥ 14

[illegible]
[illegible]
…भता मासि ज… प्रभया
…परमहंसनुति …दा स्यात ॥ 15

श्रीरामकृष्णस्तव: ॥

तोतापुरि समारम्भां श्रीगदाधरमध्यमाम् ।
नरेन्द्रशारदानन्ता वन्दे गुरुपरम्पराम् ॥

देवस्यभुवि प्रादुर्भावो ह्यवतार उच्यते सद्भि ।
सार्थकमेव ततोऽस्मिन् गदाधरे भूसुरावतारत्वम् ॥

[illegible]गनाज्जागदप्यादप्यनन्तरमय हरे ।
[illegible]न्द्रार्कयोरशिरिव ज्योतिर्भासियते भुवम् ॥

[illegible]वैकुण्ठेन धृतावतारदशके विप्रावतारद्वय
[illegible] [illegible]गनपार्गवाविति तत कालाच्च पश्चाद् बहो ।
[illegible]तो [illegible]ऽ[illegible] गदाधराह्वयधरादेवावतारोऽपर -
[illegible]त हस परम स्मरामि सतत श्रीरामकृष्णाभिधम् ॥

[illegible] पणवो धनुरासीद् वेणुश्च कृष्णत्वे ।
[illegible]श्रीरामकृष्णतायां कालीस्तव एव यस्य त कलये ॥

[illegible]हङ्कारतया वदे "दय" मिति स्वात्मा[illegible]गुह्विरेण न
"[illegible]" मित्येव तथापि "य [illegible]खलु पु[illegible] [illegible]श्च कृष्णोऽप्य[illegible] ।
[illegible] भाति स रामकृष्ण" इति य प्रोक्त जगर्जैव य -
[illegible] नौमि गदाधर परमहसाख्यावतार नवम ॥

[illegible]त्मेति पितासि [illegible]लोकनिवहस्येति [illegible] स्मृते -
[illegible] खलु ता[illegible]शी [illegible] [illegible] [illegible] [illegible]दृशी ।
"[illegible]प्राप्तोऽय" [illegible] प्रबोधसुधया यद्दत्तया प्याय्यते
[illegible]मह स्मरामि हृदि त श्रीरामकृष्णाभिधम् ॥

[illegible]देव मुहुर्मुहु श्रवणतो वेदान्तवाक्यात पवे -
[illegible]परात्मानुभवप्रमोद इति सुस्था सपदा[illegible] ।
[illegible]कृष्णार्पणं साधितोत्तमसुखाद बो[illegible]दीपाज्जन।
[illegible] [illegible]मह स्मरामि हृदि त श्रीरामकृष्णाभिधम् ॥

[illegible] [illegible]न्तु पुराणदर्शनमहाकाव्यानि वेदास्तथे -
[illegible]चार्य स्वजनाश्च धर्म कुशला कैरीदृशो दर्शित ।

मार्ग पण्डितपामरेष्टफलदो मुक्त्वा यमाध्यात्मिक -
स्त देव हृदये स्मरामि सतत श्रीरामकृष्ण प्रभुम् ॥

शस्तानन्दरसानुभूतिसदने ध्वस्तव्यथावेदने
ग्रस्ताशेषहृषीकवृत्तिविभवे स्रस्तक्रियाप्राभवे।
अस्तद्वन्द्वकथे निरस्तवितथेऽभ्यस्तात्मविद्यापथे
प्रस्तावस्फुरिते गदाधरमहामोहे निलीयामहे ॥

गुणदोषविचारवर्जिते
स्थिरवृत्त्या वस मे गदाधर।
भवरोगभिषग्वर प्रभो
हृदये स्वास्थ्यकृते दिवानिशम् ॥

जय रामकृष्ण करुणामृताम्बुधे
जय शारदाहृदयपङ्कजासन।
जय कालिकाङ्घ्रिजलजालिराड्विभो
जय सद्गुरो परमहसशेखर ॥

श्रीरामकृष्ण प्रपत्तिः ॥

उदरार्थमुपार्जिताल्पविद्य जीवितमेवहि निष्फल भुवीति।
परमार्थरतो बभूव यस्त परमहसमह सदा प्रपद्ये ॥

बहवो ह्युपयान्ति बालकास्ते तनयामित्यनुनीतवानपौत्राम्।
निजपत्नीमातरं गुरुस्त परमहस मह सदा प्रपद्ये ॥

महिलाः खलु मातरो जनाना मित्यवबोधयितु स्वधर्मपत्नीम्।
जगदम्बा मन्यते स्म यस्त परमहसमह सदा प्रपद्ये ॥

भगवाननुभाव्य एव सर्वै रितिरुचिर श्रुतिबोधितार्थमूचे।
य उदाहरणैः स्फुटीकृत त परम हसमह सदा प्रपद्ये
भगवानवलोक्यता त्वयेति प्रवदन् शिष्यमहो सशक्तिपातम्।
योऽदर्शयदेवमेव त त परमहंसमह सदा प्रपद्ये ॥

मतसाम्यमपेक्षित नराणामिति य स्वयमेवाचरत् परेषाम्।
धर्मानपि देशिकोत्तम त परमहसमह सदा प्रपद्ये॥

व्रणपीडितकधरोऽपि य सन विजहौ नह्युपदेशभाषणानि।
ब्रह्मज्ञ कालिकानुति त प॰॰हसमह सदा प्रपद्ये॥

व्रणवारण शक्तिमान् पुनर्य सोढु व्यवसित एव कण्ठबाधाम्।
तपनन्यक्षान्ति धैर्यवन्त परम हसमह सदा प्रपद्ये॥

स्थातव्य भावमुखे
त्वयेति काल्या समादिष्ट।
यो लोकसग्रहार्थं
तथैव तस्थौ प्रपद्ये तम्॥

मङ्गलम्॥

जभूव यद् दाशरथेश्च मङ्गल
यदेव नन्दव्रजमन्दिरस्य।
स्वधर्म सस्थापनहेतवे सदा
तदस्तु ते सेवित सर्वमङ्गल॥

भागीरथी पञ्चवटी बृन्दाराम विनोदिने।
बुधमानसहसाय मगल महिताय ते॥

मगल रामकृष्णाय कालिका प्रियसूनवे।
तुभ्य परमहसाय रामकृष्ण स्वरूपिणे॥

सन्यासिन वनस्थं वा गृहस्थ वाथवा वटुम्।
समानयसि तस्मै ते रामकृष्णाय मङ्गलम्॥

पश्यन्त यस्य पश्यन्ती दृष्टिरन्तर्मुखी जनम्।
अनुगृह्णाति तस्मै ते रामकृष्णाय मङ्गलम्॥

READ	FOR	PAGE	LINE
I am	and	v	23
कृपा	कपा	60	9
स्रे	स्मे	64	15
देवि	दिवि	68	14
क्वासि	कवासि	68	20
वा	व	71	4
द्व	द	74	9
वपि	विपि	75	1
भै	भे	77	10
धि	घि	80	21
च्य	च	81	1
ष्ट्च	ष्ट्य	81	5
प	प	88	16
क्वा	क्का	107	9
का	क	108	8
म.	भ.	110	12
त्म	त्य	115	4
ल्प	ल्य	116	7
न्य	न्द	119	6
ध्य	ध्या	130	21
शारदा	शारद	133	4
ना	न	133	15
र्णा	र्ण	133	17
ति	सि	135	5
त्य	त्यय	136	22
व	व्	137	20

READ	FOR	PAGE	LINE
द	दा	139	19
द्व	द्द	140	6
निरा	निर	147	13
भवान्	भवन्	151	16
मुग्ध	लमुग्ध	151	19
जीविते	जीविते श्री	152	26
ह्वि	ह्लि	155	11
ध्द्वा	द्धा	155	16
हल	हेल	155	17
ह	हा	158	9
सु	स	160	21
च्छे	च्चे	161	18
त्स्य	त्स्प	162	21
दुर्ब	दर्ब	164	10
रु	रू	167	17
ष्णा	ष्ण	167	18
सो	से	168	14
ढे	डे	178	21
दु	द	182	18
नवनीतम् –		183	(Margin) 1
गृ	गु	184	15
फल	पल	185	23
ह्व	ह्न	198	13, 21
द्म	ह्म	199	5
गुरु	गरु	202	Last
र्वा	र्व	206	15